# 6 Shrimaddevibhagavatamahapurane Shashthah Skandhah

# ૬ શ્રીમદ્દેવીભાગવતમહાપુરાણે ષષ્ઠઃ સ્કન્ધઃ

## Document Information

Text title : Devi Bhagavata Mahapurana Skandha 06

File name : devIbhAgavatam06.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# ૬ શ્રીમદ્દેવીભાગવતમહાપુરાણે ષષ્ઠઃ સ્કન્ધઃ

## ૬.૧ પ્રથમોઽધ્યાયઃ । ત્રિશિરસસ્તપોભઙ્ગાય દેવરાજેન્દ્રદ્વારા નાનોપાયચિન્તનવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ મિષ્ટં તે વચનામૃતમ્ ।
ન તૃપ્તાઃ સ્મો વયં પીત્વા દ્વૈપાયનકૃતં શુભમ્ ॥ ૧॥

પુનસ્ત્વાં પ્રષ્ટુમિચ્છામઃ કથાં પૌરાણિકીં શુભામ્ ।
વેદેઽપિ કથિતાં રમ્યાં પ્રસિદ્ધાં પાપનાશિનીમ્ ॥ ૨॥

વૃત્રાસુર ઇતિ ખ્યાતો વીર્યવાંસ્ત્વષ્ટુરાત્મજઃ ।
સ કથં નિહતઃ સઙ્ખ્યે વાસવેન મહાત્મના ॥ ૩॥

ત્વષ્ટા વૈ સુરપક્ષીયસ્તત્પુત્રો બલવત્તરઃ ।
શક્રેણ ઘાતિતઃ કસ્માદ્બ્રહ્મયોનિર્મહાબલઃ ॥ ૪॥

દેવાઃ સત્ત્વગુણોત્પના માનુષા રાજસાઃ સ્મૃતાઃ ।
તિર્યઞ્ચસ્તામસાઃ પ્રોક્તાઃ પુરાણાગમવાદિભિઃ ॥ ૫॥

વિરોધોઽત્ર મહાન્ ભાતિ નૂનં શતમખેન હ ।
છલેન બલવાન્ વૃત્રઃ શક્રેણ વિનિપાતિતઃ ॥ ૬॥

વિષ્ણુઃ પ્રેરયિતા તત્ર સ તુ સત્ત્વધરઃ પરઃ ।
પ્રવિષ્ટઃ પવિમધ્યે સ છદ્મના ભગવાન્ પ્રભુઃ ॥ ૭॥

સન્ધિં વિધાય સ હ્યેવં મન્ત્રિતોઽસૌ મહાબલઃ ।
હરિભ્યાં સત્યમુત્સૃજ્ય જલફેનેન શાતિતઃ ॥ ૮॥

કૃતમિન્દ્રેણ હરિણા કિમેતત્સૂત સાહસમ્ ।
મહાન્તોઽપિ ચ મોહેન વઞ્ચિતાઃ પાપબુદ્ધયઃ ॥ ૯॥

અન્યાયવર્તિનોઽત્યર્થં ભવન્તિ સુરસત્તમાઃ ।

સદાચારેણ યુક્તેન દેવાઃ શિષ્ટત્વમાગતાઃ ॥ ૧૦॥

એવં વિશિષ્ટધર્મેણ શિષ્ટત્વં કીદૃશં પુનઃ ।
હત્વા વૃત્રં તુ વિશ્વસ્તં શક્રેણ છદ્મના પુનઃ ॥ ૧૧॥

પ્રાપ્તં પાપફલં નો વા બ્રહ્મહત્યાસમુદ્ભવમ્ ।
કિં ચ ત્વયા પુરા પ્રોક્તં વૃત્રાસુરવધઃ કૃતઃ ॥ ૧૨॥

શ્રીદેવ્યા ઇતિ તચ્ચાપિ ચિત્તં મોહયતીહ નઃ ।
સૂત ઉવાચ ।
શૃણ્વન્તુ મુનયો વૃત્તં વૃત્રાસુરવધાશ્રયમ્ ॥ ૧૩॥

યથેન્દ્રેણ ચ સમ્પ્રાપ્તં દુઃખં હત્યાસમુદ્ભવમ્ ।
એવમેવ પુરા પૃષ્ટો વ્યાસઃ સત્યવતીસુતઃ ॥ ૧૪॥

પારીક્ષિતેન રાજ્ઞાપિ સ યદાહ ચ તદ્બ્રુવે ।
જનમેજય ઉવાચ ।
કથં વૃત્રાસુરઃ પૂર્વં હતો મઘવતા મુને ॥ ૧૫॥

સહાયં વિષ્ણુમાસાદ્ય છદ્મના સાત્ત્વિકેન હ ।
કથં ચ દેવ્યા નિહતો દૈત્યોઽસૌ કેન હેતુના ॥ ૧૬॥

કથમેકવધો દ્વાભ્યાં કૃતઃ સ્યાન્મુનિપુઙ્ગવ ।
તદેતચ્છ્રોતુમિચ્છામિ પરં કૌતૂહલં હિ મે ॥ ૧૭॥

મહતાં ચરિતં શૃણ્વન્ કો વિરજ્યેત માનવઃ ।
કથયામ્બાવૈભવં ત્વં વૃત્રાસુરવધાશ્રિતમ્ ॥ ૧૮॥

વ્યાસ ઉવાચ ।
ધન્યોઽસિ રાજંસ્તવ બુદ્ધિરીદૃશી
જાતા પુરાણશ્રવણેઽતિસાદરા ।
પીત્વામૃતં દેવવરાસ્તુ સર્વથા
પાને વિતૃષ્ણાઃ પ્રભવન્તિ વૈ પુનઃ ॥ ૧૯॥

દિને દિને તેઽધિકભક્તિભાવઃ
કથાસુ રાજન્ મહનીયકીર્તેઃ ।
શ્રોતા યદૈકપ્રવણઃ શૃણોતિ
વક્તા તદા પ્રીતમના બ્રવીતિ ॥ ૨૦॥

યુદ્ધં પુરા વાસવવૃત્રયોર્યદ્
વેદે પ્રસિદ્ધં ચ તથા પુરાણે ।
દુઃખં સુરેન્દ્રેણ તથૈવ લબ્ધં
હત્વા રિપું ત્વાષ્ટ્રમપાપમેવ ॥ ૨૧॥

ચિત્રં કિમત્ર નૃપતે હરિવજ્રભૃદ્ભ્યાં
યચ્છદ્મના વિનિહતસ્ત્રિશિરોઽથ વૃત્રઃ ।
માયાબલેન મુનયોઽપિ વિમોહિતાસ્તે
ચક્રુશ્ચ નિન્દ્યમનિશં કિલ પાપભીતાઃ ॥ ૨૨॥

વિષ્ણુઃ સદૈવ કપટેન જઘાન દૈત્યાન્
સત્ત્વાત્મમૂર્તિરપિ મોહમવાપ્ય કામમ્ ।
કોઽન્યોઽસ્તિ તાં ભગવતીં મનસાપિ જેતું
શક્તઃ સમસ્તજનમોહકરીં ભવાનીમ્ ॥ ૨૩॥

મત્સ્યાદિયોનિષુ સહસ્રયુગેષુ સદ્યઃ
સાક્ષાદ્ભવત્યપિ યયા વિનિયોજિતોઽત્ર ।
નારાયણો નરસખો ભગવાનનન્તઃ
કાર્યં કરોતિ વિહિતાવિહિતં કદાચિત્ ॥ ૨૪॥

દેહં ધનં ગૃહમિદં સ્વજના મદીયં
પુત્રાઃ કલત્રમિતિ મોહમુપેત્ય સર્વઃ ।
પુણ્યં કરોત્યથ ચ પાપચયં કરોતિ
માયાગુણૈરતિબલૈર્વિકલીકૃતો યત્ ॥ ૨૫॥

ન જાતુ મોહં ક્ષપિતું નરઃ ક્ષમઃ
કશ્ચિદ્ભવેદ્ભૂપ પરાવરાર્થવિત્ ।
વિમોહિતસ્તૈસ્ત્રિભિરેવ મૂલતો
વશીકૃતાત્મા જગતીતલે ભૃશમ્ ॥ ૨૬॥

અથ તૌ માયયા વિષ્ણુવાસવૌ મોહિતૌ ભૃશમ્ ।
જઘ્નતુશ્છદ્મના વૃત્રં સ્વાર્થસાધનતત્પરૌ ॥ ૨૭॥

તદહં સમ્પ્રવક્ષ્યામિ વૃત્તાન્તમવનીપતે ।
કારણં પૂર્વવૈરસ્ય વૃત્રવાસવયોર્મિથઃ ॥ ૨૮॥

ત્વષ્ટા પ્રજાપતિર્હ્યાસીદ્દેવશ્રેષ્ઠો મહાતપાઃ ।

દેવાનાં કાર્યકર્તા ચ નિપુણો બ્રાહ્મણપ્રિયઃ ॥ ૨૯॥

સ પુત્રં વૈ ત્રિશિરસમિન્દ્રદ્વેષાત્કિલાસૃજત્ ।
વિશ્વરૂપેતિ વિખ્યાતં નામ્ના રૂપેણ મોહનમ્ ॥ ૩૦॥

ત્રિભિઃ સ વદનૈઃ શ્રેષ્ઠૈર્વ્યરોચત મનોહરૈઃ ।
ત્રિભિર્ભિન્નાનિ કાર્યાણિ મુખૈઃ સમકરોન્મુનિઃ ॥ ૩૧॥

વેદાનેકેન સોઽધીતે સુરાં ચૈકેન સોઽપિબત્ ।
તૃતીયેન દિશઃ સર્વા યુગપચ્ચ નિરીક્ષતે ॥ ૩૨॥

ત્રિશિરા ભોગમુત્સૃજ્ય તપશ્ચક્રે સુદુષ્કરમ્ ।
તપસ્વી સ મૃદુર્દાન્તો ધર્મમેવ સમાશ્રિતઃ ॥ ૩૩॥

પઞ્ચાગ્નિસાધનં કાલે પાદપાગ્રે નિવેશનમ્ ।
જલમધ્યે નિવાસં ચ હેમન્તે શિશિરે તથા ॥ ૩૪॥

નિરાહારો જિતાત્માસૌ ત્યક્તસર્વપરિગ્રહઃ ।
તપશ્ચચાર મેધાવી દુષ્કરં મન્દબુદ્ધિભિઃ ॥ ૩૫॥

તં ચ દૃષ્ટ્વા તપસ્યન્તં ખેદમાપ શચીપતિઃ ।
વિષાદમગમત્તત્ર શક્રોઽયં માસ્મભૂદિતિ ॥ ૩૬॥

દૃષ્ટ્વા તસ્ય તપો વીર્યં સત્યં ચામિતતેજસઃ ।
ચિન્તાં ચ મહતીં પ્રાપ હ્યનિશં પાકશાસનઃ ॥ ૩૭॥

વિવર્ધમાનસ્ત્રિશિરા મામયં શાતયિષ્યતિ ।
નોપેક્ષ્યઃ સર્વથા શત્રુર્વર્ધમાનબલો બુધૈઃ ॥ ૩૮॥

તસ્માદુપાયઃ કર્તવ્યસ્તપોનાશાય સામ્પ્રતમ્ ।
કામસ્તુ તપસાં શત્રુઃ કામાન્નશ્યતિ વૈ તપઃ ॥ ૩૯॥

તથૈવાદ્ય પ્રકર્તવ્યં ભોગાસક્તો ભવેદ્યથા ।
ઇતિ સઞ્ચિન્ત્ય મનસા બુદ્ધિમાન્બલમર્દનઃ ॥ ૪૦॥

આજ્ઞાપયત્સોઽપ્સરસસ્ત્વાષ્ટ્રપુત્રપ્રલોભને ।
ઉર્વશીં મેનકાં રમ્ભાં ઘૃતાચીં ચ તિલોત્તમામ્ ॥ ૪૧॥

સમાહૂયાબ્રવીચ્છક્રસ્તાસ્તદા રૂપગર્વિતાઃ ।
પ્રિયં કુરુધ્વં મે સર્વાઃ કાર્યેઽદ્ય સમુપસ્થિતે ॥ ૪૨॥

યત્તો મેઽદ્ય મહાઞ્છત્રુસ્તપસ્તપતિ દુર્જયઃ ।
કાર્યં કુરુત ગચ્છધ્વં પ્રલોભયત માચિરમ્ ॥ ૪૩॥

શ૱ૃઙ્ગારવેષૈર્વિવિધૈર્હાવૈર્દેહસમુદ્ભવૈઃ ।
પ્રલોભયત ભદ્રં વઃ શમયધ્વં જ્વરં મમ ॥ ૪૪॥

અસ્વસ્થોઽહં મહાભાગાસ્તસ્ય જ્ઞાત્વા તપોબલમ્ ।
બલવાનાસનં મેઽદ્ય ગ્રહીષ્યત્યવિલમ્બિતઃ ॥ ૪૫॥

ભયં મે સમુપાયાતં ક્ષિપ્રં નાશયતાબલાઃ ।
ઉપકુર્વન્તુ સહિતાઃ કાર્યેઽદ્ય સમુપસ્થિતે ॥ ૪૬॥

તચ્છ્રુત્વા વચનં નાર્ય ઊચુસ્તં પ્રણતાઃ પુરઃ ।
મા ભયં કુરુ દેવેશ યતિષ્યામઃ પ્રલોભને ॥ ૪૭॥

યથા ન સ્યાદ્ભયં તસ્માત્તથા કાર્યં મહાદ્યુતે ।
નૃત્યગીતવિહારૈશ્ચ મુનેસ્તસ્ય પ્રલોભને ॥ ૪૮॥

કટાક્ષૈરઙ્ગભેદૈશ્ચ મોહયિત્વા મુનિં વિભો ।
લોલુપં વશમસ્માકં કરિષ્યામો નિયન્ત્રિતમ્ ॥ ૪૯॥

વ્યાસ ઉવાચ ।
ઇત્યાભાષ્ય હરિં નાર્યો યયુસ્ત્રિશિરસોઽન્તિકમ્ ।
કુર્વન્ત્યો વિવિધાન્ભાવાન્કામશાસ્ત્રોચિતાનપિ ॥ ૫૦॥

ગાયન્ત્યસ્તાલભેદૈસ્તા નૃત્યન્ત્યઃ પુરતો મુનેઃ ।
તં પ્રલોભયિતું ચક્રુર્નાનાભાવાન્વરાઙ્ગનાઃ ॥ ૫૧॥

નાપશ્યત્સ તપોરાશિરઙ્ગનાનાં વિડમ્બનમ્ ।
ઇન્દ્રિયાણિ વશે કૃત્વા મૂકાન્ધબધિરઃ સ્થિતઃ ॥ ૫૨॥

દિનાનિ કતિચિત્તસ્થુર્નાર્યસ્તસ્યાશ્રમે વરે ।
કુર્વન્ત્યો ગાનનૃત્યાદિપ્રપઞ્ચાનતિમોહદાન્ ॥ ૫૩॥

ન ચચાલ યદા કામં ધ્યાનાચ્ચ ત્રિશિરા મુનિઃ ।
પરાવૃત્ય તદા દેવ્યઃ પુનઃ શક્રમુપસ્થિતાઃ ॥ ૫૪॥

કૃતાઞ્જલિપુટાઃ સર્વા દેવરાજમથાબ્રુવન્ ।
શ્રાન્તા દીના ભયત્રસ્તા વિવર્ણવદના ભૃશમ્ ॥ ૫૫॥

દેવદેવ મહારાજ યત્નશ્ચ પરમઃ કૃતઃ ।

ન સ શક્યો દુરાધર્ષો ધૈર્યાચ્ચાલયિતું વિભો ॥ ૫૬॥

ઉપાયોઽન્યઃ પ્રકર્તવ્યઃ સર્વથા પાકશાસન ।
નાસ્માકં બલમેતસ્મિંસ્તાપસે વિજિતેન્દ્રિયે ॥ ૫૭॥

દિષ્ટ્યા વયં ન શપ્તાઃ સ્મ યદનેન મહાત્મના ।
મુનિના વહ્નિતુલ્યેન તપસા દ્યોતિતેન હિ ॥ ૫૮॥

વિસૃજ્યાપ્સરસઃ શક્રશ્ચિન્તયામાસ મન્દધીઃ ।
તસ્યૈવ ચ વધોપાયં પાપબુદ્ધિરસામ્પ્રતમ્ ॥ ૫૯॥

વિસૃજ્ય લોકલજ્જાં સ તથા પાપભયં ભૃશમ્ ।
ચકાર પાપબુદ્ધિં તુ તદ્વધાય મહીપતે ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે ત્રિશિરસસ્તપોભઙ્ગાય દેવરાજેન્દ્રદ્વારા
નાનોપાયચિન્તનવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૬.૧॥

## ૬.૨ દ્વિતીયોઽધ્યાયઃ । ત્રિશિરવધાનન્તરં વૃત્રોત્પત્તિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
અથ સ લોભમુપેત્ય સુરાધિપઃ
સમધિગમ્ય ગજાસનસંસ્થિતઃ ।
ત્રિશિરસં પ્રતિ દુષ્ટમતિસ્તદા
મુનિમપશ્યદમેયપરાક્રમમ્ ॥ ૧॥

તમભિવીક્ષ્ય દૃઢાસનસંસ્થિતં
જિતગિરં સુસમાધિવશં ગતમ્ ।
રવિવિભાવસુસન્નિભમોજસા
સુરપતિઃ પરમાપદમભ્યગાત્ ॥ ૨॥

કથમસૌ વિનિહન્તુમહો મયા
મુનિરપાપમતિઃ કિલ સમ્મતઃ ।
રિપુરયં સુસમિદ્ધતપોબલઃ
કથમુપેક્ષ્ય ઇહાસનકામુકઃ ॥ ૩॥

ઇતિ વિચિન્ત્ય પવિં પરમાયુધં

પ્રતિ મુમોચ મુનિં તપસિ સ્થિતમ્ ।
શશિદિવાકરસન્નિભમાશુગં
ત્રિશિરસં સુરસઙ્ઘપતિઃ સ્વયમ્ ॥ ૪॥

તદભિઘાતહતઃ સ ધરાતલે
કિલ પપાત મમાર ચ તાપસઃ ।
શિખરિણઃ શિખરં કુલિશાર્દિતં
નિપતિતં ભુવિ ચાદ્ભુતદર્શનમ્ ॥ ૫॥

તં નિહત્ય મુદમાપ સુરેશ-
શ્ચુક્રુશુશ્ચ મુનયસ્તુ સંસ્થિતાઃ ।
હા હતેતિ ભૃશમાર્તનિઃસ્વનાઃ
કિં કૃતં શતમખેન પાપિના ॥ ૬॥

વિનાપરાધં તપસાં નિધિર્હતઃ
શચીપતિઃ પાપમતિર્દુરાત્મા ।
ફલં કિલાયં તરસા કૃતસ્ય
પ્રાપ્નોતુ પાપી હનનોદ્ભવસ્ય ॥ ૭॥

તં નિહત્ય તરસા સુરરાજો
નિર્જગામ નિજમન્દિરમાશુ ।
સ હતોઽપિ વિરરાજ મહાત્મા
જીવમાન ઇવ તેજસાં નિધિઃ ॥ ૮॥

તં દૃષ્ટ્વા પતિતં ભૂમૌ જીવન્તમિવ વૃત્રહા ।
ચિન્તામાપાતિખિન્નાઙ્ગઃ કિં વા જીવેદયં પુનઃ ॥ ૯॥

વિમૃશ્ય મનસાતીવ તક્ષાણં પુરતઃ સ્થિતમ્ ।
મઘવા વીક્ષ્ય તં પ્રાહ સ્વકાર્યસદૃશં વચઃ ॥ ૧૦॥

તક્ષંશ્છિન્ધિ શિરાંસ્યસ્ય કુરુષ્વ વચનં મમ ।
મા જીવતુ મહાતેજા ભાતિ જીવન્નિવ સ્વયમ્ ॥ ૧૧॥

ઇત્યાકર્ણ્ય વચસ્તસ્ય તક્ષોવાચ વિગર્હયન્ ।
તક્ષોવાચ ।
મહાસ્કન્ધો ભૃશં ભાતિ પરશુર્ન તરિષ્યતિ ॥ ૧૨॥

તતો નાહં કરિષ્યામિ કાર્યમેતદ્વિગર્હિતમ્ ।

ત્વયા વૈ નિન્દિતં કર્મ કૃતં સદ્ભિર્વિગર્હિતમ્ ॥ ૧૩॥

અહં બિભેમિ પાપાદ્વૈ મૃતસ્યૈવ ચ મારણે ।
મૃતોઽયં મુનિરસ્ત્યેવ શિરસઃ કૃન્તનેન કિમ્ ॥ ૧૪॥

ભયં કિં તેઽત્ર સઞ્જાતં પાકશાસન કથ્યતામ્ ।
ઇન્દ્ર ઉવાચ ।
સજીવ ઇવ દેહોઽયમાભાતિ વિશદાકૃતિઃ ॥ ૧૫॥

તસ્માદ્બિભેમિ મા જીવેન્મુનિઃ શત્રુરયં મમ ।
તક્ષોવાચ ।
નાત્ર કિં ત્રપસે વિદ્વન્ ક્રૂરેણાનેન કર્મણા ॥ ૧૬॥

ઋષિપુત્રમિમં હત્વા બ્રહ્મહત્યાભયં ન કિમ્ ।
ઇન્દ્ર ઉવાચ ।
પ્રાયશ્ચિત્તં કરિષ્યામિ પશ્ચાત્પાપક્ષયાય વૈ ॥ ૧૭॥

શત્રુસ્તુ સર્વથા વધ્યશ્છલેનાપિ મહામતે ।
તક્ષોવાચ ।
ત્વં લોભાભિહતઃ પાપં કરોષિ મઘવન્નિહ ॥ ૧૮॥

તં વિનાહં કથં પાપં કરોમિ વદ મે વિભો ।
ઇન્દ્ર ઉવાચ ।
મખેષુ ખલુ ભાગં તે કરિષ્યામિ સદૈવ હિ ॥ ૧૯॥

શિરઃ પશોસ્તુ તે ભાગં યજ્ઞે દાસ્યન્તિ માનવાઃ ।
શુલ્કેનાનેન છિન્ધિ ત્વં શિરાંસ્યસ્ય કુરુ પ્રિયમ્ ॥ ૨૦॥

વ્યાસ ઉવાચ ।
એતચ્છ્રુત્વા મહેન્દ્રસ્ય વચસ્તક્ષા મુદાન્વિતઃ ।
કુઠારેણ શિરાંસ્યસ્ય ચકર્ત સુદૃઢેન હિ ॥ ૨૧॥

છિન્નાનિ ત્રીણિ શીર્ષાણિ પતિતાનિ યદા ભુવિ ।
તેભ્યસ્તુ પક્ષિણઃ ક્ષિપ્રં વિનિષ્પેતુઃ સહસ્રશઃ ॥ ૨૨॥

કલવિઙ્કાસ્તિત્તિરયસ્તથૈવ ચ કપિઞ્જલાઃ ।
પૃથક્પૃથગ્વિનિષ્પેતુર્મુખતસ્તરસા તદા ॥ ૨૩॥

યેન વેદાનધીતે સ્મ સોમં ચ પિબતે તથા ।

તસ્માદ્વક્ત્રાત્કિલોત્પેતુઃ સદ્ય એવ કપિઞ્જલાઃ ॥ ૨૪॥

યેન સર્વા દિશઃ કામં પિબન્નિવ નિરીક્ષતે ।
તસ્માત્તુ તિત્તિરાસ્તત્ર નિઃસૃતાસ્તિગ્મતેજસઃ ॥ ૨૫॥

યત્સુરાપં તુ તદ્વક્ત્રં તસ્માત્તુ ચટકાઃ કિલ ।
વિનિષ્પેતુસ્ત્રિશિરસ એવં તે વિહગા નૃપ ॥ ૨૬॥

એવંવિનિઃસૃતાન્દૃષ્ટ્વા તેભ્યઃ શક્રસ્તદાણ્ડજાન્ ।
મુમોદ મનસા રાજન્ જગામ ત્રિદિવં પુનઃ ॥ ૨૭॥

ગતે શક્રે તુ તક્ષાપિ સ્વગૃહં તરસા યયૌ ।
યજ્ઞભાગં પરં લબ્ધ્વા મુદમાપ મહીપતે ॥ ૨૮॥

ઇન્દ્રોઽથ સ્વગૃહં ગત્વા હત્વા શત્રું મહાબલમ્ ।
મેને કૃતાર્થમાત્માનં બ્રહ્મહત્યામચિન્તયન્ ॥ ૨૯॥

તં શ્રુત્વા નિહતં ત્વષ્ટા પુત્રં પરમધાર્મિકમ્ ।
ચુકોપાતીવ મનસા વચનં ચેદમબ્રવીત્ ॥ ૩૦॥

અનાગસં મુનિં યસ્માત્પુત્રં નિહતવાન્મમ ।
તસ્માદુત્પાદયિષ્યામિ તદ્વધાર્થં સુતં પુનઃ ॥ ૩૧॥

સુરાઃ પશ્યન્તુ મે વીર્યં તપસશ્ચ બલં તથા ।
જાનાતુ સર્વં પાપાત્મા સ્વકૃતસ્ય ફલં મહત્ ॥ ૩૨॥

ઇત્યુક્ત્વાગ્નિં જુહાવાથ મન્ત્રૈરાથર્વણોદિતૈઃ ।
પુત્રસ્યોત્પાદનાર્થાય ત્વષ્ટા ક્રોધસમાકુલઃ ॥ ૩૩॥

કૃતે હોમેઽષ્ટરાત્રં તુ સન્દીપ્તાચ્ચ વિભાવસોઃ ।
પ્રાદુર્બભૂવ તરસા પુરુષઃ પાવકોપમઃ ॥ ૩૪॥

તં દૃષ્ટ્વાગ્રે સુતં ત્વષ્ટા તેજોબલસમન્વિતમ્ ।
વેગાત્પ્રકટિતં વહ્નેર્દીપ્યમાનમિવાનલમ્ ॥ ૩૫॥

ઉવાચ વચનં ત્વષ્ટા સુતં વીક્ષ્ય પુરઃસ્થિતમ્ ।
ઇન્દ્રશત્રો વિવર્ધસ્વ પ્રતાપાત્તપસો મમ ॥ ૩૬॥

ઇત્યુક્તે વચને ત્વષ્ટ્રા ક્રોધપ્રજ્વલિતેન ચ ।
સોઽવર્ધત દિવં સ્તબ્ધ્વા વૈશ્વાનરસમદ્યુતિઃ ॥ ૩૭॥

જાતઃ સ પર્વતાકારઃ કાલમૃત્યુસમઃ સ્વરાટ્ ।
કિં કરોમીતિ તં પ્રાહ પિતરં પરમાતુરમ્ ॥ ૩૮॥

કુરુ મે નામકં નાથ કાર્યં કથય સુવ્રત ।
ચિન્તાતુરોઽસિ કસ્માત્ત્વં બ્રૂહિ મે શોકકારણમ્ ॥ ૩૯॥

નાશયામ્યદ્ય તે શોકમિતિ મે વ્રતમાહિતમ્ ।
તેન જાતેન કિં ભૂયઃ પિતા ભવતિ દુઃખિતઃ ॥ ૪૦॥

પિબામિ સાગરં સદ્યશ્ચૂર્ણયામિ ધરાધરાન્ ।
ઉદ્યન્તં વારયામ્યદ્ય તરણિં તિગ્મતેજસમ્ ॥ ૪૧॥

હન્મીન્દ્રં સસુરં સદ્યો યમં વા દેવતાન્તરમ્ ।
ક્ષિપામિ સાગરે સર્વાન્સમુત્પાટ્ય ચ મેદિનીમ્ ॥ ૪૨॥

ઇત્યાકર્ણ્ય વચસ્તસ્ય ત્વષ્ટા પુત્રસ્ય પેશલમ્ ।
પ્રત્યુવાચાતિમુદિતસ્તં સુતં પર્વતોપમમ્ ॥ ૪૩॥

વૃજિનાત્ત્રાતુમધુના યસ્માચ્છક્તોઽસિ પુત્રક ।
તસ્માદ્વૃત્ર ઇતિ ખ્યાતં તવ નામ ભવિષ્યતિ ॥ ૪૪॥

ભ્રાતા તવ મહાભાગ ત્રિશિરા નામ તાપસઃ ।
ત્રીણિ તસ્ય ચ શીર્ષાણિ હ્યભવન્વીર્યવન્તિ ચ ॥ ૪૫॥

વેદવેદાઙ્ગતત્ત્વજ્ઞઃ સર્વવિદ્યાવિશારદઃ ।
સંસ્થિતસ્તપસિ પ્રાયસ્ત્રિલોકીવિસ્મયપ્રદે ॥ ૪૬॥

શક્રેણ તુ હતઃ સોઽદ્ય વજ્રઘાતેન સામ્પ્રતમ્ ।
વિનાપરાધં સહસા છિન્નાનિ મસ્તકાનિ ચ ॥ ૪૭॥

તસ્માત્ત્વં પુરુષવ્યાઘ્ર જહિ શક્રં કૃતાગસમ્ ।
બ્રહ્મહત્યાયુતં પાપં નિસ્ત્રપં દુર્મતિં શઠમ્ ॥ ૪૮॥

ઇત્યુક્ત્વા ચ તદા ત્વષ્ટા પુત્રશોકસમાકુલઃ ।
આયુધાનિ ચ દિવ્યાનિ ચકાર વિવિધાનિ ચ ॥ ૪૯॥

દદાવસ્મૈ સહસ્રાક્ષવધાય પ્રબલાનિ ચ ।
ખડ્ગશૂલગદાશક્તિતોમરપ્રમુખાનિ વૈ ॥ ૫૦॥

શાર્ઙ્ગ ધનુસ્તથા બાણં પરિઘં પટ્ટિશં તથા ।
ચક્રં દિવ્યં સહસ્રારં સુદર્શનસમપ્રભમ્ ॥ ૫૧॥

તૂણીરૌ ચાક્ષયૌ દિવ્યૌ કવચં ચાતિસુન્દરમ્ ।
રથં મેઘપ્રતીકાશં દૃઢં ભારસહં જવમ્ ॥ ૫૨॥

યુદ્ધોપકરણં સર્વં કૃત્વા પુત્રાય પાર્થિવ ।
દત્ત્વાસૌ પ્રેરયામાસ ત્વષ્ટા ક્રોધસમન્વિતઃ ॥ ૫૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે ત્રિશિરવધાનન્તરં
વૃત્રોત્પત્તિવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૬.૨॥

## ૬.૩ તૃતીયોઽધ્યાયઃ । બ્રહ્મણઃ સમારાધનાય ત્વષ્ટ્રા વૃત્રોપદેશવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
કૃતસ્વસ્ત્યયનો વૃત્રો બ્રાહ્મણૈર્વેદપારગૈઃ ।
નિર્જગામ રથારૂઢો હન્તું શક્રં મહાબલઃ ॥ ૧॥

તદૈવ રાક્ષસાઃ ક્રૂરાઃ પુરા દેવપરાજિતાઃ ।
સમાજગ્મુશ્ચ સેવાર્થં વૃત્રં જ્ઞાત્વા મહાબલમ્ ॥ ૨॥

ઇન્દ્રદૂતાસ્તુ તં દૃષ્ટ્વા યુદ્ધાય તુ સમાગતમ્ ।
વેગાદાગત્ય વૃત્તાન્તં શશંસુસ્તસ્ય ચેષ્ટિતમ્ ॥ ૩॥

દૂતા ઊચુઃ ।
સ્વામિઞ્છીઘ્રમિહાયાતિ વૃત્રો નામ રિપુસ્તવ ।
બલવાન્સ્યન્દને રૂઢસ્ત્વષ્ટ્રા ચોત્પાદિતઃ કિલ ॥ ૪॥

અવિચારેણ નાશાર્થં તવ ક્રોધાન્વિતેન વૈ ।
પુત્રઘાતાભિતપ્તેન દુઃસહો રાક્ષસૈર્યુતઃ ॥ ૫॥

યત્નં કુરુ મહાભાગ શીઘ્રમાયાતિ સામ્પ્રતમ્ ।
મેરુમન્દરસઙ્કાશો ઘોરશબ્દોઽતિદારુણઃ ॥ ૬॥

એતસ્મિન્નન્તરે તત્ર ભીતા દેવગણા ભૃશમ્ ।
આગત્યોચુઃ સુરપતિં શ‍ૃણ્વન્તં દૂતભાષિતમ્ ॥ ૭॥

ગણાઃ ઊચુઃ ।
મઘવન્ દુર્નિમિત્તાનિ ભવન્તિ ત્રિદશાલયે ।

બહૂનિ ભયશંસીનિ પક્ષિણાં વિરુતાનિ ચ ॥ ૮॥

કાકગૃધ્રાસ્તથા શ્યેનાઃ કઙ્કાદ્યા દારુણાઃ ખગાઃ ।
રુદન્તિ વિકૃતૈઃ શબ્દૈરુત્કારૈર્ભવનોપરિ ॥ ૯॥

ચીચીકૂચીતિ નિનદાન્ કુર્વન્તિ વિહગા ભૃશમ્ ।
વાહનાનાં ચ નેત્રેભ્યો જલધારાઃ પતન્ત્યધઃ ॥ ૧૦॥

શ્રૂયતેઽતિમહાઞ્છબ્દો રુદતીનાં નિશાસુ ચ ।
રાક્ષસીનાં મહાભાગ ભવનોપરિ દારુણઃ ॥ ૧૧॥

પ્રપતન્તિ ધ્વજાસ્તૂર્ણં વિના વાતેન માનદ ।
પ્રભવન્તિ મહોત્પાતા દિવિ ભૂમ્યન્તરિક્ષજાઃ ॥ ૧૨॥

કૃષ્ણામ્બરધરા નાર્યો ભ્રમન્તિ ચ ગૃહે ગૃહે ।
યાન્તુ યાન્તુ ગૃહાત્તૂર્ણં કુર્વન્ત્યો વિકૃતાનનાઃ ॥ ૧૩॥

રાત્રૌ સ્વપ્નેષુ કાન્તાનાં સુપ્તાનાં નિજમન્દિરે ।
કેશાઁલ્લુનન્તિ રાક્ષસ્યો ભીષયન્ત્યો ભૃશાતુરાઃ ॥ ૧૪॥

એવંવિધાનિ દેવેશ ભૂકમ્પોલ્કાદયસ્તથા ।
ગોમાયવો રુદન્તિ સ્મ નિશાયાં ભવનાઙ્ગણે ॥ ૧૫॥

સરટાનાં ચ જાલાનિ પ્રભવન્તિ ગૃહે ગૃહે ।
અઙ્ગપ્રસ્ફુરણાદીનિ દુર્નિમિત્તાનિ સર્વશઃ ॥ ૧૬॥

વ્યાસ ઉવાચ ।
ઇતિ તેષાં વચઃ શ્રુત્વા ચિન્તામાપ સુરેશ્વરઃ ।
બૃહસ્પતિં સમાહૂય પપ્રચ્છ ચ મનોગતમ્ ॥ ૧૭॥

ઇન્દ્ર ઉવાચ ।
બ્રહ્મન્ કિમુત ઘોરાણિ નિમિત્તાનિ ભવન્તિ વૈ ।
વાતાશ્ચ દારુણા વાન્તિ પ્રપતન્ત્યુલકાઃ ખતઃ ॥ ૧૮॥

સર્વજ્ઞોઽસિ મહાભાગ સમર્થો વિઘ્નનાશને ।
બુદ્ધિમાઞ્છાસ્ત્રતત્ત્વજ્ઞો દેવતાનાં ગુરુસ્તથા ॥ ૧૯॥

કુરુ શાન્તિં વિધાનજ્ઞ શત્રુક્ષયવિધાયિનીમ્ ।
યથા મે ન ભવેદ્દુઃખં તથા કાર્યં વિધીયતામ્ ॥ ૨૦॥

બૃહસ્પતિરુવાચ ।

કિં કરોમિ સહસ્રાક્ષ ત્વયાદ્ય દુષ્કૃતં કૃતમ્ ।
અનાગસં મુનિં હત્વા કિં ફલં સમુપાર્જિતમ્ ॥ ૨૧॥

અત્યુગ્રં પુણ્યપાપાનાં ફલં ભવતિ સત્વરમ્ ।
વિચાર્ય ખલુ કર્તવ્યં કાર્યં તદ્ભૂતિમિચ્છતા ॥ ૨૨॥

પરોપતાપનં કર્મ ન કર્તવ્યં કદાચન ।
ન સુખં વિન્દતે પ્રાણી પરપીડાપરાયણઃ ॥ ૨૩॥

મોહાલ્લોભાદ્બ્રહ્મહત્યા કૃતા શક્ર ત્વયાધુના ।
તસ્ય પાપસ્ય સહસા ફલમેતદુપાગતમ્ ॥ ૨૪॥

અવધ્યઃ સર્વદેવાનાં જાતોઽસૌ વૃત્રસંજ્ઞકઃ ।
હન્તું ત્વાં સ સમાયાતિ દાનવૈર્બહુભિર્વૃતઃ ॥ ૨૫॥

આયુધાનિ ચ સર્વાણિ વજ્રતુલ્યાનિ વાસવ ।
ત્વષ્ટ્રા દત્તાનિ દિવ્યાનિ ગૃહીત્વા સમુપસ્થિતઃ ॥ ૨૬॥

સમાગચ્છતિ દુર્ધર્ષો રથારૂઢઃ પ્રતાપવાન્ ।
દેવેન્દ્ર પ્રલયં કુર્વન્નાસ્ય મૃત્યુર્ભવિષ્યતિ ॥ ૨૭॥

કોલાહલસ્તદા જાતસ્તથા બ્રુવતિ વાક્પતૌ ।
ગન્ધર્વાઃ કિન્નરા યક્ષા મુનયશ્ચ તપોધનાઃ ॥ ૨૮॥

સદનાનિ વિહાયૈવામરાઃ સર્વે પલાયિતાઃ ।
તદ્દૃષ્ટ્વા મહદાશ્ચર્યં શક્રશ્ચિન્તાપરાયણઃ ॥ ૨૯॥

આજ્ઞાપયામાસ તદા સેનોદ્યોગાય સેવકાન્ ।
આનયધ્વં વસૂન્ રુદ્રાનશ્વિનૌ ચ દિવાકરાન્ ॥ ૩૦॥

પૂષણં ચ ભગં વાયું કુબેરં વરુણં યમમ્ ।
વિમાનેષુ સમારુહ્ય સાયુધાઃ સુરસત્તમાઃ ॥ ૩૧॥

સમાગચ્છન્તુ તરસા શત્રુરાયાતિ સામ્પ્રતમ્ ।
ઇત્યાજ્ઞાપ્ય સુરપતિઃ સમારુહ્ય ગજોત્તમમ્ ॥ ૩૨॥

બૃહસ્પતિં પુરોધાય નિર્ગતો નિજમન્દિરાત્ ।
તથૈવ ત્રિદશાઃ સર્વે સ્વં સ્વં વાહનમાસ્થિતાઃ ॥ ૩૩॥

યુદ્ધાય કૃતસઙ્કલ્પા નિર્યયુઃ શસ્ત્રપાણયઃ ।
વૃત્રોઽથ દાનવૈર્યુક્તઃ સમ્પ્રાપ્તો માનસોત્તરમ્ ॥ ૩૪॥

પર્વતં દેવતાવાસં રમ્યં પાદપશોભિતમ્ ।
ઇન્દ્રોઽપ્યાગત્ય સઙ્ગ્રામં ચકાર માનસોત્તરે ॥ ૩૫॥

પર્વતે દેવતાયુક્તો વાચસ્પતિપુરઃસરઃ ।
તત્રાભૂદ્દારુણં યુદ્ધં વૃત્રવાસવયોસ્તદા ॥ ૩૬॥

ગદાસિપરિઘૈઃ પાશૈર્બાણૈઃ શક્તિપરશ્વધૈઃ ।
માનુષેણ પ્રમાણેન સઙ્ગ્રામઃ શરદાં શતમ્ ॥ ૩૭॥

બભૂવ ભયદો નૃણામૃષીણાં ભાવિતાત્મનામ્ ।
વરુણઃ પ્રથમં ભગ્નસ્તતો વાયુગણઃ કિલ ॥ ૩૮॥

યમો વિભાવસુઃ શક્રઃ સર્વે તે નિર્ગતા રણાત્ ।
પલાયનપરાન્ દૃષ્ટ્વા દેવાનિન્દ્રપુરોગમાન્ ॥ ૩૯॥

વૃત્રોઽપિ પિતરં પ્રાગાદાશ્રમસ્થં મુદાન્વિતમ્ ।
પ્રણમ્ય પ્રાહ ત્વષ્ટારં પિતઃ કાર્યં મયા કૃતમ્ ॥ ૪૦॥

દેવા વિનિર્જિતાઃ સર્વે સેન્દ્રાઃ સમરસંસ્થિતાઃ ।
વિદ્રુતાસ્તે ગતાઃ સ્થાનં યથા સિંહાન્મૃગા ગજાઃ ॥ ૪૧॥

ઇન્દ્રઃ પદાતિરગમન્મયાનીતો ગજોત્તમઃ ।
ઐરાવતોઽયં ભગવન્ ગૃહાણ દ્વિરદોત્તમમ્ ॥ ૪૨॥

ન હતાસ્તે મયા યસ્માદયુક્તં ભીતમારણમ્ ।
આજ્ઞાપય પુનસ્તાત કિં કરોમિ તવેપ્સિતમ્ ॥ ૪૩॥

નિર્જરા નિર્ગતાઃ સર્વે ભયભીતા શ્રમાતુરાઃ ।
ઇન્દ્રોઽપ્યૈરાવતં ત્યક્ત્વા ભયભીતઃ પલાયિતઃ ॥ ૪૪॥

વ્યાસ ઉવાચ ।
ઇતિ પુત્રવચઃ શ્રુત્વા ત્વષ્ટા પ્રાહ મુદાન્વિતઃ ।
પુત્રવાનદ્ય જાતોઽસ્મિ સફલં મમ જીવિતમ્ ॥ ૪૫॥

ત્વયાહં પાવિતઃ પુત્ર ગતો મે માનસો જ્વરઃ ।
નિશ્ચલં મે મનો જાતં દૃષ્ટ્વા વીર્યં તવાદ્ભુતમ્ ॥ ૪૬॥

શૃણુ વક્ષ્યામ્યહં પુત્ર હિતં તેઽદ્ય નિશામય ।
તપઃ કુરુ મહાભાગ સાવધાનઃ સ્થિરાસનઃ ॥ ૪૭॥

વિશ્વાસો નૈવ કર્તવ્યઃ કેષાઞ્ચિત્પાકશાસનઃ ।
શત્રુસ્તે છલકર્તાસ્તિ નાનાભેદવિશારદઃ ॥ ૪૮॥

તપસા પ્રાપ્યતે લક્ષ્મીસ્તપસા રાજ્યમુત્તમમ્ ।
તપસા બલવૃદ્ધિઃ સ્યાત્સઙ્ગ્રામે વિજયસ્તથા ॥ ૪૯॥

આરાધ્ય દ્રુહિણં દેવં લબ્ધ્વા વરમનુત્તમમ્ ।
જહિ શક્રં દુરાચારં બ્રહ્મહત્યાસમાવૃતમ્ ॥ ૫૦॥

સાવધાનઃ સ્થિરો ભૂત્વા દાતારં ભજ શઙ્કરમ્ ।
વાઞ્છિતં સ વરં દદ્યાત્સન્તુષ્ટશ્ચતુરાનનઃ ॥ ૫૧॥

તોષયિત્વા વિશ્વયોનિં બ્રહ્માણમમિતૌજસમ્ ।
અવિનાશિત્વમાસાદ્ય જહિ શક્રં કૃતાગસમ્ ॥ ૫૨॥

વૈરં મનસિ મે પુત્ર વર્તતે સુતઘાતજમ્ ।
ન શાન્તિમનુગચ્છામિ ન સ્વપામિ સુખેન હ ॥ ૫૩॥

તાપસો મે હતઃ પુત્રો નિરાગાઃ પાપ્મના યતઃ ।
ન વિન્દામિ સુખં વૃત્ર ત્વં મામુદ્ધર દુઃખિતમ્ ॥ ૫૪॥

વ્યાસ ઉવાચ ।
તદાકર્ણ્ય પિતુર્વાક્યં વૃત્રઃ ક્રોધયુતસ્તદા ।
આજ્ઞામાદાય ચ પિતુર્જગામ તપસે મુદા ॥ ૫૫॥

ગન્ધમાદનમાસાદ્ય પુણ્યાં દેવધુનીં શુભામ્ ।
સ્નાત્વા કુશાસનં કૃત્વા સંસ્થિતશ્ચ સ્થિરાસનઃ ॥ ૫૬॥

ત્યક્ત્વાન્નં વારિપાનં ચ યોગાભ્યાસપરાયણઃ ।
ધ્યાયન્વિશ્વસૃજં ચિત્તે સોપવિષ્ટઃ સ્થિરાસને ॥ ૫૭॥

મઘવા તં તપસ્યન્તં જ્ઞાત્વા ચિન્તાતુરો હ્યભૂત્ ।
ગન્ધર્વાન્પ્રેષયામાસ વિઘ્નાર્થં પાકશાસનઃ ॥ ૫૮॥

યક્ષાંશ્ચ પન્નગાન્સર્પાન્કિન્નરાનમિતૌજસઃ ।
વિદ્યાધરાનપ્સરસો દેવદૂતાનનેકશઃ ॥ ૫૯॥

ઉપાયાસ્તૈઃ કૃતાઃ સમ્યક્ તપોવિઘ્નાય માયિભિઃ ।
ન ચચાલ તતો ધ્યાનાત્ત્વાષ્ટ્રઃ પરમતાપસઃ ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં

સંહિતાયાં ષષ્ઠસ્કન્ધે બ્રહ્મણઃ સમારાધનાય
ત્વષ્ટ્રા વૃત્રોપદેશવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૬.૩॥

## ૬.૪ ચતુર્થોઽધ્યાયઃ । બ્રહ્મનેતૃત્વે સેન્દ્રૈઃ સુરૈર્વિષ્ણોઃ શરણગમનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
નિર્ગતાસ્તે પરાવૃત્તાસ્તપોવિઘ્નકરાઃ સુરાઃ ।
નિરાશાઃ કાર્યસંસિદ્ધ્યૈ તં દૃષ્ટ્વા દૃઢચેતસમ્ ॥ ૧॥

જાતે વર્ષશતે પૂર્ણે બ્રહ્મા લોકપિતામહઃ ।
તત્રાજગામ તરસા હંસારૂઢશ્ચતુર્મુખઃ ॥ ૨॥

આગત્ય તમુવાચેદં ત્વષ્ટૃપુત્ર સુખી ભવ ।
ત્યક્ત્વા ધ્યાનં વરં બ્રૂહિ દદામિ તવ વાઞ્છિતમ્ ॥ ૩॥

તપસા તેઽદ્ય તુષ્ટોઽસ્મિ ત્વાં દૃષ્ટ્વા ચાતિકર્શિતમ્ ।
વરં વરય ભદ્રં તે મનોઽભિલષિતં તવ ॥ ૪॥

વ્યાસ ઉવાચ ।
વૃત્રસ્તદાતિવિશદાં પુરતો નિશમ્ય
વાચં સુધાસમરસાં જગદેકકર્તુઃ ।
સન્ત્યજ્ય યોગકલનાં સહસોદતિષ્ઠ-
ત્સઞ્જાતહર્ષનયનાશ્રુકલાકલાપઃ ॥ ૫॥

પાદૌ પ્રણમ્ય શિરસા પ્રણયાદ્વિધાતુ-
ર્બદ્ધાઞ્જલિઃ પુરત એવ સમાસસાદ ।
પ્રોવાચ તં સુવરદં તપસા પ્રસન્નં
પ્રેમ્ણાતિગદ્ગદગિરા વિનયેન નમ્રઃ ॥ ૬॥

પ્રાપ્તં મયા સકલદેવપદં પ્રભોઽદ્ય
યદ્દર્શનં તવ સુદુર્લભમાશુ જાતમ્ ।
વાઞ્છાસ્તિ નાથ મનસિ પ્રવણે દુરાપા
તાં પ્રબ્રવીમિ કમલાસન વેત્સિ ભાવમ્ ॥ ૭॥

મૃત્યુશ્ચ મા ભવતુ મે કિલ લોહકાષ્ઠ-
શુષ્કાર્દ્રવંશનિચયૈરપરૈશ્ચ શસ્ત્રૈઃ ।
વૃદ્ધિં પ્રયાતુ મમ વીર્યમતીવ યુદ્ધે

યસ્માદ્ભવામિ સબલૈરમરૈરજેયઃ ॥ ૮॥

વ્યાસ ઉવાચ ।
ઇત્થં સમ્પ્રાર્થિતો બ્રહ્મા તમાહ પ્રહસન્નિવ ।
ઉત્તિષ્ઠ ગચ્છ ભદ્રં તે વાઞ્છિતં સફલં સદા ॥ ૯॥

ન શુષ્કેણ ન ચાર્દ્રેણ ન પાષાણેન દારુણા ।
ભવિષ્યતિ ચ તે મૃત્યુરિતિ સત્યં બ્રવીમ્યહમ્ ॥ ૧૦॥

ઇતિ દત્ત્વા વરં બ્રહ્મા જગામ ભુવનં પરમ્ ।
વૃત્રસ્તુ તં વરં લબ્ધ્વા મુદિતઃ સ્વગૃહં યયૌ ॥ ૧૧॥

શશંસ પિતુરગ્રે તદ્વરદાનં મહામતિઃ ।
ત્વષ્ટા તુ મુદિતઃ પ્રાપ્તં પુત્રં પ્રાપ્તવરં તદા ॥ ૧૨॥

સ્વસ્તિ તેઽસ્તુ મહાભાગ જહિ શક્રં રિપું મમ ।
હત્વાગચ્છ ત્રિશિરસો હન્તારં પાપસંયુતમ્ ॥ ૧૩॥

ભવ ત્વં ત્રિદશાધીશઃ સમ્પ્રાપ્ય વિજયં રણે ।
મમાધિં છિન્ધિ વિપુલં પુત્રનાશસમુદ્ભવમ્ ॥ ૧૪॥

જીવતો વાક્યકરણાત્ક્ષયાહે ભૂરિભોજનાત્ ।
ગયાયાં પિણ્ડદાનાચ્ચ ત્રિભિઃ પુત્રસ્ય પુત્રતા ॥ ૧૫॥

તસ્માત્પુત્ર મમાત્યર્થં દુઃખં નાશિતુમર્હસિ ।
ત્રિશિરા મમ ચિત્તાત્તુ નાપસર્પતિ કર્હિચિત્ ॥ ૧૬॥

સુશીલઃ સત્યવાદી ચ તાપસો વેદવિત્તમઃ ।
અપરાધં વિના તેન નિહતઃ પાપબુદ્ધિના ॥ ૧૭॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા વૃત્રઃ પરમદુર્જયઃ ।
રથમારુહ્ય તરસા નિર્જગામ પિતુર્ગૃહાત્ ॥ ૧૮॥

રણદુન્દુભિનિર્ઘોષં શઙ્ખનાદં મહાબલમ્ ।
કારયિત્વા પ્રયાણં સ ચકાર મદગર્વિતઃ ॥ ૧૯॥

નિર્યયૌ નયસંયુક્તઃ સેવકાનિતિ સંવદન્ ।
હત્વા શક્રં ગ્રહીષ્યામિ સુરરાજ્યમકણ્ટકમ્ ॥ ૨૦॥

ઇત્યુક્ત્વા નિર્જગામાશુ સ્વસૈન્યપરિવારિતઃ ।

મહતા સૈન્યનાદેન ભીષયન્નમરાવતીમ્ ॥ ૨૧॥

તમાગચ્છન્તમાજ્ઞાય તુરાષાડપિ સત્વરઃ ।
સેનોદ્યોગં ભયત્રસ્તઃ કારયામાસ ભારત ॥ ૨૨॥

સર્વાનાહૂય તરસા લોકપાલાનરિન્દમઃ ।
યુદ્ધાર્થં પ્રેરયન્સર્વાન્વ્યરોચત મહાદ્યુતિઃ ॥ ૨૩॥

ગૃધ્રન્વ્યૂહં તતઃ કૃત્વા સંસ્થિતઃ પાકશાસનઃ ।
તત્રાજગામ વેગાત્તુ વૃત્રઃ પરબલાર્દનઃ ॥ ૨૪॥

દેવદાનવયોસ્તાવત્સઙ્ગ્રામસ્તુમુલોઽભવત્ ।
વૃત્રવાસવયોઃ સઙ્ખ્યે મનસા વિજયૈષિણોઃ ॥ ૨૫॥

એવં પરસ્પરં યુદ્ધે સન્દીપ્તે ભયદે ભૃશમ્ ।
આકૂતં દેવતાઃ પ્રાપુર્દૈત્યાશ્ચ પરમાં મુદમ્ ॥ ૨૬॥

તોમરૈર્ભિન્દિપાલૈશ્ચ ખડ્ગૈઃ પરશુપટ્ટિશૈઃ ।
જઘ્નુઃ પરસ્પરં દેવદૈત્યા સ્વસ્વવરાયુધૈઃ ॥ ૨૭॥

એવં યુદ્ધે વર્તમાને દારુણે લોમહર્ષણે ।
શક્રં જગ્રાહ સહસા વૃત્રઃ ક્રોધસમન્વિતઃ ॥ ૨૮॥

અપાવૃત્ય મુખે ક્ષિપ્ત્વા સ્થિતો વૃત્રઃ શતક્રતુમ્ ।
મુદિતોઽભૂન્મહારાજ પૂર્વવૈરમનુસ્મરન્ ॥ ૨૯॥

શક્રે ગ્રસ્તેઽથ વૃત્રેણ સમ્ભ્રાન્તા નિર્જરાસ્તદા ।
ચુક્રુશઃ પરમાર્તાસ્તે હા શક્રેતિ મુહુર્મુહુઃ ॥ ૩૦॥

અપાવૃતં મુખે શક્રં જ્ઞાત્વા સર્વે દિવૌકસઃ ।
બૃહસ્પતિં પ્રણમ્યોચુર્દીના વ્યથિતચેતસઃ ॥ ૩૧॥

કિં કર્તવ્યં દ્વિજશ્રેષ્ઠ ત્વમસ્માકં ગુરુઃ પરઃ ।
શક્રો ગ્રસ્તસ્તુ વૃત્રેણ રક્ષિતો દેવતાન્તરૈઃ ॥ ૩૨॥

વિના શક્રેણ કિં કુર્મઃ સર્વે હીનપરાક્રમાઃ ।
અભિચારં કુરુ વિભો સત્વરઃ શક્રમુક્તયે ॥ ૩૩॥

બૃહસ્પતિરુવાચ ।
કિં કર્તવ્યં સુરાઃ ક્ષિપ્તો મુખમધ્યેઽસ્તિ વાસવઃ ।
વૃત્રેણોત્સાદિતો જીવન્નસ્તિ કોષ્ઠાન્તરે રિપોઃ ॥ ૩૪॥

વ્યાસ ઉવાચ ।
દેવાશ્ચિન્તાતુરાઃ સર્વે તુરાસાહં તથાકૃતમ્ ।
દૃષ્ટ્વા વિમૃશ્ય તરસા ચક્રુર્યત્નં વિમુક્તયે ॥ ૩૫॥

અસૃજન્ત મહાસત્ત્વાં જૃમ્ભિકાં રિપુનાશિનીમ્ ।
તતો વિજૃમ્ભમાણઃ સ વ્યાવૃતાસ્યો બભૂવ હ ॥ ૩૬॥

વિજૃમ્ભમાણસ્ય તતો વૃત્રસ્યાસ્યાદવાપતત્ ।
સ્વાન્યઙ્ગાન્યપિ સઙ્ક્ષિપ્ય નિષ્ક્રાન્તો બલસૂદનઃ ॥ ૩૭॥

તતઃ પ્રભૃતિ લોકેષુ જૃમ્ભિકા પ્રાણિસંસ્થિતા ।
જહૃષુશ્ચ સુરાઃ સર્વે શક્રં દૃષ્ટ્વા વિનિર્ગતમ્ ॥ ૩૮॥

તતઃ પ્રવવૃતે યુદ્ધં તયોર્લોકભયપ્રદમ્ ।
વર્ષાણામયુતં યાવદ્દારુણં લોમહર્ષણમ્ ॥ ૩૯॥

એકતશ્ચ સુરાઃ સર્વે યુદ્ધાય સમુપસ્થિતાઃ ।
એકતો બલવાંસ્ત્વાષ્ટ્રઃ સઙ્ગ્રામે સમવર્તત ॥ ૪૦॥

યદા વ્યવર્ધત રણે વૃત્રો વરમદાવૃતઃ ।
પરાજિતસ્તદા શક્રસ્તેજસા તસ્ય ધર્ષિતઃ ॥ ૪૧॥

વિવ્યથે મઘવા યુદ્ધે તતઃ પ્રાપ્ય પરાજયમ્ ।
વિષાદમગમન્દેવા દૃષ્ટ્વા શક્રં પરાજિતમ્ ॥ ૪૨॥

જગ્મુસ્ત્યક્ત્વા રણં સર્વે દેવા ઇન્દ્રપુરોગમાઃ ।
ગૃહીતં દેવસદનં વૃત્રેણાગત્ય રંહસા ॥ ૪૩॥

દેવોદ્યાનાનિસર્વાણિ ભુઙ્ક્તેઽસૌ દાનવો બલાત્ ।
ઐરાવતોઽપિ દૈત્યેન ગૃહીતોઽસૌ ગજોત્તમઃ ॥ ૪૪॥

વિમાનાનિ ચ સર્વાણિ ગૃહીતાનિ વિશામ્પતે ।
ઉચ્ચૈઃશ્રવા હયવરો જાતસ્તસ્ય વશે તદા ॥ ૪૫॥

કામધેનુઃ પારિજાતો ગણશ્ચાપ્સરસાં તથા ।
ગૃહીતં રત્નમાત્રં તુ તેન ત્વષ્ટૃસુતેન હ ॥ ૪૬॥

સ્થાનભ્રષ્ટાઃ સુરાઃ સર્વે ગિરિદુર્ગેષુ સંસ્થિતાઃ ।
દુઃખમાપુઃ પરિભ્રષ્ટા યજ્ઞભાગાત્સુરાલયાત્ ॥ ૪૭॥

વૃત્રઃ સુરપદં પ્રાપ્ય બભૂવ મદગર્વિતઃ ।
ત્વષ્ટાતીવ સુખં પ્રાપ્ય મુમોદ સુતસંયુતઃ ॥ ૪૮॥

અમન્ત્રયન્હિતં દેવા મુનિભિઃ સહ ભારત ।
કિં કર્તવ્યમિતિ પ્રાપ્તે વિચિન્ત્ય ભયમોહિતાઃ ॥ ૪૯॥

જગ્મુઃ કૈલાસમચલં સુરાઃ શક્રસમન્વિતાઃ ।
મહાદેવં પ્રણમ્યોચુઃ પ્રહ્વાઃ પ્રાઞ્જલયો ભૃશમ્ ॥ ૫૦॥

દેવદેવ મહાદેવ કૃપાસિન્ધો મહેશ્વર ।
રક્ષાસ્માન્ભયભીતાંસ્તુ વૃત્રેણાતિપરાજિતાન્ ॥ ૫૧॥

ગૃહીતં દેવસદનં તેન દેવ બલીયસા ।
કિં કર્તવ્યમતઃ શમ્ભો બ્રૂહિ સત્યં શિવાદ્ય નઃ ॥ ૫૨॥

કિં કુર્મઃ ક્વ ચ ગચ્છામઃ સ્થાનભ્રષ્ટા મહેશ્વર ।
દુઃખસ્ય નાધિગચ્છામો વિનાશોપાયમીશ્વર ॥ ૫૩॥

સાહાય્યં કુરુ ભૂતેશ વ્યથિતાઃ સ્મ કૃપાનિધે ।
વૃત્રં જહિ મદોત્સિક્તં વરદાનબલાદ્વિભો ॥ ૫૪॥

શિવ ઉવાચ ।
બ્રહ્માણં પુરતઃ કૃત્વા વયં સર્વે હરેઃ ક્ષયમ્ ।
ગત્વા સમેત્ય તં વિષ્ણું ચિન્તયામો વધોદ્યમમ્ ॥ ૫૫॥

સ શક્તશ્ચ છલજ્ઞશ્ચ બલવાન્બુદ્ધિમત્તરઃ ।
શરણ્યશ્ચ દયાબ્ધિશ્ચ વાસુદેવો જનાર્દનઃ ॥ ૫૬॥

વિના તં દેવદેવેશં નાર્થસિદ્ધિર્ભવિષ્યતિ ।
તસ્માત્તત્ર ચ ગન્તવ્યં સર્વકાર્યાર્થસિદ્ધયે ॥ ૫૭॥

વ્યાસ ઉવાચ ।
ઇતિ સઞ્ચિન્ત્ય તે સર્વે બ્રહ્મા શક્રઃ સશઙ્કરઃ ।
જગ્મુર્વિષ્ણોઃ ક્ષયં દેવાઃ શરણ્યં ભક્તવત્સલમ્ ॥ ૫૮॥

ગત્વા વિષ્ણુપદં દેવાસ્તુષ્ટુવુઃ પરમેશ્વરમ્ ।
હરિં પુરુષસૂક્તેન વેદોક્તેન જગદ્ગુરુમ્ ॥ ૫૯॥

પ્રત્યક્ષોઽભૂજ્જગન્નાથસ્તેષાં સ કમલાપતિઃ ।
સમ્માન્ય ચ સુરાન્સર્વાનિત્યુવાચ પુરઃસ્થિતઃ ॥ ૬૦॥

કિમાગતાઃ સ્મ લોકેશા હરબ્રહ્મસમન્વિતાઃ ।
કારણં કથયધ્વં વઃ સર્વેષાં સુરસત્તમાઃ ॥ ૬૧॥

વ્યાસ ઉવાચ ।
ઇતિ શ્રુત્વા હરેર્વાક્યં નોચુર્દેવા રમાપતિમ્ ।
ચિન્તાવિષ્ટાઃ સ્થિતાઃ પ્રાયઃ સર્વેપ્રાઞ્જલયસ્તથા ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે બ્રહ્મનેતૃત્વે સેન્દ્રૈઃ સુરૈર્વિષ્ણોઃ
શરણગમનવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૬.૪॥

## ૬.૫ પઞ્ચમોઽધ્યાયઃ । દેવીસમારાધનાય દેવકૃતસ્તુતિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તથા ચિન્તાતુરાન્વીક્ષ્ય સર્વાન્મર્વાર્થતત્ત્વવિત્ ।
પ્રાહ પ્રેમભરોદ્ભ્રાન્તાન્માધવો મેદિનીપતે ॥ ૧॥

વિષ્ણુરુવાચ ।
કિં મૌનમાશ્રિતા યૂયં બ્રુવન્તુ કારણં સુરાઃ ।
સદસદ્વાપિ યચ્છ્રુત્વા યતિષ્યે તન્નિવારણે ॥ ૨॥

દેવા ઊચુઃ ।
કિમજ્ઞાતં તવ વિભો ત્રિષુ લોકેષુ વર્તતે ।
સર્વં વેદ ભવાન્કાર્યં કિં પૃચ્છસિ પુનઃ પુનઃ ॥ ૩॥

ત્વયા પૂર્વં બલિર્બદ્ધઃ શક્રો દેવાધિપઃ કૃતઃ ।
વામનં વપુરાસ્થાય ક્રાન્તં ત્રિભુવનં પદૈઃ ॥ ૪॥

અમૃતં ત્વાહૃતં વિષ્ણો દૈત્યાશ્ચ વિનિપાતિતાઃ ।
ત્વં પ્રભુઃ સર્વદેવાનાં સર્વાપદ્વિનિવારણે ॥ ૫॥

વિષ્ણુરુવાચ ।
ન ભેતવ્યં સુરવરા વેદ્મ્યુપાયં સુસમ્મતમ્ ।
તદ્વધાય પ્રવક્ષ્યામિ યેન સૌખ્યં ભવિષ્યતિ ॥ ૬॥

અવશ્યં કરણીયં મે ભવતાં હિતમાત્મના ।
બુદ્ધ્યા બલેન ચાર્થેન યેન કેનચ્છલેન વા ॥ ૭॥

ઉપાયાઃ ખલુ ચત્વારઃ કથિતાસ્તત્ત્વદર્શિભિઃ ।
સામાદયઃ સુહૃત્સ્વેવ દુર્હૃદેષુ વિશેષતઃ ॥ ૮॥

બ્રહ્મણાસ્ય વરો દત્તસ્તપસાઽઽરાધિતેન ચ ।
દુર્જયત્વં ચ સમ્પ્રાપ્તં વરદાનપ્રભાવતઃ ॥ ૯॥

અજેયઃ સર્વભૂતાનાં ત્વષ્ટ્રા સમુપપાદિતઃ ।
તતો બલેન વૃદ્ધિં સ પ્રાપ્તઃ પરપુરઞ્જયઃ ॥ ૧૦॥

દુઃસાધ્યોઽસૌ સુરાઃ શત્રુર્વિના સામપ્રતારણમ્ ।
પ્રલોભ્ય વશમાનેયો હન્તવ્યસ્તુ તતઃ પરમ્ ॥ ૧૧॥

ગચ્છધ્વં સર્વગન્ધર્વા યત્રાસ્તિ બલવત્તરઃ ।
સામ તસ્ય પ્રયુઞ્જધ્વં તત એનં વિજેષ્યથ ॥ ૧૨॥

સઙ્ગમ્ય શપથાત્કૃત્વા વિશ્વાસ્ય સમયેન હિ ।
મિત્રત્વં ચ સમાધાય હન્તવ્યઃ પ્રબલો રિપુઃ ॥ ૧૩॥

અદૃશ્યઃ સમ્પ્રવેક્ષ્યામિ વજ્રમસ્ય વરાયુધમ્ ।
સાહાય્યં ચ કરિષ્યામિ શક્રસ્યાહં સુરોત્તમાઃ ॥ ૧૪॥

સમયં ચ પ્રતીક્ષધ્વં સર્વથૈવાયુષઃ ક્ષયે ।
મરણં વિબુધાસ્તસ્ય નાન્યથા સમ્ભવિષ્યતિ ॥ ૧૫॥

ગચ્છધ્વમૃષિભિઃ સાર્ધં ગન્ધર્વાઃ કપટાવૃતાઃ ।
ઇન્દ્રેણ સહ મિત્રત્વં કુરુધ્વં વાક્યદાનતઃ ॥ ૧૬॥

યથા સ યાતિ વિશ્વાસં તથા કાર્યં પ્રતારણમ્ ।
ગુપ્તોઽહં સમ્પ્રવેક્ષ્યામિ પવિં સચ્છાદિતં દૃઢમ્ ॥ ૧૭॥

વિશ્વસ્તં મઘવા શત્રું હનિષ્યતિ ન ચાન્યથા ।
વિશ્વાસસ્ય કૃતે પાપં કૃત્વા શક્રસ્તુ પૃષ્ઠતઃ ॥ ૧૮॥

મત્સહાયોઽથ વજ્રેણ શાતયિષ્યતિ પાપિનમ્ ।
ન દોષોઽત્ર શઠે શત્રૌ શાઠ્યમેવ પ્રકુર્વતઃ ॥ ૧૯॥

નાન્યથા બલવાન્વધ્યઃ શૂરધર્મેણ જાયતે ।
વામનં રૂપમાધાય મયાયં વઞ્ચિતો બલિઃ ॥ ૨૦॥

કૃત્વા ચ મોહિનીવેષં દૈત્યાઃ સર્વેઽપિવઞ્ચિતાઃ ।
ભવન્તઃ સહિતાઃ સર્વે દેવીં ભગવતીં શિવામ્ ॥ ૨૧॥

ગચ્છધ્વં શરણં ભાવૈઃ સ્તોત્રમન્ત્રૈઃ સુરોત્તમાઃ ।
સાહાય્યં સા યોગમાયા ભવતાં સંવિધાસ્યતિ ॥ ૨૨॥

વન્દામહે સદા દેવીં સાત્ત્વિકીં પ્રકૃતિં પરામ્ ।
સિદ્ધિદાં કામદાં કામાં દુરાપામકૃતાત્મભિઃ ॥ ૨૩॥

ઇન્દ્રોઽપિ તાં સમારાધ્ય હનિષ્યતિ રિપું રણે ।
મોહિની સા મહામાયા મોહયિષ્યતિ દાનવમ્ ॥ ૨૪॥

મોહિતો માયયા વૃત્રઃ સુખસાધ્યો ભવિષ્યતિ ।
પ્રસન્નાયાં પરામ્બાયાં સર્વં સાધ્યં ભવિષ્યતિ ॥ ૨૫॥

નોચેન્મનોરથાવાપ્તિર્ન કસ્યાપિ ભવિષ્યતિ ।
અન્તર્યામિસ્વરૂપા સા સર્વકારણકારણા ॥ ૨૬॥

તસ્માત્તાં વિશ્વજનનીં પ્રકૃતિં પરમાદૃતાઃ ।
ભજધ્વં સાત્ત્વિકૈર્ભાવૈઃ શત્રુનાશાય સત્તમાઃ ॥ ૨૭॥

પુરા મયાપિ સઙ્ગ્રામં કૃત્વા પરમદારુણમ્ ।
પઞ્ચવર્ષસહસ્રાણિ નિહતૌ મધુકૈટભૌ ॥ ૨૮॥

સ્તુતા મયા તદાત્યર્થં પ્રસન્ના પ્રકૃતિઃ પરા ।
મોહિતૌ તૌ તદા દૈત્યૌ છલેન ચ મયા હતૌ ॥ ૨૯॥

વિપ્રલબ્ધૌ મહાબાહૂ દાનવૌ મદગર્વિતૌ ।
તથા કુરુધ્વં પ્રકૃતેર્ભજનં ભાવસંયુતાઃ ॥ ૩૦॥

સર્વથા કાર્યસિદ્ધિં સા કરિષ્યતિ સુરોત્તમાઃ ।
એવં તે દત્તમતયો વિષ્ણુના પ્રભવિષ્ણુના ॥ ૩૧॥

જગ્મુસ્તે મેરુશિખરં મન્દારદ્રુમમણ્ડિતમ્ ।
એકાન્તે સંસ્થિતા દેવાઃ કૃત્વા ધ્યાનં જપં તપઃ ॥ ૩૨॥

તુષ્ટુવુર્જગતાં ધાત્રીં સૃષ્ટિસંહારકારિણીમ્ ।
ભક્તકામદુઘામમ્બાં સંસારક્લેશનાશિનીમ્ ॥ ૩૩॥

દેવા ઊચુઃ ।
દેવિ પ્રસીદ પરિપાહિ સુરાન્પ્રતપ્તાન્
વૃત્રાસુરેણ સમરે પરિપીડિતાંશ્ચ ।

દીનાર્તિનાશનપરે પરમાર્થતત્ત્વે
પ્રાપ્તાંસ્ત્વદઙ્ઘ્રિકમલં શરણં સદૈવ ॥ ૩૪॥

ત્વં સર્વવિશ્વજનની પરિપાલયાસ્માન્
પુત્રાનિવાતિપતિતાન્ રિપુસઙ્કટેઽસ્મિન્ ।
માતર્ન તેઽસ્ત્યવિદિતં ભુવનત્રયેઽપિ
કસ્માદુપેક્ષસિ સુરાનસુરપ્રતપ્તાન્ ॥ ૩૫॥

ત્રૈલોક્યમેતદખિલં વિહિતં ત્વયૈવ
બ્રહ્મા હરિઃ પશુપતિસ્તવ વાસનોત્થાઃ ।
કુર્વન્તિ કાર્યમખિલં સ્વવશા ન તે તે
ભ્રૂભઙ્ગચાલનવશાદ્વિહરન્તિ કામમ્ ॥ ૩૬॥

માતા સુતાન્પરિભવાત્પરિપાતિ દીનાન્
રીતિસ્ત્વયૈવ રચિતા પ્રકટાપરાધાન્ ।
કસ્માન્ન પાલયસિ દેવિ વિનાપરાધા-
નસ્માંસ્ત્વદઙ્ઘ્રિશરણાન્કરુણારસાબ્ધે ॥ ૩૭॥

નૂનં મદઙ્ઘ્રિભજનાપ્તપદાઃ કિલૈતે
ભક્તિં વિહાય વિભવે સુખભોગલુબ્ધાઃ ।
નેમે કટાક્ષવિષયા ઇતિ ચેન્ન ચૈષા
રીતિઃ સુતે જનનકર્તરિ ચાપિ દૃષ્ટા ॥ ૩૮॥

દોષો ન નોઽત્ર જનનિ પ્રતિભાતિ ચિત્તે
યત્તે વિહાય ભજનં વિભવે નિમગ્નાઃ ।
મોહસ્ત્વયા વિરચિતઃ પ્રભવત્યસૌ ન-
સ્તસ્માત્સ્વભાવકરુણે દયસે કથં ન ॥ ૩૯॥

પૂર્વં ત્વયા જનનિ દૈત્યપતિર્બલિષ્ઠો
વ્યાપાદિતો મહિષરૂપધરઃ કિલાજૌ ।
અસ્મત્કૃતે સકલલોકભયાવહોઽસૌ
વૃત્રં કથં ન ભયદં વિધુનોષિ માતઃ ॥ ૪૦॥

શુમ્ભસ્તથાતિબલવાનનુજો નિશુમ્ભ-
સ્તૌ ભ્રાતરૌ તદનુગા નિહતા હતૌ ચ ।
વૃત્રં તથા જહિ ખલં પ્રબલં દયાર્દ્રે
મત્તં વિમોહય તથા ન ભવેદ્યથાસૌ ॥ ૪૧॥

ત્વં પાલયાદ્ય વિબુધાનસુરેણ માતઃ
સન્તાપિતાનતિતરાં ભયવિહ્વલાંશ્ચ ।
નાન્યોઽસ્તિ કોઽપિ ભુવનેષુ સુરાર્તિહન્તા
યઃ ક્લેશજાલમખિલં નિદહેત્સ્વશક્ત્યા ॥ ૪૨॥

વૃત્રે દયા તવ યદિ પ્રથિતા તથાપિ
જહ્યેનમાશુ જનદુઃખકરં ખલં ચ ।
પાપાત્સમુદ્ધર ભવાનિ શરૈઃ પુનાના
નોચેત્પ્રયાસ્યતિ તમો નનુ દુષ્ટબુદ્ધિઃ ॥ ૪૩॥

તે પ્રાપિતાઃ સુરવનં વિબુધારયો યે
હત્વા રણેઽપિ વિશિખૈઃ કિલ પાવિતાસ્તે ।
ત્રાતા ન કિં નિરયપાતભયાદ્દયાર્દ્રે
યચ્છત્રવોઽપિ ન હિ કિં વિનિહંસિ વૃત્રમ્ ॥ ૪૪॥

જાનીમહે રિપુરસૌ તવ સેવકો ન
પ્રાયેણ પીડયતિ નઃ કિલ પાપબુદ્ધિઃ ।
યસ્તાવકસ્ત્વિહ ભવેદમરાનસૌ કિં
ત્વત્પાદપઙ્કજરતાન્નનુ પીડયેદ્વા ॥ ૪૫॥

કુર્મઃ કથં જનનિ પૂજનમદ્ય તેઽમ્બ
પુષ્પાદિકં તવ વિનિર્મિતમેવ યસ્માત્ ।
મન્ત્રા વયં ચ સકલં પરશક્તિરૂપં
તસ્માદ્ભવાનિ ચરણે પ્રણતાઃ સ્મ નૂનમ્ ॥ ૪૬॥

ધન્યાસ્ત એવ મનુજા હિ ભજન્તિ ભક્ત્યા
પાદામ્બુજં તવ ભવાબ્ધિજલેષુ પોતમ્ ।
યં યોગિનોઽપિ મનસા સતતં સ્મરન્તિ
મોક્ષાર્થિનો વિગતરાગવિકારમોહાઃ ॥ ૪૭॥

યે યાજ્ઞિકાઃ સકલવેદવિદોઽપિ નૂનં
ત્વાં સંસ્મરન્તિ સતતં કિલ હોમકાલે ।
સ્વાહાં તુ તૃપ્તિજનનીમમરેશ્વરાણાં
ભૂયઃ સ્વધાં પિતૃગણસ્ય ચ તૃપ્તિહેતુમ્ ॥ ૪૮॥

મેધાસિ કાન્તિરસિ શાન્તિરપિ પ્રસિદ્ધા

બુદ્ધિસ્ત્વમેવ વિશદાર્થકરી નરાણામ્ ।
સર્વં ત્વમેવ વિભવં ભુવનત્રયેઽસ્મિ-
ન્કૃત્વા દદાસિ ભજતાં કૃપયા સદૈવ ॥ ૪૯॥

વ્યાસ ઉવાચ ।
એવં સ્તુતા સુરૈર્દેવી પ્રત્યક્ષા સાભવત્તદા ।
ચારુરૂપધરા તન્વી સર્વાભરણભૂષિતા ॥ ૫૦॥

પાશાઙ્કુશવરાભીતિલસદ્બાહુચતુષ્ટયા ।
રણત્કિઙ્કિણિકાજાલરસનાબદ્ધસત્કટિઃ ॥ ૫૧॥

કલકણ્ઠીરવા કાન્તા ક્વણત્કઙ્કણનૂપુરા ।
ચન્દ્રખણ્ડસમાબદ્ધરત્નમૌલિવિરાજિતા ॥ ૫૨॥

મન્દસ્મિતારવિન્દાસ્યા નેત્રત્રયવિભૂષિતા ।
પારિજાતપ્રસૂનાચ્છનાલવર્ણસમપ્રભા ॥ ૫૩॥

રક્તામ્બરપરીધાના રક્તચન્દનચર્ચિતા ।
પ્રસાદસુમુખી દેવી કરુણારસસાગરા ॥ ૫૪॥

સર્વશૃઙ્ગારવેષાઢ્યા સર્વદ્વૈતારણિઃ પરા ।
સર્વજ્ઞા સર્વકર્ત્રી ચ સર્વાધિષ્ઠાનરૂપિણી ॥ ૫૫॥

સર્વવેદાન્તસંસિદ્ધા સચ્ચિદાનન્દરૂપિણી ।
પ્રણેમુસ્તાં સમાલોક્ય સુરા દેવીં પુરઃસ્થિતામ્ ॥ ૫૬॥

તાનાહ પ્રણતાનમ્બા કિં વઃ કાર્યં બ્રુવન્તુ મામ્ ।
દેવા ઊચુઃ ।
મોહયૈનં રિપું વૃત્રં દેવાનામતિદુઃખદમ્ ॥ ૫૭॥

યથા વિશ્વસતે દેવાંસ્તથા કુરુ વિમોહિતમ્ ।
આયુધે ચ બલં દેહિ હતઃ સ્યાદ્યેન વા રિપુઃ ॥ ૫૮॥

વ્યાસ ઉવાચ ।
તથેત્યુક્ત્વા ભગવતી તત્રૈવાન્તરધીયત ।
સ્વાનિ સ્વાનિ નિકેતાનિ જગ્મુર્દેવા મુદાન્વિતાઃ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
દેવીસમારાધનાય દેવકૃતસ્તુતિવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૬.૫॥

## ૬.૬ ષષ્ઠોઽધ્યાયઃ । છદ્મેનેન્દ્રેણ ફેનદ્વારા પરાશક્તિસ્મરણમૂર્વકં વૃત્રહનનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
એવં પ્રાપ્તવરા દેવા ઋષયશ્ચ તપોધનાઃ ।
(જગ્મુઃ સર્વે ચ સમ્મન્ત્ર્ય વૃત્રસ્યાશ્રમમુત્તમં ।)
દદૃશુસ્તત્ર તં વૃત્રં જ્વલન્તમિવ તેજસા ॥ ૧॥

ધક્ષ્યન્તમિવ લોકાંસ્ત્રીન્ગ્રસન્તમિવ ચામરાન્ ।
ઋષયોઽથ તતોઽભ્યેત્ય વૃત્રમૂચુઃ પ્રિયં વચઃ ॥ ૨॥

દેવકાર્યાર્થસિદ્ધ્યર્થં સામયુક્તં રસાત્મકમ્ ।
ઋષય ઊચુઃ ।
વૃત્ર વૃત્ર મહાભાગ સર્વલોકભયઙ્કર ॥ ૩॥

વ્યાપ્તં ત્વયૈતત્સકલં બ્રહ્માણ્ડમખિલં કિલ ।
શક્રેણ તવ વૈરં યત્તત્તુ સૌખ્યવિઘાતકમ્ ॥ ૪॥

યુવયોર્દુઃખદં કામં ચિન્તાવૃદ્ધિકરં પરમ્ ।
ન ત્વં સ્વપિષિ સન્તુષ્ટો ન ચાપિ મઘવા તથા ॥ ૫॥

સુખં સ્વપિતિ ચિન્તાર્તો દ્વયોર્યદ્વૈરિજં ભયમ્ ।
યુવયોર્યુધ્યતોઃ કાલો વ્યતીતસ્તુ મહાનિહ ॥ ૬॥

પીડ્યન્તે ચ પ્રજાઃ સર્વાઃ સદેવાસુરમાનવાઃ ।
સંસારેઽત્ર સુખં ગ્રાહ્યં દુઃખં હેયમિતિ સ્થિતિઃ ॥ ૭॥

ન સુખં કૃતવૈરસ્ય ભવતીતિ વિનિર્ણયઃ ।
સઙ્ગ્રામરસિકાઃ શૂરાઃ પ્રશંસન્તિ ન પણ્ડિતાઃ ॥ ૮॥

યુદ્ધં શૃઙ્ગારચતુરા ઇન્દ્રિયાર્થવિઘાતકમ્ ।
પુષ્પૈરપિ ન યોદ્ધવ્યં કિં પુનર્નિશિતૈઃ શરૈઃ ॥ ૯॥

યુદ્ધે વિજયસન્દેહો નિશ્ચયં બાણતાડનમ્ ।
દૈવાધીનમિદં વિશ્વં તથા જયપરાજયૌ ॥ ૧૦॥

દૈવાધીનાવિતિ જ્ઞાત્વા ન યોદ્ધવ્યં કદાચન ।
કાલેઽથ ભોજનં સ્નાનં શય્યાયાં શયનં તથા ॥ ૧૧॥

પરિચર્યાપરા ભાર્યા સંસારે સુખસાધનમ્ ।

કિં સુખં યુધ્યતઃ સઙ્ખ્યે બાણવૃષ્ટિભયઙ્કરે ॥ ૧૨॥

ખડ્ગપાતાતિરૌદ્રે ચ તથારાતિસુખપ્રદે ।
સઙ્ગ્રામે મરણાત્સ્વર્ગસુખપ્રાપ્તિરિતિ સ્ફુટમ્ ॥ ૧૩॥

પ્રલોભનપરં વાક્યં નોદનાર્થં નિરર્થકમ્ ।
છિત્ત્વા દેહં વ્યથાં પ્રાપ્ય શ‍ૃગાલકરટાદિભિઃ ॥ ૧૪॥

પશ્ચાત્સ્વર્ગસુખાવાપ્તિં કો વા વાઞ્છતિ મન્દધીઃ ।
સખ્યં ભવતુ તે વૃત્ર શક્રેણ સહ નિત્યદા ॥ ૧૫॥

અવાપ્સ્યસિ સુખં ત્વં ચ શક્રશ્ચાપિ નિરન્તરમ્ ।
વયં ચ તાપસાઃ સર્વે ગન્ધર્વાશ્ચ નિજાશ્રમે ॥ ૧૬॥

સુખવાસં ગમિષ્યામઃ શાન્તે વૈરેઽધુનૈવ વામ્ ।
સઙ્ગ્રામે યુવયોર્ધીર વર્તમાને દિવાનિશમ્ ॥ ૧૭॥

પીડ્યન્તે મુનયઃ સર્વે ગન્ધર્વાઃ કિન્નરા નરાઃ ।
સર્વેષાં શાન્તિકામાનાં સખ્યમિચ્છામહે વયમ્ ॥ ૧૮॥

મુનયસ્ત્વં ચ શક્રશ્ચ પ્રાપ્નુવન્તુ સુખં કિલ ।
મધ્યસ્થાશ્ચ વયં વૃત્ર યુવયોઃ સખ્યકારણે ॥ ૧૯॥

શપથં કારયિત્વાત્ર યોજયામો મિથઃ પ્રિયમ્ ।
શક્રસ્તુ શપથાન્કૃત્વા યથોક્તાંશ્ચ તવાગ્રતઃ ॥ ૨૦॥

ચિત્તં તે પ્રીતિસંયુક્તં કરિષ્યતિ તુ સામ્પ્રતમ્ ।
સત્યાધારા ધરા નૂનં સત્યેન ચ દિવાકરઃ ॥ ૨૧॥

તપત્યયં યથાકાલં વાયુઃ સત્યેન વાત્યથ ।
ઉદન્વાનપિ મર્યાદાં સત્યેનૈવ ન મુઞ્ચતિ ॥ ૨૨॥

તસ્માત્સત્યેન સખ્યં વા ભવત્વદ્ય યથાસુખમ્ ।
એકત્ર શયનં ક્રીડા જલકેલિં સુખાસનમ્ ॥ ૨૩॥

યુવાભ્યાં સર્વથા કાર્યં કર્તવ્યં સખ્યમેત્ય ચ ।
વ્યાસ ઉવાચ ।
મહર્ષિવચનં શ્રુત્વા તાનુવાચ મહામતિઃ ॥ ૨૪॥

અવશ્યં ભગવન્તો મે માનનીયાસ્તપસ્વિનઃ ।
ભવન્તો મુનયઃ ક્વાપિ ન મિથ્યાવાદિનો ભૃશમ્ ॥ ૨૫॥

સદાચારાઃ સુશાન્તાશ્ચ ન વિદુશ્છલકારણમ્ ।
કૃતવૈરે શઠે સ્તબ્ધે કામુકે ચ ગતત્વિષિ ॥ ૨૬॥

નિર્લજ્જે નૈવ કર્તવ્યં સખ્યં મતિમતા સદા ।
નિર્લજ્જોઽયં દુરાચારો બ્રહ્મહા લમ્પટઃ શઠઃ ॥ ૨૭॥

ન વિશ્વાસસ્તુ કર્તવ્યઃ સર્વથૈવેદૃશે જને ।
ભવન્તો નિપુણાઃ સર્વે ન દ્રોહમતયઃ સદા ॥ ૨૮॥

અનભિજ્ઞાસ્તુ શાન્તત્વાચ્ચિત્તાનામતિવાદિનામ્ ।
મુનય ઊચુઃ ।
જન્તુઃ કૃતસ્ય ભોક્તા વૈ શુભસ્ય ત્વશુભસ્ય ચ ॥ ૨૯॥

દ્રોહં કૃત્વા કુતઃ શાન્તિમાપ્નુયાન્નષ્ટચેતનઃ ।
વિશ્વાસઘાતકર્તારો નરકં યાન્તિ નિશ્ચયમ્ ॥ ૩૦॥

દુઃખં ચ સમવાપ્નોતિ નૂનં વિશ્વાસઘાતકઃ ।
નિષ્કૃતિર્બ્રહ્મહન્તૄણાં સુરાપાનાં ચ નિષ્કૃતિઃ ॥ ૩૧॥

વિશ્વાસઘાતિનાં નૈવ મિત્રદ્રોહકૃતામપિ ।
સમયં બ્રૂહિ સર્વજ્ઞ યથા તે ચેતસિ ધ્રુવમ્ ॥ ૩૨॥

તેનૈવ સમયેનાદ્ય સન્ધિઃ સ્યાદુભયોઃ કિલ ।
વૃત્ર ઉવાચ ।
ન શુષ્કેણ ન ચાર્દ્રેણ નાશ્મના ન ચ દારુણા ॥ ૩૩॥

ન વજ્રેણ મહાભાગ ન દિવા નિશિ નૈવ ચ ।
વધ્યો ભવેયં વિપ્રેન્દ્રાઃ શક્રસ્ય સહ દૈવતૈઃ ॥ ૩૪॥

એવં મે રોચતે સન્ધિઃ શક્રેણ સહ નાન્યથા ।
વ્યાસ ઉવાચ ।
ઋષયસ્તં તદા પ્રાહુર્બાઢમિત્યેવ ચાદૃતાઃ ॥ ૩૫॥

સમયં શ્રાવયામાસુસ્તત્રાનીય સુરેશ્વરમ્ ।
ઇન્દ્રોઽપિ શપથાંસ્તત્ર ચકાર વિગતજ્વરઃ ॥ ૩૬॥

સાક્ષિણં પાવકં કૃત્વા મુનીનાં સન્નિધૌ કિલ ।
વૃત્રસ્તુ વચનૈસ્તસ્ય વિશ્વાસમગમત્તદા ॥ ૩૭॥

બભૂવ મિત્રવચ્છક્રે સહચર્યાપરાયણઃ ।
કદાચિન્નન્દને ચોભૌ કદાચિદ્ગન્ધમાદને ॥ ૩૮॥

કદાચિદુદધેસ્તીરે મોદમાનૌ વિચેરતુઃ ।
એવં કૃતે ચ સન્ધાને વૃત્રઃ પ્રમુદિતોઽભવત્ ॥ ૩૯॥

શક્રોઽપિ વધકામસ્તુ તદુપાયાનચિન્તયત્ ।
રન્ધ્રાન્વેષી સમુદ્વિગ્નસ્તદાસીન્મઘવા ભૃશમ્ ॥ ૪૦॥

એવં ચિન્તયતસ્તસ્ય કાલઃ સમભિવર્તત ।
વિશ્વાસં પરમં પ્રાપ વૃત્રઃ શક્રેઽતિદારુણે ॥ ૪૧॥

એવં કતિચિદબ્દાનિ ગતાનિ સમયે કૃતે ।
વૃત્રસ્ય મરણોપાયાન્મનસીન્દ્રોઽપ્યચિન્તયત્ ॥ ૪૨॥

ત્વષ્ટૈકદા સુતં પ્રાહ વિશ્વસ્તં પાકશાસને ।
પુત્ર વૃત્ર મહાભાગ શ‍ૃણુ મે વચનં હિતમ્ ॥ ૪૩॥

ન વિશ્વાસસ્તુ કર્તવ્યઃ કૃતવૈરે કથઞ્ચન ।
મઘવા કૃતવૈરસ્તે સદાસૂયાપરઃ પરૈઃ ॥ ૪૪॥

લોભાન્મત્તો દ્વેષરતઃ પરદુઃખોત્સવાન્વિતઃ ।
પરદારલમ્પટઃ સ પાપબુદ્ધિઃ પ્રતારકઃ ॥ ૪૫॥

રન્ધ્રાન્વેષી દ્રોહપરો માયાવી મદગર્વિતઃ ।
યઃ પ્રવિશ્યોદરે માતુર્ગર્ભચ્છેદં ચકાર હ ॥ ૪૬॥

સપ્તકૃત્વઃ સપ્તકૃત્વઃ ક્રન્દમાનમનાતુરઃ ।
તસ્માત્પુત્ર ન કર્તવ્યો વિશ્વાસસ્તુ કથઞ્ચન ॥ ૪૭॥

કૃતપાપસ્ય કા લજ્જા પુનઃ પુત્ર પ્રકુર્વતઃ ।
વ્યાસ ઉવાચ ।
એવં પ્રબોધિતઃ પિત્રા વચનૈર્હેતુસંયુતૈઃ ॥ ૪૮॥

ન બુબોધ તદા વૃત્ર આસન્નમરણઃ કિલ ।
સ કદાચિત્સમુદ્રાન્તે તમપશ્યન્મહાસુરમ્ ॥ ૪૯॥

સન્ધ્યાકાલ ઉપાવૃત્તે મુહૂર્તેઽતીવ દારુણે ।
તતઃ સઞ્ચિન્ત્ય મઘવા વરદાનં મહાત્મનામ્ ॥ ૫૦॥

સન્ધ્યેયં વર્તતે રૌદ્રા ન રાત્રિર્દિવસો ન ચ ।

હન્તવ્યોઽયં મયા ચાદ્ય બલેનૈવ ન સંશયઃ ॥ ૫૧॥

એકાકી વિજને ચાત્ર સમ્પ્રાપ્તઃ સમયોચિતઃ ।
એવં વિચાર્ય મનસા સસ્માર હરિમવ્યયમ્ ॥ ૫૨॥

તત્રાજગામ ભગવાનદૃશ્યઃ પુરુષોત્તમઃ ।
વજ્રમધ્યે પ્રવિશ્યાસૌ સંસ્થિતો ભગવાન્હરિઃ ॥ ૫૩॥

ઇન્દ્રો બુદ્ધિં ચકારાશુ તદા વૃત્રવધં પ્રતિ ।
ઇતિ સઞ્ચિન્ત્ય મનસા કથં હન્યાં રિપું રણે ॥ ૫૪॥

અજેયં સર્વથા સર્વદેવૈશ્ચ દાનવૈસ્તથા ।
યદિ વૃત્રં ન હન્મ્યદ્ય વઞ્ચયિત્વા મહાબલમ્ ॥ ૫૫॥

ન શ્રેયો મમ નૂનં સ્યાત્સર્વથા રિપુરક્ષણાત્ ।
અપાં ફેનં તદાપશ્યત્સમુદ્રે પર્વતોપમમ્ ॥ ૫૬॥

નાયં શુષ્કો ન ચાર્દ્રોઽયં ન ચ શસ્ત્રમિદં તથા ।
અપાં ફેનં તદા શક્રો જગ્રાહ કિલ લીલયા ॥ ૫૭॥

પરાં શક્તિં ચ સસ્માર ભક્ત્યા પરમયા યુતઃ ।
સ્મૃતમાત્રા તદા દેવી સ્વાંશં ફેને ન્યધાપયત્ ॥ ૫૮॥

વજ્રં તદાવૃતં તત્ર ચકાર હરિસંયુતમ્ ।
ફેનાવૃતં પવિં તત્ર શક્રશ્ચિક્ષેપ તં પ્રતિ ॥ ૫૯॥

સહસા નિપપાતાશુ વજ્રાહત ઇવાચલઃ ।
વાસવસ્તુ પ્રહૃષ્ટાત્મા બભૂવ નિહતે તદા ॥ ૬૦॥

ઋષયશ્ચ મહેન્દ્રં તમસ્તુવન્વિવિધૈઃ સ્તવૈઃ ।
હતશત્રુઃ પ્રહૃષ્ટાત્મા વાસવઃ સહ દૈવતૈઃ ॥ ૬૧॥

દેવીં સમ્પૂજયામાસ યત્પ્રસાદાદ્ધતો રિપુઃ ।
પ્રસાદયામાસ તદા સ્તોત્રૈર્નાનાવિધૈરપિ ॥ ૬૨॥

દેવોદ્યાને પરાશક્તેઃ પ્રાસાદમકરોદ્ધરિઃ ।
પદ્મરાગમયીં મૂર્તિં સ્થાપયામાસ વાસવઃ ॥ ૬૩॥

ત્રિકાલં મહતીં પૂજાં ચક્રુઃ સર્વેઽપિ નિર્જરાઃ ।
તદાપ્રભૃતિ દેવાનાં શ્રીદેવી કુલદૈવતમ્ ॥ ૬૪॥

વિષ્ણું ત્રિભુવનશ્રેષ્ઠં પૂજયામાસ વાસવઃ ।
તતો હતે મહાવીર્યે વૃત્રે દેવભયઙ્કરે ॥ ૬૫॥

પ્રવવૌ ચ શિવો વાયુર્જહૃષુર્દેવતાસ્તથા ।
હતે તસ્મિન્સગન્ધર્વા યક્ષરાક્ષસકિન્નરાઃ ॥ ૬૬॥

ઇત્થં વૃત્રઃ પરાશક્તિપ્રવેશયુતફેનતઃ ।
તયા કૃતવિમોહાચ્ચ શક્રેણ સહસા હતઃ ॥ ૬૭॥

તતો વૃત્રનિહન્ત્રીતિ દેવી લોકેષુ ગીયતે ।
શક્રેણ નિહતત્વાચ્ચ શક્રેણ હત ઉચ્યતે ॥ ૬૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે છદ્મેનેન્દ્રેણ ફેનદ્વારા પરાશક્તિ-
સ્મરણમૂર્વકં વૃત્રહનનવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬.૬॥

## ૬.૭ સપ્તમોઽધ્યાયઃ । ઇન્દ્રસ્ય પદ્મનાલપ્રવેશાનન્તરં નહુષસ્ય દેવેન્દ્રપદેઽભિષેકવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
અથ તં પતિતં દૃષ્ટ્વા વિષ્ણુર્વિષ્ણુપુરીં યયૌ ।
મનસા શઙ્કમાનસ્તુ તસ્ય હત્યાકૃતં ભયમ્ ॥ ૧॥

ઇન્દ્રોઽપિ ભયસન્ત્રસ્તો યયાવિન્દ્રપુરીં તતઃ ।
મુનયો ભયસંવિગ્ના હ્યભવન્નિહતે રિપૌ ॥ ૨॥

કિમસ્માભિઃ કૃતં પાપં યદસૌ વઞ્ચિતઃ કિલ ।
મુનિશબ્દો વૃથા જાતઃ સુરેશસ્ય ચ સઙ્ગમાત્ ॥ ૩॥

અસ્માકં વચનાદ્વૃત્રો વિશ્વાસમગમત્કિલ ।
વિશ્વાસઘાતિનઃ સઙ્ગાદ્વયં વિશ્વાસઘાતકાઃ ॥ ૪॥

ધિગિયં મમતા પાપમૂલમેવમનર્થકૃત્ ।
યદસ્માભિશ્છલં કૃત્વા શપથૈર્વઞ્ચિતોઽસુરઃ ॥ ૫॥

મન્ત્રકૃદ્બુદ્ધિદાતા ચ પ્રેરકઃ પાપકારિણામ્ ।
પાપભાક્સ ભવેન્નૂનં પક્ષકર્તા તથૈવ ચ ॥ ૬॥

વિષ્ણુનાપિ કૃતં પાપં યત્સાહાય્યમવાપ્તવાન્ ।

વજ્રં પ્રવિશ્ય યેનાસૌ પાતિતઃ સત્ત્વમૂર્તિના ॥ ૭॥

નૂનં સ્વાર્થપરઃ પ્રાણી ન પાપાત્ત્રાસમશ્નુતે ।
હરિણા હરિસઙ્ગેન સર્વથા દુષ્કૃતં કૃતમ્ ॥ ૮॥

દ્વાવેવ સ્તઃ પદાર્થાનાં દ્વાવેવ નિધનં ગતૌ ।
પ્રથમશ્ચ તુરીયશ્ચ યૌ ત્રિલોક્યાં તુ દુર્લભૌ ॥ ૯॥

અર્થકામૌ પ્રશસ્તૌ દ્વૌ સર્વેષાં સમ્મતૌ પ્રિયૌ ।
ધર્માધર્મેતિ વાગ્વાદો દમ્ભોઽયં મહતામપિ ॥ ૧૦॥

મુનયોઽપિ મનસ્તાપમેવં કૃત્વા પુનઃ પુનઃ ।
જગ્મુઃ સ્વાનાશ્રમાનેવ વિમનસ્કા હતોદ્યમાઃ ॥ ૧૧॥

ત્વષ્ટા તુ નિહતં શ્રુત્વા પુત્રમિન્દ્રેણ ભારત ।
રુરોદ દુઃખસન્તપ્તો નિર્વેદમગમત્પુનઃ ॥ ૧૨॥

યત્રાસૌ પતિતસ્તત્ર ગત્વા વીક્ષ્ય તથાગતમ્ ।
સંસ્કારં કારયામાસ વિધિવત્પારલૌકિકમ્ ॥ ૧૩॥

સ્નાત્વાસ્ય સલિલં દત્ત્વા કૃત્વા ચૈવૌર્ધ્વદૈહિકમ્ ।
શશાપેન્દ્રં સ શોકાર્તઃ પાપિષ્ઠં મિત્રઘાતકમ્ ॥ ૧૪॥

યથા મે નિહતઃ પુત્રઃ પ્રલોભ્ય શપથૈર્ભૃશમ્ ।
તથેન્દ્રોઽપિ મહદ્દુઃખં પ્રાપ્નોતુ વિધિનિર્મિતમ્ ॥ ૧૫॥

ઇતિ શપ્ત્વા સુરેશાનં ત્વષ્ટા તાપસમન્વિતઃ ।
મેરોઃ શિખરમાસ્થાય તપસ્તેપે સુદુષ્કરમ્ ॥ ૧૬॥

જનમેજય ઉવાચ ।
હત્વા ત્વાષ્ટ્રં સુરેશોઽથ કામવસ્થામવાપ્તવાન્ ।
સુખં વા દુઃખમેવાગ્રે તન્મે બ્રૂહિ પિતામહ ॥ ૧૭॥

વ્યાસ ઉવાચ ।
કિં પૃચ્છસિ મહાભાગ સન્દેહઃ કીદૃશસ્તવ ।
અવશ્યમેવ ભોક્તવ્યં કૃતં કર્મ શુભાશુભમ્ ॥ ૧૮॥

બલિષ્ઠૈર્દુર્બલૈર્વાપિ સ્વલ્પં વા બહુ વા કૃતમ્ ।
સર્વથૈવ હિ ભોક્તવ્યં સદેવાસુરમાનુષૈઃ ॥ ૧૯॥

શક્રાયેત્થં મતિર્દત્તા હરિણા વૃત્રઘાતિને ।

પ્રવિષ્ટોઽથ પવિં વિષ્ણુઃ સહાયઃ પ્રત્યપદ્યત ॥ ૨૦॥

ન ચાપદિ સહાયોઽભૂદ્વાસુદેવઃ કથઞ્ચન ।
સમયે સ્વજનઃ સર્વઃ સંસારેઽસ્મિન્નરાધિપ ॥ ૨૧॥

દૈવે વિમુખતાં પ્રાપ્તે ન કોઽપ્યસ્તિ સહાયવાન્ ।
પિતા માતા તથા ભાર્યા ભ્રાતા વાથ સહોદરઃ ॥ ૨૨॥

સેવકો વાપિ મિત્રં વા પુત્રશ્ચૈવ તથૌરસઃ ।
પ્રતિકૂલે ગતે દૈવે ન કોઽપ્યેતિ સહાયતામ્ ॥ ૨૩॥

ભોક્તા પાપસ્ય પુણ્યસ્ય કર્તા ભવતિ સર્વથા ।
વૃત્રં હત્વા ગતાઃ સર્વે નિસ્તેજસ્કઃ શચીપતિઃ ॥ ૨૪॥

શેપુસ્તં ત્રિદશાઃ સર્વે બ્રહ્મહેત્યબ્રુવઞ્છનૈઃ ।
કો નામ શપથાન્કૃત્વા સત્યં દત્ત્વા વચઃ પુનઃ ॥ ૨૫॥

જિઘાંસતિ સુવિશ્વસ્તં મુનિં મિત્રત્વમાગતમ્ ।
દેવગોષ્ઠ્યાં સુરોદ્યાને ગન્ધર્વાણાં સમાગમે ॥ ૨૬॥

સર્વત્રૈવ કથા તસ્ય વિસ્તારમગમત્કિલ ।
કિં કૃતં દુષ્કૃતં કર્મ શક્રેણાદ્ય જિઘાંસતા ॥ ૨૭॥

વૃત્રં છલેન વિશ્વસ્તં મુનિભિશ્ચ પ્રતારિતમ્ ।
વેદપ્રમાણમુત્સૃજ્ય સ્વીકૃતં સૌગતં મતમ્ ॥ ૨૮॥

યદયં નિહતઃ શત્રુર્વઞ્ચયિત્વાતિસાહસાત્ ।
કો નામ વચનં દત્ત્વા વિપરીતમથાચરેત્ ॥ ૨૯॥

વિના શક્રં હરિં વાપિ યથાયં વિનિપાતિતઃ ।
એવંવિધાઃ કથાશ્ચાન્યાઃ સમાજેષ્વભવન્ભૃશમ્ ॥ ૩૦॥

શુશ્રાવેન્દ્રોઽપિ વિવિધાઃ સ્વકીર્તેર્હાનિકારકાઃ ।
યસ્ય કીર્તિર્હતા લોકે ધિક્તસ્યૈવ કુજીવિતમ્ ॥ ૩૧॥

યં દૃષ્ટ્વા પથિ ગચ્છન્તં શત્રુઃ સ્મેરમુખો ભવેત્ ।
ઇન્દ્રદ્યુમ્નોઽપિ રાજર્ષિઃ પતિતઃ કીર્તિસઙ્ક્ષયાત્ ॥ ૩૨॥

સ્વર્ગાદકૃતપાપોઽસૌ પાપકૃત્કિં ન પાત્યતે ।
સ્વલ્પેઽપરાધેઽપિ નૃપો યયાતિઃ પતિતઃ કિલ ॥ ૩૩॥

નૃપઃ કર્કટતાં પ્રાપ્તો યુગાનષ્ટાદશૈવ તુ ।
ભૃગુપત્નીશિરશ્છેદાદ્ભગવાન્હરિરચ્યુતઃ ॥ ૩૪॥

બ્રહ્મશાપાત્પશોર્યોનૌ સઞ્જાતો મકરાદિષુ ।
વિષ્ણુશ્ચ વામનો ભૂત્વા યાચનાર્થં બલેર્ગૃહે ॥ ૩૫॥

ગતઃ કિમપરં દુઃખં પ્રાપ્નોતિ દુષ્કૃતી નરઃ ।
રામોઽપિ વનવાસેષુ સીતાવિરહજં બહુ ॥ ૩૬॥

દુઃખં ચ પ્રાપ્તવાન્ઘોરં ભૃગુશાપેન ભારત ।
તથેન્દ્રોઽપિ બ્રહ્મહત્યાકૃતં પ્રાપ્ય મહદ્ભયમ્ ॥ ૩૭॥

ન સ્વાસ્થ્યં પ્રાપ ગેહેઽસૌ સર્વસિદ્ધિસમન્વિતે ।
પૌલોમી તં સભાહીનં દૃષ્ટ્વા પ્રોવાચ વાસવમ્ ॥ ૩૮॥

નિઃશ્વસન્તં ભયત્રસ્તં નષ્ટસંજ્ઞં વિચેતસમ્ ।
કિં પ્રભોઽદ્ય ભયાર્તોઽસિ મૃતસ્તે દારુણો રિપુઃ ॥ ૩૯॥

કા ચિન્તા વર્તતે કાન્ત તવ શત્રુનિષૂદન ।
કસ્માચ્છોચસિ લોકેશ નિઃશ્વસન્પ્રાકૃતો યથા ॥ ૪૦॥

નાન્યોઽસ્તિ બલવાઞ્છત્રુર્યેન ચિન્તાપરો ભવાન્ ।
ઇન્દ્ર ઉવાચ ।
નારાતિર્બલવાન્મેઽસ્તિ ન શાન્તિર્ન સુખં તથા ॥ ૪૧॥

બ્રહ્મહત્યાભયાદ્રાજ્ઞિ બિભેમિ સતતં ગૃહે ।
ન નન્દનં સુખકરં નામૃતં ન ગૃહં વનમ્ ॥ ૪૨॥

ગન્ધર્વાણાં તથા ગેયં નૃત્યમપ્સરસાં પુનઃ ।
ન ત્વં સુખકરા નારી નાના ચ સુરયોષિતઃ ॥ ૪૩॥

ન તથા કામધેનુશ્ચ દેવવૃક્ષઃ સુખપ્રદઃ ।
કિં કરોમિ ક્વ ગચ્છામિ ક્વ શર્મ મમ જાયતે ॥ ૪૪॥

ઇતિ ચિન્તાપરઃ કાન્તે ન લભે સુખમાત્મનિ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા વચનં શક્રઃ પ્રિયાં પરમકાતરામ્ ॥ ૪૫॥

નિર્જગામ ગૃહાન્મન્દો માનસં સર ઉત્તમમ્ ।
પદ્મનાલે પ્રવિષ્ટોઽસૌ ભયાર્તઃ શોકકર્ષિતઃ ॥ ૪૬॥

ન પ્રાજ્ઞાયત દેવેન્દ્રસ્ત્વભિભૂતશ્ચ કલ્મષૈઃ ।
પ્રતિચ્છન્નો વસત્યપ્સુ ચેષ્ટમાન ઇવોરગઃ ॥ ૪૭॥

અસહાયસ્તુરાષાડૈશ્ચિન્તાર્તો વિકલેન્દ્રિયઃ ।
તતઃ પ્રનષ્ટે દેવેન્દ્રે બ્રહ્મહત્યાભયાર્દિતે ॥ ૪૮॥

સુરાશ્ચિન્તાતુરાશ્ચાસન્નુત્પાતાશ્ચાભવન્નથ ।
ઋષયઃ સિદ્ધગન્ધર્વા ભયાર્તાશ્ચાભવન્ભૃશમ્ ॥ ૪૯॥

અરાજકં જગત્સર્વમભિભૂતમુપદ્રવૈઃ ।
અવર્ષણં તદા જાતં પૃથિવી ક્ષીણવૈભવા ॥ ૫૦॥

વિચ્છિન્નસ્રોતસો નદ્યઃ સરાંસ્યનુદકાનિ વૈ ।
એવં ત્વરાજકે જાતે દેવતા મુનયસ્તથા ॥ ૫૧॥

વિચાર્ય નહુષં ચક્રુઃ શક્રં સર્વે દિવૌકસઃ ।
સમ્પ્રાપ્ય નહુષો રાજા ધર્મિષ્ઠોઽપિ રજોબલાત્ ॥ ૫૨॥

બભૂવ વિષયાસક્તઃ પઞ્ચબાણશરાહતઃ ।
અપ્સરોભિર્વૃતઃ ક્રીડન્દેવોદ્યાનેષુ ભારત ॥ ૫૩॥

શક્રપત્નીગુણાઞ્છ્રુત્વા ચકમે તાં સ પાર્થિવઃ ।
ઋષીનાહ કિમિન્દ્રાણી નોપગચ્છતિ માં કિલ ॥ ૫૪॥

ભવદ્ભિશ્ચામરૈઃ સર્વૈઃ કૃતોઽહં વાસવસ્ત્વિહ ।
પ્રેષયધ્વં સુરાઃ કામં સેવાર્થં મમ વૈ શચીમ્ ॥ ૫૫॥

પ્રિયં ચેન્મમ કર્તવ્યં સર્વથા મુનયોઽમરાઃ ।
અહમિન્દ્રોઽદ્ય દેવાનાં લોકાનાં ચ તથેશ્વરઃ ॥ ૫૬॥

આગચ્છતુ શચી મહ્યં ક્ષિપ્રમદ્ય નિવેશનમ્ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા દેવા દેવર્ષયસ્તથા ॥ ૫૭॥

ગત્વા ચિન્તાતુરાઃ પ્રોચુઃ પૌલોમીં પ્રણતાસ્તતઃ ।
ઇન્દ્રપત્નિ દુરાચારો નહુષસ્ત્વામિહેચ્છતિ ॥ ૫૮॥

કુપિતોઽસ્માનુવાચેદં પ્રેષયધ્વં શચીમિહ ।
કિં કુર્મસ્તદધીનાઃ સ્મો યેનેન્દ્રોઽયં કૃતઃ કિલ ॥ ૫૯॥

તચ્છ્રુત્વા દુર્મના દેવી બૃહસ્પતિમુવાચ હ ।
રક્ષ માં નહુષાદ્બ્રહ્મંસ્તવાસ્મિ શરણં ગતા ॥ ૬૦॥

બૃહસ્પતિરુવાચ ।
ન ભેતવ્યં ત્વયા દેવિ નહુષાત્પાપમોહિતાત્ ।
ન ત્વાં દાસ્યામ્યહં વત્સે ત્યક્ત્વા ધર્મં સનાતનમ્ ॥ ૬૧॥

શરણાગતમાર્તં ચ યો દદાતિ નરાધમઃ ।
સ એવ નરકં યાતિ યાવદાભૂતસમ્પ્લવમ્ ।
સ્વસ્થા ભવ પૃથુશ્રોણિ ન ત્યક્ષ્યે ત્વાં કદાચન ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે ઇન્દ્રસ્ય પદ્મનાલપ્રવેશાનન્તરં નહુષસ્ય
દેવેન્દ્રપદેઽભિષેકવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૬.૭॥

## ૬.૮ અષ્ટમોઽધ્યાયઃ । ઇન્દ્રાણ્યા શક્રદર્શનમ્ ।

વ્યાસ ઉવાચ ।
નહુષસ્ત્વથ તાં શ્રુત્વા ગુરોસ્તુ શરણં ગતામ્ ।
ચુક્રોધ સ્મરબાણાર્તસ્તમાઙ્ગિરસમાશુ વૈ ॥ ૧॥

દેવાનાહાઙ્ગિરાસૂનુર્હન્તવ્યોઽયં મયા કિલ ।
ઇતીન્દ્રાણીં ગૃહે મૂઢો રક્ષતીતિ મયા શ્રુતમ્ ॥ ૨॥

ઇતિ તં કુપિતં દૃષ્ટ્વા દેવાઃ સર્ષિપુરોગમાઃ ।
અબ્રુવન્નહુષં ઘોરં સામપૂર્વં વચસ્તદા ॥ ૩॥

ક્રોધં સંહર રાજેન્દ્ર ત્યજ પાપમતિં પ્રભો ।
નિન્દન્તિ ધર્મશાસ્ત્રેષુ પરદારાભિમર્શનમ્ ॥ ૪॥

શક્રપત્ની સદા સાધ્વી જીવમાને પતૌ પુનઃ ।
કથમન્યે પતિં કુર્યાત્સુભગાતિપતિવ્રતા ॥ ૫॥

ત્રિલોકીશસ્ત્વમધુના શાસ્તા ધર્મસ્ય વૈ વિભો ।
ત્વાદૃશોઽધર્મમાતિષ્ઠેત્તદા નશ્યેત્પ્રજા ધ્રુવમ્ ॥ ૬॥

સર્વથા પ્રભુણા કાર્યં શિષ્ટાચારસ્ય રક્ષણમ્ ।
વારમુખ્યાશ્ચ શતશો વર્તન્તેઽત્ર શચીસમાઃ ॥ ૭॥

રતિસ્તુ કારણં પ્રોક્તં શૃઙ્ગારસ્ય મહાત્મભિઃ ।

રસહાનિર્બલાત્કારે કૃતે સતિ તુ જાયતે ॥ ૮॥

ઉભયોઃ સદૃશં પ્રેમ યદિ પાર્થિવસત્તમ ।
તદા વૈ સુખસમ્પત્તિરુભયોરુપજાયતે ॥ ૯॥

તસ્માદ્ભાવમિમં મુઞ્ચ પરદારાભિમર્શને ।
સદ્ભાવં કુરુ દેવેન્દ્ર પદં પ્રાપ્તોઽસ્યનુત્તમમ્ ॥ ૧૦॥

ઋદ્ધિક્ષયસ્તુ પાપેન પુણ્યેનાતિવિવર્ધનમ્ ।
તસ્માત્પાપં પરિત્યજ્ય સન્મતિં કુરુ પાર્થિવ ॥ ૧૧॥

નહુષ ઉવાચ ।
ગૌતમસ્ય યદા ભુક્તા દારાઃ શક્રેણ દેવતાઃ ।
વાચસ્પતેસ્તુ સોમેન ક્વ યૂયં સંસ્થિતાસ્તદા ॥ ૧૨॥

પરોપદેશે કુશલા પ્રભવન્તિ નરાઃ કિલ ।
કર્તા ચૈવોપદેષ્ટા ચ દુર્લભઃ પુરુષો ભવેત્ ॥ ૧૩॥

મામાગચ્છતુ સા દેવી હિતં સ્યાદદ્ભુતં હિ વઃ ।
એતસ્યાઃ પરમં દેવાઃ સુખમેવ ભવિષ્યતિ ॥ ૧૪॥

અન્યથા ન હિ તુષ્યેઽહં સત્યમેતદ્બ્રવીમિ વઃ ।
વિનયાદ્વા બલાદ્વાપિ તામાશુ પ્રાપયન્ત્વિહ ॥ ૧૫॥

ઇતિ તસ્ય વચઃ શ્રુત્વા દેવાશ્ચ મુનયસ્તથા ।
તમૂચુશ્ચાતિસન્ત્રસ્તા નહુષં મદનાતુરમ્ ॥ ૧૬॥

ઇન્દ્રાણીમાનયિષ્યામઃ સામપૂર્વં તવાન્તિકમ્ ।
ઇત્યુક્ત્વા તે તદા જગ્મુર્બૃહસ્પતિનિકેતનમ્ ॥ ૧૭॥

વ્યાસ ઉવાચ ।
તે ગત્વાઙ્ગિરસઃ પુત્રં પ્રોચુઃ પ્રાઞ્જલયઃ સુરાઃ ।
જાનીમઃ શરણં પ્રાપ્તામિન્દ્રાણીં તવ વેશ્મનિ ॥ ૧૮॥

સા દેયા નહુષાયાદ્ય વાસવોઽસૌ કૃતો યતઃ ।
વૃણોત્વિયં વરારોહા પતિત્વે વરવર્ણિની ॥ ૧૯॥

બૃહસ્પતિઃ સુરાનાહ તચ્છ્રુત્વા દારુણં વચઃ ।
નાહં ત્યક્ષ્યે તુ પૌલોમીં સતીં ચ શરણાગતામ્ ॥ ૨૦॥

દેવા ઊચુઃ ।

ઉપાયોઽન્યઃ પ્રકર્તવ્યો યેન સોઽદ્ય પ્રસીદતિ ।
અન્યથા કોપસંયુક્તો દુરારાધ્યો ભવિષ્યતિ ॥ ૨૧॥

ગુરુરુવાચ ।
તત્ર ગત્વા શચી ભૂપં પ્રલોભ્ય વચસા ભૃશમ્ ।
કરોતુ સમયં બાલા પતિં જ્ઞાત્વા મૃતં ભજે ॥ ૨૨॥

ઇન્દ્રે જીવતિ મે કાન્તે કથમન્યં કરોમ્યહમ્ ।
અન્વેષણાર્થં ગન્તવ્યં મયા તસ્ય મહાત્મનઃ ॥ ૨૩॥

ઇતિ સા સમયં કૃત્વા વઞ્ચયિત્વા ચ ભૂપતિમ્ ।
ભર્તુરાનયને યત્નં કરોતુ મમ વાક્યતઃ ॥ ૨૪॥

ઇતિ સઞ્ચિન્ત્ય મે સર્વે બૃહસ્પતિપુરોગમાઃ ।
નહુષં સહિતા જગ્મુરિન્દ્રપત્ન્યા દિવૌકસઃ ॥ ૨૫॥

તાનાગતાન્સમીક્ષ્યાહ તદા કૃત્રિમવાસવઃ ।
જહર્ષ ચ મુદાયુક્તસ્તાં વીક્ષ્ય મુદિતોઽબ્રવીત્ ॥ ૨૬॥

અદ્યાસ્મિ વાસવઃ કાન્તે ભજ માં ચારુલોચને ।
પતિત્વે સર્વલોકસ્ય પૂજ્યોઽહં વિહિતઃ સુરૈઃ ॥ ૨૭॥

ઇત્યુક્તા સા નૃપં પ્રાહ વેપમાના ત્રપાયુતા ।
વરમિચ્છામ્યહં રાજંસ્ત્વત્તઃ પ્રાપ્તં સુરેશ્વર ॥ ૨૮॥

કિઞ્ચિત્કાલં પ્રતીક્ષસ્વ યાવત્કુર્વે વિનિર્ણયમ્ ।
ઇન્દ્રોઽસ્તીતિ ન વાસ્તીતિ સન્દેહો મે હૃદિ સ્થિતઃ ॥ ૨૯॥

તતસ્ત્વાં સમુપસ્થાસ્યે કૃત્વા નિશ્ચયમાત્મનિ ।
તાવત્ક્ષમસ્વ રાજેન્દ્ર સત્યમેતદ્બ્રવીમિ તે ॥ ૩૦॥

ન હિ વિજ્ઞાયતે શક્રો નષ્ટઃ કિં વા ક્વ વા ગતઃ ।
એવમુક્તઃ સ ચેન્દ્રાણ્યા નહુષઃ પ્રીતિમાનભૂત્ ॥ ૩૧॥

વ્યસર્જયત્સ તાં દેવીં તથેત્યુક્ત્વા મુદાન્વિતઃ ।
સા વિસૃષ્ટા નૃપેણાશુ ગત્વા પ્રાહ સુરાન્સતી ॥ ૩૨॥

ઇન્દ્રસ્યાગમને યત્નં કુરુતાદ્ય કૃતોદ્યમાઃ ।
શ્રુત્વા તદ્વચનં દેવા ઇન્દ્રાણ્યા રસવચ્છુચિ ॥ ૩૩॥

મન્ત્રયામાસુરેકાગ્રાઃ શક્રાર્થં નૃપસત્તમ ।

તે ગત્વા વૈષ્ણવં ધામ તુષ્ટુવુઃ પરમેશ્વરમ્ ॥ ૩૪॥

આદિદેવં જગન્નાથં શરણાગતવત્સલમ્ ।
ઊચુશ્ચૈનં સમુદ્વિગ્ના વાક્યં વાક્યવિશારદાઃ ॥ ૩૫॥

દેવદેવ સુરપતિર્બ્રહ્મહત્યાપ્રપીડિતઃ ।
અદૃશ્યઃ સર્વભૂતાનાં ક્વાપિ તિષ્ઠતિ વાસવઃ ॥ ૩૬॥

ત્વદ્બુદ્ધ્યા નિહતે વિપ્રે બ્રહ્મહત્યા કુતઃ પ્રભો ।
ત્વં ગતિસ્તસ્ય ભગવન્નસ્માકં ચ તથૈવ હિ ॥ ૩૭॥

ત્રાહિ નઃ પરમાપન્નાન્મોક્ષં તસ્ય વિનિર્દિશ ।
દેવાનાં વચનં શ્રુત્વા કાતરં વિષ્ણુરબ્રવીત્ ॥ ૩૮॥

યજતામશ્વમેધેન શક્રપાપનિવૃત્તયે ।
પુણ્યેન હયમેધેન પાવિતઃ પાકશાસનઃ ॥ ૩૯॥

પુનરેષ્યતિ દેવાનામિન્દ્રત્વમકુતોભયઃ ।
હયમેધેન સન્તુષ્ટા દેવી શ્રીજગદમ્બિકા ॥ ૪૦॥

બ્રહ્મહત્યાદિપાપાનિ નાશયિષ્યત્યસંશયમ્ ।
યસ્યાઃ સ્મરણમાત્રેણ પાપજાલં વિનશ્યતિ ॥ ૪૧॥

કિં પુનર્વાજિમેધેન તત્પ્રીત્યર્થં કૃતેન ચ ।
ઇન્દ્રાણી કુરુતાન્નિત્યં ભગવત્યાઃ પ્રપૂજનમ્ ॥ ૪૨॥

આરાધનં શિવાયાસ્તુ સુખકારિ ભવિષ્યતિ ।
નહુષોઽપિ જગન્માતુર્માયયા મોહિતઃ કિલ ॥ ૪૩॥

વિનાશં સ્વકૃતેનાશુ ગમિષ્યત્યેનસા સુરાઃ ।
પાવિતશ્ચાશ્વમેધેન તુરાષાડપિ વૈભવમ્ ॥ ૪૪॥

પ્રાપ્સ્યત્યચિરકાલેન સ્વમાસનમનુત્તમમ્ ।
તે તુ શ્રુત્વા શુભાં વાણીં વિષ્ણોરમિતતેજસઃ ॥ ૪૫॥

જગ્મુસ્તં દેશમનિશં યત્રાસ્તે પાકશાસનઃ ।
તમાશ્વાસ્ય સુરાઃ શક્રં બૃહસ્પતિપુરોગમાઃ ॥ ૪૬॥

કારયામાસુરખિલં હયમેધં મહાક્રતુમ્ ।
વિભજ્ય બ્રહ્મહત્યાં તુ વૃક્ષેષુ ચ નદીષુ ચ ॥ ૪૭॥

પર્વતેષુ પૃથિવ્યાં ચ સ્ત્રીષુ ચૈવાક્ષિપદ્ વિભુઃ ।
તાં વિસૃજ્ય ચ ભૂતેષુ વિપાપઃ પાકશાસનઃ ॥ ૪૮॥

વિજ્વરઃ સમભૂદ્ભૂયઃ કાલાકાઙ્ક્ષી સ્થિતો જલે ।
અદૃશ્યઃ સર્વભૂતાનાં પદ્મનાલે વ્યતિષ્ઠત ॥ ૪૯॥

દેવાસ્તુ નિર્ગતાઃ સ્થાને કૃત્વા કાર્યં તદદ્ભુતમ્ ।
પૌલોમી તુ ગુરું પ્રાહ દુઃખિતા વિરહાકુલા ॥ ૫૦॥

કૃતયજ્ઞોઽપિ મે ભર્તા કિમદૃશ્યઃ પુરન્દરઃ ।
કથં દ્રક્ષ્યે પ્રિયં સ્વામિંસ્તમુપાયં વદસ્વ મે ॥ ૫૧॥

બૃહસ્પતિરુવાચ ।
ત્વમારાધય પૌલોમિ દેવીં ભગવતીં શિવામ્ ।
દર્શયિષ્યતિ તે નાથં દેવી વિગતકલ્મષમ્ ॥ ૫૨॥

આરાધિતા જગદ્ધાત્રી નહુષં વારયિષ્યતિ ।
મોહયિત્વા નૃપં સ્થાનાત્પાતયિષ્યતિ ચામ્બિકા ॥ ૫૩॥

ઇત્યુક્તા સા તદા તેન પુલોમતનયા નૃપ ।
જગ્રાહ મન્ત્રં વિધિવદ્ગુરોર્દેવ્યાઃ સસાધનમ્ ॥ ૫૪॥

વિદ્યાં પ્રાપ્ય ગુરોર્દેવી દેવીં શ્રીભુવનેશ્વરીમ્ ।
સમ્યગારાધયામાસ બલિપુષ્પાર્ચનૈઃ શુભૈ ॥ ૫૫॥

ત્યક્તાન્યભોગસમ્ભારા તાપસીવેષધારિણી ।
ચકાર પૂજનં દેવ્યાઃ પ્રિયદર્શનલાલસા ॥ ૫૬॥

કાલેન કિયતા તુષ્ટા પ્રત્યક્ષં દર્શનં દદૌ ।
સૌમ્યરૂપધરા દેવી વરદા હંસવાહિની ॥ ૫૭॥

સૂર્યકોટિપ્રતીકાશા ચન્દ્રકોટિસુશીતલા ।
વિદ્યુત્કોટિસમાનાભા ચતુર્વેદસમન્વિતા ॥ ૫૮॥

પાશાઙ્કુશાભયવરાન્દધતી નિજબાહુભિઃ ।
આપાદલમ્બિનીં સ્વચ્છાં મુક્તામાલાં ચ બિભ્રતી ॥ ૫૯॥

પ્રસન્નસ્મેરવદના લોચનત્રયભૂષિતા ।
આબ્રહ્મકીટજનની કરુણામૃતસાગરા ॥ ૬૦॥

અનન્તકોટિબ્રહ્માણ્ડનાયિકા પરમેશ્વરી ।

સૌમ્યાનન્તરસૈર્યુક્તસ્તનદ્વયવિરાજિતા ॥ ૬૧॥

સર્વેશ્વરી ચ સર્વજ્ઞા કૂટસ્થાક્ષરરૂપિણી ।
તામુવાચ પ્રસન્ના સા શક્રપત્નીં કૃતોદ્યમામ્ ॥ ૬૨॥

મેઘગમ્ભીરશબ્દેન મુદમાદદતી ભૃશમ્ ।
દેવ્યુવાચ ।
વરં વરય સુશ્રોણિ વાઞ્છિતં શક્રવલ્લભે ॥ ૬૩॥

દદામ્યદ્ય પ્રસન્નાસ્મિ પૂજિતા સુભૃશં ત્વયા ।
વરદાહં સમાયાતા દર્શનં સહજં ન મે ॥ ૬૪॥

અનેકકોટિજન્મોત્થપુણ્યપુઞ્જૈર્હિ લભ્યતે ।
ઇત્યુક્તા સા તદા દેવી તામાહ પ્રણતા પુરઃ ॥ ૬૫॥

શક્રપત્ની ભગવતીં પ્રસન્નાં પરમેશ્વરીમ્ ।
વાઞ્છામિ દર્શનં માતઃ પત્યુઃ પરમદુર્લભમ્ ॥ ૬૬॥

નહુષાદ્ભયનાશં ચ સ્વપદપ્રાપણં તથા ।
દેવ્યુવાચ ।
ગચ્છ ત્વમનયા દૂત્યા સાર્ધં શ્રીમાનસં સરઃ ॥ ૬૭॥

યત્ર મે મૂર્તિરચલા વિશ્વકામાભિધા મતા ।
તત્ર પશ્યસિ શક્રં ત્વં દુઃખિતં ભયવિહ્વલમ્ ॥ ૬૮॥

મોહયિષ્યામિ રાજાનં કાલેન કિયતા પુનઃ ।
સ્વસ્થા ભવ વિશાલાક્ષિ કરોમિ તવ ચેપ્સિતમ્ ॥ ૬૯॥

ભ્રંશયિષ્યામિ ભૂપાલં મોહિતં ત્રિદશાસનાત્ ।
વ્યાસ ઉવાચ ।
દેવીદૂતી તાં ગૃહીત્વા શક્રપત્નીં ત્વરાન્વિતા ॥ ૭૦॥

પ્રાપયામાસ સાન્નિધ્યં સ્વપત્યુઃ પરમેશ્વરીમ્ ।
સા દૃષ્ટ્વા તં પતિં બાલા સુરેશં ગુપ્તસંસ્થિતમ્ ।
મુદિતાભૂદ્વરં વીક્ષ્ય બહુકાલાભિવાઞ્છિતમ્ ॥ ૭૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે ઇન્દ્રાણ્યા શક્રદર્શનં નામાષ્ટમોઽધ્યાયઃ ॥ ૬.૮॥

## ૬.૯ નવમોઽધ્યાયઃ । નહુષસ્વર્ગચ્યુતિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તાં વીક્ષ્ય વિપુલાપાઙ્ગીં રહઃ શોકસમન્વિતામ્ ।
આખણ્ડલઃ પ્રિયાં ભાર્યાં વિસ્મિતશ્ચાબ્રવીત્તદા ॥ ૧॥

કથમત્રાગતા કાન્તે કથં જ્ઞાતસ્ત્વયા હ્યહમ્ ।
દુર્જ્ઞેયઃ સર્વભૂતાનાં સંસ્થિતોઽસ્મિ શુભાનને ॥ ૨॥

શચ્યુવાચ ।
દેવ દેવ્યાઃ પ્રસાદેન જ્ઞાતોઽસ્યદ્ય ભવાનિહ ।
પુનસ્તસ્યાઃ પ્રસાદેન પ્રાપ્તાસ્મિ ત્વાં દિવસ્પતે ॥ ૩॥

નહુષો નામ રાજર્ષિઃ સ્થાપિતો ભવદાસને ।
ત્રિદશૈર્મુનિભિશ્ચૈવ સ માં બાધતિ નિત્યશઃ ॥ ૪॥

પતિં માં કુરુ ચાર્વઙ્ગિઃ તુરાસાહં સુરાધિપમ્ ।
એવં વદતિ માં પાપ્મા કિં કરોમિ બલાર્દન ॥ ૫॥

ઇન્દ્ર ઉવાચ ।
કાલાકાઙ્ક્ષી વરારોહે સંસ્થિતોઽસ્મિ યદૃચ્છયા ।
તથા ત્વમપિ કલ્યાણિ સુસ્થિરં સ્વમનઃ કુરુ ॥ ૬॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તા તેન સા દેવી પતિનાતિપ્રશંસિના ।
નિઃશ્વસન્ત્યાહ તં શક્રં વેપમાનાતિદુઃખિતા ॥ ૭॥

કથં તિષ્ઠે મહાભાગ પાપાત્મા માં વશાનુગામ્ ।
કરિષ્યતિ મદોન્મત્તો વરદાનેન ગર્વિતઃ ॥ ૮॥

દેવાશ્ચ મુનયઃ સર્વે મામૂચુસ્તદ્ભયાકુલાઃ ।
તં ભજસ્વ વરારોહે દેવરાજં સ્મરાતુરમ્ ॥ ૯॥

બૃહસ્પતિસ્તુ શત્રુઘ્ન વાડવો બલવર્જિતઃ ।
કથં માં રક્ષિતું શક્તો ભવેદ્દેવાનુગઃ સદા ॥ ૧૦॥

તસ્માચ્ચિન્તાસ્તિ મહતી નાર્યહં વશવર્તિની ।
અનાથા કિં કરિષ્યામિ વિપરીતે વિધૌ વિભો ॥ ૧૧॥

નાર્યસ્મ્યહં ન કુલટા ત્વચ્ચિત્તાતિપતિવ્રતા ।

નાસ્તિ મે શરણં તત્ર યો માં રક્ષતિ દુઃખિતામ્ ॥ ૧૨॥

ઇન્દ્ર ઉવાચ ।
ઉપાયં પ્રબ્રવીમ્યદ્ય તં કુરુષ્વ વરાનને ।
શીલં તે દુઃખિતે કાલે પરિત્રાતં ભવિષ્યતિ ॥ ૧૩॥

પરેણ રક્ષિતા નારી ન ભવેચ્ચ પતિવ્રતા ।
ઉપાયૈઃ કોટિભિઃ કામભિન્નચિત્તાતિચઞ્ચલા ॥ ૧૪॥

શીલમેવ હિ નારીણાં સદા રક્ષતિ પાપતઃ ।
તસ્માત્ત્વં શીલમાસ્થાય સ્થિરા ભવ શુચિસ્મિતે ॥ ૧૫॥

યદા ત્વાં નહુષો રાજા બલાદાકર્ષયેત્ખલઃ ।
તદા ત્વં સમયં કૃત્વા ગજં વઞ્ચય ભૂપતિમ્ ॥ ૧૬॥

એકાન્તે તત્સમીપે ત્વં ગત્વા વદ મદાલસે ।
ઋષિયાનેન દિવ્યેન મામુપૈહિ જગત્પતે ॥ ૧૭॥

એવં તવ વશે પ્રીતા ભવિષ્યામીતિ મે તતમ્ ।
ઇતિ તં વદ સુશ્રોણિ તદા તુ પરિમોહિતઃ ॥ ૧૮॥

કામાન્ધઃ સ મુનીન્ યાને યોજયિષ્યતિ પાર્થિવઃ ।
અવશ્યં તાપસો ભૂપં શાપદગ્ધં કરિષ્યતિ ॥ ૧૯॥

સાહાય્યં જગદમ્બા તે કરિષ્યતિ ન સંશયઃ ।
જગદમ્બાપદસ્મર્તુઃ સઙ્કટં ન કદાચન ॥ ૨૦॥

યદિ જાયેત તચ્ચાપિ જ્ઞેયં તત્સ્વસ્તયે કિલ ।
તસ્માત્સર્વપ્રયત્નેન મણિદ્વીપાધિવાસિનીમ્ ॥ ૨૧॥

ભજ ત્વં ભુવનેશાનીં ગુરુવાક્યાનુસારતઃ ।
વ્યાસ ઉવાચ ।
ઇત્યાખ્યાતા શચી તેન જગામ નહુષં પ્રતિ ॥ ૨૨॥

તથેત્યુક્ત્વાતિવિશ્વસ્તા ભાવિકાર્યે કૃતોદ્યમા ।
નહુષસ્તાં સમાલોક્ય મુદિતો વાક્યમબ્રવીત્ ॥ ૨૩॥

સ્વાગતં સત્યવચનૈસ્ત્વદધીનોઽસ્મિ કામિનિ ।
દાસોઽહં તવ સત્યેન પાલિતં વચનં ત્વયા ॥ ૨૪॥

યદાગતા સમીપે મે તુષ્ટોઽસ્મિ મિતભાષિણિ ।

ન ચ વ્રીડા ત્વયા કાર્યા ભક્તં માં ભજ સુસ્મિતે ॥ ૨૫॥

કાર્યં વદ વિશાલાક્ષિ કરિષ્યામિ તવ પ્રિયમ્ ।
શચ્યુવાચ ।
સર્વં કૃતં ત્વયા કાર્યં મમ કૃત્રિમવાસવ ॥ ૨૬॥

મનોરથોઽસ્તિ મે દેવ શૃણુ ચિત્તેઽધુના વિભો ।
વાઞ્છિતં કુરુ કલ્યાણ ત્વદ્વશાહમતઃ પરમ્ ॥ ૨૭॥

બ્રવીમિ માનસોત્સાહં ત્વં તં કર્તુમિહાર્હસિ ।
નહુષ ઉવાચ ।
કાર્યં ત્વં બ્રૂહિ ચન્દ્રાસ્યે કરોમિ તવ વાઞ્છિતમ્ ॥ ૨૮॥

અલભ્યમપિ દાસ્યામિ તુભ્યં સુભ્રુ વદસ્વ મામ્ ।
શચ્યુવાચ ।
કથં બ્રવીમિ રાજેન્દ્ર પ્રત્યયો નાસ્તિ મે તવ ॥ ૨૯॥

શપથં કુરુ રાજેન્દ્ર યત્કરોમિ પ્રિયં તવ ।
રાજાનઃ સત્યવચસો દુર્લભા એવ ભૂતલે ॥ ૩૦॥

પશ્ચાદ્બ્રવીમ્યહં રાજન્ જ્ઞાત્વા સત્યેન યન્ત્રિતમ્ ।
કૃતે ચેદ્વાઞ્છિતે ભૂપ સદા તે વશવર્તિની ॥ ૩૧॥

ભવિષ્યામિ તુરાષાડ્ વૈ સત્યમેતદ્વચો મમ ।
નહુષ ઉવાચ ।
અવશ્યમેવ કર્તવ્યં વચનં તવ સુન્દરિ ॥ ૩૨॥

શપામિ સુકૃતેનાહં યજ્ઞદાનકૃતેન વૈ ।
શચ્યુવાચ ।
ઇન્દ્રસ્ય હરયો વાહા ગજશ્ચૈવ રથસ્તથા ॥ ૩૩॥

ગરુડો વાસુદેવસ્ય યમસ્ય મહિષસ્તથા ।
વૃષભઃ શઙ્કરસ્યાપિ બ્રહ્મણો વરટાપતિઃ ॥ ૩૪॥

મયૂરઃ કાર્તિકેયસ્ય ગજાસ્યસ્ય તુ મૂષકઃ ।
ઇચ્છામ્યહમપૂર્વં વૈ વાહનં તે સુરાધિપ ॥ ૩૫॥

યન્ન વિષ્ણોર્ન રુદ્રસ્ય નાસુરાણાં ન રક્ષસામ્ ।
વહન્તુ ત્વાં મહારાજ મુનયઃ સંશિતવ્રતાઃ ॥ ૩૬॥

સર્વે શિબિકયા રાજન્નેતદ્ધિ મમ વાઞ્છિતમ્ ।
સર્વદેવાધિકં ત્વાં વૈ જાનામિ વસુધાધિપ ॥ ૩૭॥

તેન તે તેજસો વૃદ્ધિં વાઞ્છામ્યહમતન્દ્રિતા ।
વ્યાસ ઉવાચ ।
તસ્યાસ્તદ્વચનં શ્રુત્વા પ્રહસ્ય જ્ઞાનદુર્બલઃ ॥ ૩૮॥

મોહિતસ્તુ મહાદેવ્યા કૃતમોહેન તત્ક્ષણમ્ ।
ઉવાચ વચનં ભૂપઃ સંસ્તુવન્વાસવપ્રિયામ્ ॥ ૩૯॥

નહુષ ઉવાચ ।
સત્યમુક્તં ત્વયા તન્વિ વાહનં રુચિરં મમ ।
કરિષ્યામિ સુકેશાન્તે વચનં તવ સર્વથા ॥ ૪૦॥

ન હ્યલ્પવીર્યો ભવતિ યો વાહાન્કુરુતે મુનીન્ ।
અહમારુહ્ય યાનેન ત્વામેષ્યામિ શુચિસ્મિતે ॥ ૪૧॥

સપ્તર્ષયો માં વક્ષ્યન્તિ સર્વે દેવર્ષયસ્તથા ।
સમર્થં ત્રિષુ લોકેષુ જ્ઞાત્વા માં તપસાધિકમ્ ॥ ૪૨॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા તાં સુસન્તુષ્ટો વિસસર્જ હરિપ્રિયામ્ ।
મુનીનાહૂય સર્વાસ્તાનિત્યુવાચ સ્મરાન્વિતઃ ॥ ૪૩॥

નહુષ ઉવાચ ।
અહમિન્દ્રોઽદ્ય ભો વિપ્રાઃ સર્વશક્તિસમન્વિતઃ ।
કાર્યમત્ર પ્રકુર્વન્તુ ભવન્તો વિગતસ્મયાઃ ॥ ૪૪॥

ઇન્દ્રાસનં મયા પ્રાપ્તં નેન્દ્રાણી મામુપૈતિ ચ ।
આકારિતા ચ માં સૂતે પ્રેમપૂર્વમિદં વચઃ ॥ ૪૫॥

મુનિયાનેન દેવેન્દ્ર મામુપૈહિ સુરાધિપ ।
દેવદેવ મહારાજ મત્પ્રિયં કુરુ માનદ ॥ ૪૬॥

એતત્કાર્યં મુનિશ્રેષ્ઠા મમાત્યન્તં દુરાસદમ્ ।
ભવદ્ભિસ્તુ પ્રકર્તવ્યં સર્વથૈવ દયાલુભિઃ ॥ ૪૭॥

મનો દહતિ મે કામઃ શક્રપત્ન્યાં પ્રવર્તિતમ્ ।
ભવન્તઃ શરણં મેઽદ્ય કુરુધ્વં કાર્યમદ્ભુતમ્ ॥ ૪૮॥

અગસ્તિપ્રમુખાસ્તસ્ય શ્રુત્વા વાક્યમસત્કરમ્ ।
અઙ્ગીચક્રુશ્ચ ભાવિત્વાત્કૃપયા પરમર્ષયઃ ॥ ૪૯॥

અઙ્ગીકૃતેઽથ તદ્વાક્યે મુનિભિસ્તત્ત્વદર્શિભિઃ ।
મુદં પ્રાપ નૃપઃ કામં પૌલોમીકૃતમાનસઃ ॥ ૫૦॥

આરુહ્ય શિબિકાં રમ્યાં સંસ્થિતસ્ત્વરયાન્વિતઃ ।
વાહાત્કૃત્વા મુનીન્દિવ્યાન્સર્પ સર્પેતિ ચાબ્રવીત્ ॥ ૫૧॥

કામાર્તઃ સોઽસ્પૃશન્મૂઢઃ પાદેન મુનિમસ્તકમ્ ।
અગસ્તિં તાપસશ્રેષ્ઠં લોપામુદ્રાપતિં તદા ॥ ૫૨॥

વાતાપિભક્ષકર્તારં સમુદ્રસ્યાપિ શોષકમ્ ।
કશયા તાડયામાસ પઞ્ચબાણશરાહતઃ ॥ ૫૩॥

ઇન્દ્રાણીહૃતચિત્તોઽસૌ સર્પેતિ પ્રબ્રુવન્મુનિમ્ ।
તં શશાપ મુનિઃ ક્રુદ્ધઃ કશાઘાતમનુસ્મરન્ ॥ ૫૪॥

સર્પો ભવ દુરાચાર વને ઘોરવપુર્મહાન્ ।
બહુવર્ષસહસ્રાણિ યત્ર ક્લેશો મહાન્ભવેત્ ॥ ૫૫॥

વિચરિષ્યસિ વીર્યેણ પુનઃ સ્વર્ગમવાપ્સ્યસિ ।
દૃષ્ટ્વા યુધિષ્ઠિરં નામ તવ મોક્ષો ભવિષ્યતિ ॥ ૫૬॥

પ્રશ્નાનામુત્તરં શ્રુત્વા ધર્મપુત્રમુખાત્તતઃ ।
વ્યાસ ઉવાચ ।
એવં શપ્તઃ સ રાજર્ષિઃ સ્તુત્વા તં મુનિસત્તમમ્ ॥ ૫૭॥

સ્વર્ગાત્પપાત સહસા સર્પરૂપધરોઽભવત્ ।
બૃહસ્પતિસ્તતો ગત્વા તરસા માનસં પ્રતિ ॥ ૫૮॥

ઇન્દ્રાય સર્વવૃત્તાન્તં કથયામાસ વિસ્તરાત્ ।
તચ્છ્રુત્વા મઘવા રાજ્ઞઃ સ્વર્ગાત્પ્રચ્યવનાદિકમ્ ॥ ૫૯॥

મુદિતોઽભૂન્મહારાજ સ્થિતસ્તત્રૈવ વાસવઃ ।
દેવાશ્ચ મુનયો દૃષ્ટ્વા નહુષં પતિતં ભુવિ ॥ ૬૦॥

જગ્મુઃ સર્વેઽપિ તત્રૈવ યત્રેન્દ્રઃ સરસિ સ્થિતઃ ।
તમાશ્વાસ્ય સુરાઃ સર્વે મુનિભિઃ સહિતાસ્તદા ॥ ૬૧॥

સ્વર્ગે સમાનયામાસુર્માનપૂર્વં શચીપતિમ્ ।

સમાગતં તતઃ શક્રં સર્વે તે મુનયઃ સુરાઃ ॥ ૬૨॥

સ્થાપયિત્વાઽઽસને પશ્ચાદભિષેકં દધુઃ શિવમ્ ।
ઇન્દ્રોઽપિ સ્વાસનં પ્રાપ્ય શચ્યા સહ સુરાલયે ॥ ૬૩॥

ચિક્રીડ નન્દને રમ્યે કાનને પ્રેમયુક્તયા ।
વ્યાસ ઉવાચ ।
એવમિન્દ્રેણ સમ્પ્રાપ્તં દુઃખં પરમદારુણમ્ ॥ ૬૪॥

હત્વાસુરં કામરૂપં વિશ્વરૂપં મહામુનિમ્ ।
પુનર્દેવ્યાઃ પ્રસાદેન સ્વસ્થાનં પ્રાપ્તવાન્નૃપ ॥ ૬૫॥

એતત્તે સર્વમાખ્યાતં વૃત્રાસુરવધાશ્રયમ્ ।
યત્પૃષ્ટોઽહં ત્વયા રાજન્ કથાનકમનુત્તમમ્ ॥ ૬૬॥

યાદૃશં કુરુતે કર્મ તાદૃશં ફલમાપ્નુયાત્ ।
અવશ્યમેવ ભોક્તવ્યં કૃતં કર્મ શુભાશુભમ્ ॥ ૬૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે
નહુષસ્વર્ગચ્યુતિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૬.૯॥

## ૬.૧૦ દશમોઽધ્યાયઃ । કર્મણાં ગહનગતિવર્ણનમ્ ।

જનમેજય ઉવાચ ।
કથિતં ચરિતં બ્રહ્મઞ્છક્રસ્યાદ્ભુતકર્મણઃ ।
સ્થાનભ્રંશસ્તથા દુઃખપ્રાપ્તિરુક્તા વિશેષતઃ ॥ ૧॥

યત્ર દેવાધિદેવ્યાશ્ચ મહિમાતીવ વર્ણિતઃ ।
સન્દેહોઽત્ર મમાપ્યસ્તિ યચ્છક્રોઽપિ મહાતપાઃ ॥ ૨॥

દેવાધિપત્યમાસાદ્ય દુઃસહં દુઃખમન્વભૂત્ ।
મખાનાં તુ શતં કૃત્વા પ્રાપ્તં સ્થાનમનુત્તમમ્ ॥ ૩॥

દેવેશત્વં ચ સમ્પ્રાપ્ય ભ્રષ્ટઃ સ્થાનાદસૌ કથમ્ ।
એતત્સર્વં સમાચક્ષ્વ કારણં કરુણાનિધે ॥ ૪॥

સર્વજ્ઞોઽસિ મુનિશ્રેષ્ઠ પુરાણાનાં પ્રવર્તકઃ ।
નાવાચ્યં મહતાં કિઞ્ચિચ્છિષ્યે ચ શ્રદ્ધયાન્વિતે ॥ ૫॥

તસ્માત્કુરુ મહાભાગ મત્સન્દેહાપનોદનમ્ ।
સૂત ઉવાચ ।
ઇતિ પૃષ્ટઃ સ રાજ્ઞા વૈ તદા સત્યવતીસુતઃ ॥ ૬॥

તમાહાતિપ્રસન્નાત્મા યથાનુક્રમમુત્તરમ્ ।
વ્યાસ ઉવાચ ।
નિબોધ નૃપતિશ્રેષ્ઠ કારણં પરમાદ્ભુતમ્ ॥ ૭॥

કર્મણસ્તુ ત્રિધા પ્રોક્તા ગતિસ્તત્ત્વવિદાં વરૈઃ ।
સઞ્ચિતં વર્તમાનં ચ પ્રારબ્ધમિતિ ભેદતઃ ॥ ૮॥

અનેકજન્મસઞ્જાતં પ્રાક્તનં સઞ્ચિતં સ્મૃતમ્ ।
સાત્ત્વિકં રાજસં કર્મ તામસં ત્રિવિધં પુનઃ ॥ ૯॥

શુભં વાપ્યશુભં ભૂપ સઞ્ચિતં બહુકાલિકમ્ ।
અવશ્યમેવ ભોક્તવ્યં સુકૃતં દુષ્કૃતં તથા ॥ ૧૦॥

જન્મજન્મનિ જીવાનાં સઞ્ચિતાનાં ચ કર્મણામ્ ।
નિઃશેષસ્તુ ક્ષયો નાભૂત્કલ્પકોટિશતૈરપિ ॥ ૧૧॥

ક્રિયમાણં ચ યત્કર્મ વર્તમાનં તદુચ્યતે ।
દેહં પ્રાપ્ય શુભં વાપિ હ્યશુભં વા સમાચરેત્ ॥ ૧૨॥

સઞ્ચિતાનાં પુનર્મધ્યાત્સમાહૃત્ય કિયાન્કિલ ।
દેહારમ્ભે ચ સમયે કાલઃ પ્રેરયતીવ તત્ ॥ ૧૩॥

પ્રારબ્ધં કર્મ વિજ્ઞેયં ભોગાત્તસ્ય ક્ષયઃ સ્મૃતઃ ।
પ્રાણિભિઃ ખલુ ભોક્તવ્યં પ્રારબ્ધં નાત્ર સંશયઃ ॥ ૧૪॥

પુરા કૃતાનિ રાજેન્દ્ર હ્યશુભાનિ શુભાનિ ચ ।
અવશ્યમેવ કર્માણિ ભોક્તવ્યાનીતિ નિશ્ચયઃ ॥ ૧૫॥

દેવૈર્મનુષ્યૈરસુરૈર્યક્ષગન્ધર્વકિન્નરૈઃ ।
કર્મૈવ હિ મહારાજ દેહારમ્ભસ્ય કારણમ્ ॥ ૧૬॥

કર્મક્ષયે જન્મનાશઃ પ્રાણિનાં નાત્ર સંશયઃ ।
બ્રહ્મા વિષ્ણુસ્તથા રુદ્ર ઇન્દ્રાદ્યાશ્ચ સુરાસ્તથા ॥ ૧૭॥

દાનવા યક્ષગન્ધર્વાઃ સર્વે કર્મવશા કિલ ।
અન્યથા દેહસમ્બન્ધઃ કથં ભવતિ ભૂપતે ॥ ૧૮॥

કારણં યસ્તુ ભોગસ્ય દેહિનઃ સુખદુઃખયોઃ ।
તસ્માદનેકજન્મોત્થસઞ્ચિતાનાં ચ કર્મણામ્ ॥ ૧૯॥

મધ્યે વેગઃ સમાયાતિ કસ્યચિત્કાલપાકતઃ ।
તત્પ્રારબ્ધવશાત્પુણ્યં કરોતિ ચ યથા તથા ॥ ૨૦॥

પાપં કરોતિ મનુજસ્તથા દેવાદયોઽપિ ચ ।
તથા નારાયણો રાજન્નરશ્ચ ધર્મજાવુભૌ ॥ ૨૧॥

જાતૌ કૃષ્ણાર્જુનૌ કામમંશૌ નારાયણસ્ય તૌ ।
પુરાણપીઠિકેયં વૈ મુનિભિઃ પરિકીર્તિતા ॥ ૨૨॥

દેવાંશઃ સ તુ વિજ્ઞેયો યો ભવેદ્વિભવાધિકઃ ।
નાનૃષિઃ કુરુતે કાવ્યં નારુદ્રો રુદ્રમર્ચતે ॥ ૨૩॥

નાદેવાંશો દદાત્યન્નં નાવિષ્ણુઃ પૃથિવીપતિઃ ।
ઇન્દ્રાદગ્નેર્યમાદ્વિષ્ણોર્ધનદાદિતિ ભૂપતે ॥ ૨૪॥

પ્રભુત્વં ચ પ્રભાવં ચ કોપં ચૈવ પરાક્રમમ્ ।
આદાય ક્રિયતે નૂનં શરીરમિતિ નિશ્ચયઃ ॥ ૨૫॥

યઃ કશ્ચિદ્બલવાઁલ્લોકે ભાગ્યવાનથ ભોગવાન્ ।
વિદ્યાવાન્દાનવાન્વાપિ સ દેવાંશઃ પ્રપદ્યતે ॥ ૨૬॥

તથૈવૈતે મયાખ્યાતા પાણ્ડવાઃ પૃથિવીપતે ।
દેવાંશો વાસુદેવોઽપિ નારાયણસમદ્યુતિઃ ॥ ૨૭॥

શરીરં પ્રાણિનાં નૂનં ભાજનં સુખદુઃખયોઃ ।
શરીરી પ્રાપ્નુયાત્કામં સુખં દુઃખમનન્તરમ્ ॥ ૨૮॥

દેહી નાસ્તિ વશઃ કોઽપિ દૈવાધીનઃ સદૈવ હિ ।
જનનં મરણં દુઃખં સુખં પ્રાપ્નોતિ ચાવશઃ ॥ ૨૯॥

પાણ્ડવાસ્તે વને જાતાઃ પ્રાપ્તાસ્તુ સ્વગૃહં પુનઃ ।
સ્વબાહુબલતઃ પશ્ચાદ્રાજસૂયં ક્રતૂત્તમમ્ ॥ ૩૦॥

વનવાસં પુનઃ પ્રાપ્તા બહુદુઃખકરં પરમ્ ।
અર્જુનેન તપસ્તપ્તં દુષ્કરં હ્યજિતેન્દ્રિયૈઃ ॥ ૩૧॥

સન્તુષ્ટૈસ્તુ સુરૈર્દત્તં વરદાનં પુનઃ શુભમ્ ।
નરદેહકૃતં પુણ્યં ક્વ ગતં વનવાસજમ્ ॥ ૩૨॥

નરદેહે તપસ્તપ્તં ચોગ્રં બદરિકાશ્રમે ।
નાર્જુનસ્ય શરીરે તત્ફલદં સમ્બભૂવ હ ॥ ૩૩॥

પ્રાણિનાં દેહસમ્બન્ધે ગહના કર્મણો ગતિઃ ।
દુર્જ્ઞેયા સર્વથા દેવૈર્માનવાનાં તુ કા કથા ॥ ૩૪॥

વાસુદેવોઽપિ સઞ્જાતઃ કારાગારેઽતિસઙ્કટે ।
નીતોઽસૌ વસુદેવેન નન્દગોપસ્ય ગોકુલમ્ ॥ ૩૫॥

એકાદશૈવ વર્ષાણિ સંસ્થિતસ્તત્ર ભારત ।
પુનઃ સ મથુરાં ગત્વા જઘાનોગ્રસુતં બલાત્ ॥ ૩૬॥

મોચયામાસ પિતરૌ બન્ધનાદ્ભૃશદુઃખિતૌ ।
ઉગ્રસેનં ચ રાજાનઞ્ચકાર મધુરાપુરે ॥ ૩૭॥

જગામ દ્વારવત્યાં સ મ્લેચ્છરાજભયાત્પુનઃ ।
સર્વં ભાવિવશાત્કૃષ્ણઃ કૃતવાન્પૌરુષં મહત્ ॥ ૩૮॥

કૃત્વા કાર્યાણ્યનેકાનિ દ્વારવત્યાં જનાર્દનઃ ।
દેહં ત્યક્ત્વા પ્રભાસે તુ સકુટુમ્બો દિવં ગતઃ ॥ ૩૯॥

પુત્રાઃ પૌત્રાશ્ચ સુહૃદો ભ્રાતરો જામયસ્તથા ।
પ્રભાસે યાદવાઃ સર્વે વિપ્રશાપાત્ક્ષયં ગતાઃ ॥ ૪૦॥

એવં તે કથિતા રાજન્ કર્મણો ગહના ગતિઃ ।
વાસુદેવોઽપિ વ્યાધસ્ય બાણેન નિધનં ગતઃ ॥ ૪૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં
સંહિતાયાં ષષ્ઠસ્કન્ધે કર્મણાં
ગહનગતિવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૬.૧૦॥

## ૬.૧૧ એકાદશોઽધ્યાયઃ । યુગધર્મવ્યવસ્થાવર્ણનમ્ ।

જનમેજય ઉવાચ ।
ભારાવતારણાર્થાય કથિતં જન્મ કૃષ્ણયોઃ ।
સંશયોઽયં દ્વિજશ્રેષ્ઠ હૃદયે મમ તિષ્ઠતિ ॥ ૧॥

પૃથિવી ગોસ્વરૂપેણ બ્રહ્માણં શરણં ગતા ।

દ્વાપરાન્તેઽતિદીનાર્તા ગુરુભારપ્રપીડિતા ॥ ૨॥

વેધસા પ્રાર્થિતો વિષ્ણુઃ કમલાપતિરીશ્વરઃ ।
ભૂભારોત્તારણાર્થાય સાધૂનાં રક્ષણાય ચ ॥ ૩॥

ભગવન્ ભારતે ખણ્ડે દેવૈઃ સહ જનાર્દન ।
અવતારં ગૃહાણાશુ વસુદેવગૃહે વિભો ॥ ૪॥

એવં સમ્પ્રાર્થિતો ધાત્રા ભગવાન્દેવકીસુતઃ ।
બભૂવ સહ રામેણ ભૂભારોત્તારણાય વૈ ॥ ૫॥

કિયાનુત્તારિતો ભારો હત્વા દુષ્ટાનનેકશઃ ।
જ્ઞાત્વા સર્વાન્દુરાચારાન્પાપબુદ્ધિનૃપાનિહ ॥ ૬॥

હતો ભીષ્મો હતો દ્રોણો વિરાટો દ્રુપદસ્તથા ।
બાહ્લીકઃ સોમદત્તશ્ચ કર્ણો વૈકર્તનસ્તથા ॥ ૭॥

યૈર્લુણ્ઠિતં ધનં સર્વં હૃતાશ્ચ હરિયોષિતઃ ।
કથં ન નાશિતા દુષ્ટા યે સ્થિતાઃ પૃથિવીતલે ॥ ૮॥

આભીરાશ્ચ શકા મ્લેચ્છા નિષાદાઃ કોટિશસ્તથા ।
ભારાવતરણં કિં તત્કૃતં કૃષ્ણેન ધીમતા ॥ ૯॥

સન્દેહોઽયં મહાભાગ ન નિવર્તતિ ચિત્તતઃ ।
કલાવસ્મિન્પ્રજાઃ સર્વાઃ પશ્યતઃ પાપનિશ્ચયાઃ ॥ ૧૦॥

વ્યાસ ઉવાચ ।
રાજન્ યસ્મિન્યુગે યાદૃક્પ્રજા ભવતિ કાલતઃ ।
નાન્યથા તદ્ભવેન્નૂનં યુગધર્મોઽત્ર કારણમ્ ॥ ૧૧॥

યે ધર્મરસિકા જીવાસ્તે વૈ સત્યયુગેઽભવન્ ।
ધર્માર્થરસિકા યે તુ તે વૈ ત્રેતાયુગેઽભવન્ ॥ ૧૨॥

ધર્માર્થકામરસિકા દ્વાપરે ચાભવન્યુગે ।
અર્થકામપરાઃ સર્વે કલાવસ્મિન્ભવન્તિ હિ ॥ ૧૩॥

યુગધર્મસ્તુ રાજેન્દ્ર ન યાતિ વ્યત્યયં પુનઃ ।
કાલઃ કર્તાસ્તિ ધર્મસ્ય હ્યધર્મસ્ય ચ વૈ પુનઃ ॥ ૧૪॥

રાજોવાચ ।
યે તુ સત્યયુગે જીવા ભવન્તિ ધર્મતત્પરાઃ ।

કુત્ર તેઽદ્ય મહાભાગ તિષ્ઠન્તિ પુણ્યભાગિનઃ ॥ ૧૫॥

ત્રેતાયુગે દ્વાપરે વા યે દાનવ્રતકારકાઃ ।
વર્તન્તે મુનયઃ શ્રેષ્ઠાઃ કુત્ર બ્રૂહિ પિતામહ ॥ ૧૬॥

કલાવદ્ય દુરાચારા યેઽત્ર સન્તિ ગતત્રપાઃ ।
આદ્યે યુગે ક્વ યાસ્યન્તિ પાપિષ્ઠા દેવનિન્દકાઃ ॥ ૧૭॥

એતત્સર્વં સમાચક્ષ્વ વિસ્તરેણ મહામતે ।
સર્વથા શ્રોતુકામોઽસ્મિ યદેતદ્ધર્મનિર્ણયમ્ ॥ ૧૮॥

વ્યાસ ઉવાચ ।
યે વૈ કૃતયુગે રાજન્ સમ્ભવન્તીહ માનવાઃ ।
કૃત્વા તે પુણ્યકર્માણિ દેવલોકાન્વ્રજન્તિ વૈ ॥ ૧૯॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચ નૃપસત્તમ ।
સ્વધર્મનિરતા યાન્તિ લોકાન્કર્મજિતાન્કિલ ॥ ૨૦॥

સત્યં દયા તથા દાનં સ્વદારગમનં તથા ।
અદ્રોહઃ સર્વભૂતેષુ સમતા સર્વજન્તુષુ ॥ ૨૧॥

એતત્સાધારણં ધર્મં કૃત્વા સત્યયુગે પુનઃ ।
સ્વર્ગં યાન્તીતરે વર્ણા ધર્મતો રજકાદયઃ ॥ ૨૨॥

તથા ત્રેતાયુગે રાજન્ દ્વાપરેઽથ યુગે તથા ।
કલાવસ્મિન્યુગે પાપા નરકં યાન્તિ માનવાઃ ॥ ૨૩॥

તાવત્તિષ્ઠન્તિ તે તત્ર યાવત્સ્યાદ્યુગપર્યયઃ ।
પુનશ્ચ માનુષે લોકે ભવન્તિ ભુવિ માનવાઃ ॥ ૨૪॥

યદા સત્યયુગસ્યાદિઃ કલેરન્તશ્ચ પાર્થિવ ।
તદા સ્વર્ગાત્પુણ્યકૃતો જાયન્તે કિલ માનવાઃ ॥ ૨૫॥

યદા કલિયુગસ્યાદિર્દ્વાપરસ્ય ક્ષયસ્તથા ।
નરકાત્પાપિનઃ સર્વે ભવન્તિ ભુવિ માનવાઃ ॥ ૨૬॥

એવં કાલસમાચારો નાન્યથાભૂત્કદાચન ।
તસ્માત્કલિરસત્કર્તા તસ્મિંસ્તુ તાદૃશી પ્રજા ॥ ૨૭॥

કદાચિદ્દૈવયોગાત્તુ પ્રાણિનાં વ્યત્યયો ભવેત્ ।
કલૌ યે સાધવઃ કેચિદ્દ્વાપરે સમ્ભવન્તિ તે ॥ ૨૮॥

તથા ત્રેતાયુગે કેચિત્કેચિત્સત્યયુગે તથા ।
દુષ્ટાઃ સત્યયુગે યે તુ તે ભવન્તિ કલાવપિ ॥ ૨૯॥

કૃતકર્મપ્રભાવેણ પ્રાપ્નુવન્ત્યસુખાનિ ચ ।
પુનશ્ચ તાદૃશં કર્મ કુર્વન્તિ યુગભાવતઃ ॥ ૩૦॥

જનમેજય ઉવાચ ।
યુગધર્માન્મહાભાગ બ્રૂહિ સર્વાનશેષતઃ ।
યસ્મિન્વૈ યાદૃશો ધર્મો જ્ઞાતુમિચ્છામિ તં તથા ॥ ૩૧॥

વ્યાસ ઉવાચ ।
નિબોધ નૃપશાર્દૂલ દૃષ્ટાન્તં તે બ્રવીમ્યહમ્ ।
સાધૂનામપિ ચેતાંસિ યુગભાવાદ્ભ્રમન્તિ હિ ॥ ૩૨॥

પિતુર્યથા તે રાજેન્દ્ર વુદ્ધિર્વિપ્રાવહેલને ।
કૃતા વૈ કલિના રાજન્ ધર્મજ્ઞસ્ય મહાત્મનઃ ॥ ૩૩॥

અન્યથા ક્ષત્રિયો રાજા યયાતિકુલસમ્ભવઃ ।
તાપસસ્ય ગલે સર્પં મૃતં કસ્માદયોજયત્ ॥ ૩૪॥

સર્વં યુગબલં રાજન્વેદિતવ્યં વિજાનતા ।
પ્રયત્નેન હિ કર્તવ્યં ધર્મકર્મ વિશેષતઃ ॥ ૩૫॥

નૂનં સત્યયુગે રાજન્ બ્રાહ્મણા વેદપારગાઃ ।
પરાશક્ત્યર્ચનરતા દેવીદર્શનલાલસાઃ ॥ ૩૬॥

ગાયત્રીપ્રણવાસક્તા ગાયત્રીધ્યાનકારિણઃ ।
ગાયત્રીજપસંસક્તા માયાબીજૈકજાપિનઃ ॥ ૩૭॥

ગ્રામે ગ્રામે પરામ્બાયાઃ પ્રાસાદકરણોત્સુકાઃ ।
સ્વકર્મનિરતાઃ સર્વે સત્યશૌચદયાન્વિતાઃ ॥ ૩૮॥

ત્રય્યુક્તકર્મનિરતાસ્તત્ત્વજ્ઞાનવિશારદાઃ ।
અભવન્ક્ષત્રિયાસ્તત્ર પ્રજાભરણતત્પરાઃ ॥ ૩૯॥

વૈશ્યાસ્તુ કૃષિવાણિજ્યગોસેવાનિરતાસ્તથા ।
શૂદ્રાઃ સેવાપરાસ્તત્ર પુણ્યે સત્યયુગે નૃપ ॥ ૪૦॥

પરામ્બાપૂજનાસક્તાઃ સર્વે વર્ણાઃ પરે યુગે ।

તથા ત્રેતાયુગે કિઞ્ચિન્ન્યૂના ધર્મસ્ય સંસ્થિતિઃ ॥ ૪૧॥

દ્વાપરે ચ વિશેષેણ ન્યૂના સત્યયુગસ્થિતિઃ ।
પૂર્વં યે રાક્ષસા રાજન્ તે કલૌ બ્રાહ્મણાઃ સ્મૃતાઃ ॥ ૪૨॥

પાખણ્ડનિરતાઃ પ્રાયો ભવન્તિ જનવઞ્ચકાઃ ।
અસત્યવાદિનઃ સર્વે વેદધર્મવિવર્જિતાઃ ॥ ૪૩॥

દામ્ભિકા લોકચતુરા માનિનો વેદવર્જિતાઃ ।
શૂદ્રસેવાપરાઃ કેચિન્નાનાધર્મપ્રવર્તકાઃ ॥ ૪૪॥

વેદનિન્દાકરાઃ ક્રૂરા ધર્મભ્રષ્ટાતિવાદુકાઃ ।
યથા યથા કલિર્વૃદ્ધિં યાતિ રાજંસ્તથા તથા ॥ ૪૫॥

ધર્મસ્ય સત્યમૂલસ્ય ક્ષયઃ સર્વાત્મના ભવેત્ ।
તથૈવ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચ ધર્મવર્જિતાઃ ॥ ૪૬॥

અસત્યવાદિનઃ પાપાસ્તથા વર્ણેતરાઃ કલૌ ।
શૂદ્રધર્મરતા વિપ્રાઃ પ્રતિગ્રહપરાયણાઃ ॥ ૪૭॥

ભવિષ્યન્તિ કલૌ રાજન્ યુગે વૃદ્ધિં ગતાઃ કિલ ।
કામચારાઃ સ્ત્રિયઃ કામલોભમોહસમન્વિતાઃ ॥ ૪૮॥

પાપા મિથ્યાભિવાદિન્યઃ સદા ક્લેશરતા નૃપ ।
સ્વભર્તૃવઞ્જકા નિત્યં ધર્મભાષણપણ્ડિતાઃ ॥ ૪૯॥

ભવન્ત્યેવંવિધા નાર્યઃ પાપિષ્ઠાશ્ચ કલૌ યુગે ।
આહારશુદ્ધ્યા નૃપતે ચિત્તશુદ્ધિસ્તુ જાયતે ॥ ૫૦॥

શુદ્ધે ચિત્તે પ્રકાશઃ સ્યાદ્ધર્મસ્ય નૃપસત્તમ ।
વૃત્તસઙ્કરદોષેણ જાયતે ધર્મસઙ્કરઃ ॥ ૫૧॥

ધર્મસ્ય સઙ્કરે જાતે નૂનં સ્યાદ્વર્ણસઙ્કરઃ ।
એવં કલિયુગે ભૂપ સર્વધર્મવિવર્જિતે ॥ ૫૨॥

સ્વવર્ણધર્મવાર્તૈષા ન કુત્રાપ્યુપલભ્યતે ।
મહાન્તોઽપિ ચ ધર્મજ્ઞા અધર્મં કુર્વતે નૃપ ॥ ૫૩॥

કલિસ્વભાવ એવૈષ પરિહાર્યો ન કેનચિત્ ।
તસ્માદત્ર મનુષ્યાણાં સ્વભાવાત્પાપકારિણામ્ ॥ ૫૪॥

નિષ્કૃતિર્ન હિ રાજેન્દ્ર સામાન્યોપાયતો ભવેત્ ।
જનમેજય ઉવાચ ।
ભગવન્સર્વધર્મજ્ઞ સર્વશાસ્ત્રવિશારદ ॥ ૫૫॥

કલાવધર્મબહુલે નરાણાં કા ગતિર્ભવેત્ ।
યદ્યસ્તિ તદુપાયશ્ચેદ્દયયા તં વદસ્વ મે ॥ ૫૬॥

વ્યાસ ઉવાચ ।
એક એવ મહારાજ તત્રોપાયોઽસ્તિ નાપરઃ ।
સર્વદોષનિરાસાર્થં ધ્યાયેદ્દેવીપદામ્બુજમ્ ॥ ૫૭॥

ન સન્ત્યઘાનિ તાવન્તિ યાવતી શક્તિરસ્તિ હિ ।
નાસ્તિ દેવ્યાઃ પાપદાહે તસ્માદ્ભીતિઃ કુતો નૃપ ॥ ૫૮॥

અવશેનાપિ યન્નામ લીલયોચ્ચારિતં યદિ ।
કિં કિં દદાતિ તજ્જ્ઞાતું સમર્થા ન હરાદયઃ ॥ ૫૯॥

પ્રાયશ્ચિત્તં તુ પાપાનાં શ્રીદેવીનામસંસ્મૃતિઃ ।
તસ્માત્કલિભયાદ્રાજન્ પુણ્યક્ષેત્રે વસેન્નરઃ ॥ ૬૦॥

નિરન્તરં પરામ્બાયા નામસંસ્મરણં ચરેત્ ।
છિત્ત્વા ભિત્ત્વા ચ ભૂતાનિ હત્વા સર્વમિદં જગત્ ॥ ૬૧॥

દેવીં નમતિ ભક્ત્યા યો ન સ પાપૈર્વિલિપ્યતે ।
રહસ્યં સર્વશાસ્ત્રાણાં મયા રાજન્નુદીરિતમ્ ॥ ૬૨॥

વિમૃશ્યૈતદશેષેણ ભજ દેવીપદામ્બુજમ્ ।
અજપાં નામ ગાયત્રીં જપન્તિ નિખિલા જનાઃ ॥ ૬૩॥

મહિમાનં ન જાનન્તિ માયાયા વૈભવં મહત્ ।
ગાયત્રીં બ્રાહ્મણાઃ સર્વે જપન્તિ હૃદયાન્તરે ॥ ૬૪॥

મહિમાનં ન જાનન્તિ માયાયા વૈભવં મહત્ ।
એતત્સર્વં સમાખ્યાતં યત્પૃષ્ટં તત્ત્વયા નૃપ ।
યુગધર્મવ્યવસ્થાયાં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે યુગધર્મવ્યવસ્થાવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૬.૧૧॥

## ૬.૧૨ દ્વાદશોઽધ્યાયઃ । હરિશ્ચન્દ્રસ્ય જલોદરવ્યાધિપીડાવર્ણનમ્ ।

રાજોવાચ ।
તીર્થાનિ ભુવિ પુણ્યાનિ બ્રૂહિ મે મુનિસત્તમ ।
ગમ્યાનિ માનવૈર્દેવૈઃ ક્ષેત્રાણિ સરિતસ્તથા ॥ ૧॥

ફલં ચ યાદૃશં યત્ર તીર્થેષુ સ્નાનદાનતઃ ।
વિધિં તુ તીર્થયાત્રાયાં નિયમાંશ્ચ વિશેષતઃ ॥ ૨॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ તીર્થાનિ વિવિધાનિ ચ ।
યેષુ તીર્થેષુ દેવીનાં પ્રશસ્તાન્યાયનાનિ ચ ॥ ૩॥

નદીનાં જાહ્નવી શ્રેષ્ઠા યમુના ચ સરસ્વતી ।
નર્મદા ગણ્ડકી સિન્ધુર્ગોમતી તમસા તથા ॥ ૪॥

કાવેરી ચન્દ્રભાગા ચ પુણ્યા વેત્રવતી શુભા ।
ચર્મણ્વતી ચ સરયૂસ્તાપી સાભ્રમતી તથા ॥ ૫॥

એતાશ્ચ કથિતા રાજન્નન્યાશ્ચ શતશઃ પુનઃ ।
તાસાં સમુદ્રગાઃ પુણ્યાઃ સ્વલ્પપુણ્યા હ્યનબ્ધિગાઃ ॥ ૬॥

સમુદ્રગાનાં તાઃ પુણ્યાઃ સર્વદૌઘવહાસ્તુ યાઃ ।
માસદ્વયં શ્રાવણાદૌ તાશ્ચ સર્વા રજસ્વલાઃ ॥ ૭॥

ભવન્તિ વૃષ્ટિયોગેન ગ્રામ્યવારિવહાસ્તથા ।
પુષ્કરં ચ કુરુક્ષેત્રં ધર્મારણ્યં સુપાવનમ્ ॥ ૮॥

પ્રભાસં ચ પ્રયાગં ચ નૈમિષારણ્યમેવ ચ ।
વિશ્રુતં ચાર્બુદારણ્યં શૈલાશ્ચ પાવનાસ્તથા ॥ ૯॥

શ્રીશૈલશ્ચ સુમેરુશ્ચ પર્વતો ગન્ધમાદનઃ ।
સરાંસિ ચૈવ પુણ્યાનિ માનસં સર્વવિશ્રુતમ્ ॥ ૧૦॥

તથા બિન્દુસરઃ શ્રેષ્ઠમચ્છોદં નામ પાવનમ્ ।
આશ્રમાસ્તુ તથા પુણ્યા મુનીનાં ભાવિતાત્મનામ્ ॥ ૧૧॥

વિશ્રુતસ્તુ સદા પુણ્યઃ ખ્યાતો બદરિકાશ્રમઃ ।
નરનારાયણૌ યત્ર તેપાતે તૌ મુની તપઃ ॥ ૧૨॥

વામનાશ્રમ આખ્યાતઃ શતયૂપાશ્રમસ્તથા ।

યેન યત્ર તપસ્તપ્તં તસ્ય નામ્નાતિવિશ્રુતઃ ॥ ૧૩॥

એવં પુણ્યાનિ સ્થાનાનિ હ્યસઙ્ખ્યાતાનિ ભૂતલે ।
મુનિભિઃ પરિગીતાનિ પાવનાનિ મહીપતે ॥ ૧૪॥

એષુ સ્થાનેષુ સર્વત્ર દેવીસ્થાનાનિ ભૂપતે ।
દર્શનાત્પાપહારીણિ વસન્તિ નિયમેન ચ ॥ ૧૫॥

કથયિષ્યામિ તાન્યગ્રે પ્રસઙ્ગેન ચ કાનિચિત્ ।
તીર્થાનિ નૃપ દાનાનિ વ્રતાનિ ચ મખાસ્તથા ॥ ૧૬॥

તપાંસિ પુણ્યકર્માણિ સાપેક્ષાણિ મહીપતે ।
દ્રવ્યશુદ્ધિં ક્રિયાશુદ્ધિં મનઃશુદ્ધિમપેક્ષ્ય ચ ॥ ૧૭॥

પાવનાનિ હિ તીર્થાનિ તપાંસિ ચ વ્રતાનિ ચ ।
કદાચિદ્દ્રવ્યશુદ્ધિઃ સ્યાત્ક્રિયાશુદ્ધિઃ કદાચન ॥ ૧૮॥

દુર્લભા મનસઃ શુદ્ધિઃ સર્વેષાં સર્વદા નૃપ ।
મનસ્તુ ચઞ્ચલં રાજન્નનેકવિષયાશ્રિતમ્ ॥ ૧૯॥

કથં શુદ્ધં ભવેદ્રાજન્નાનાભાવસમાશ્રિતમ્ ।
કામક્રોધૌ તથા લોભો હ્યહઙ્કારો મદસ્તથા ॥ ૨૦॥

સર્વવિઘ્નકરા હ્યેતે તપસ્તીર્થવ્રતેષુ ચ ।
અહિંસા સત્યમસ્તેયં શૌચમિન્દ્રિયનિગ્રહઃ ॥ ૨૧॥

સ્વધર્મપાલનં રાજન્ સર્વતીર્થફલપ્રદમ્ ।
નિત્યકર્મપરિત્યાગાન્માર્ગે સંસર્ગદોષતઃ ॥ ૨૨॥

વ્યર્થં તીર્થાધિગમનં પાપમેવાવશિષ્યતે ।
ક્ષાલયન્તિ હિ તીર્થાનિ સર્વથા દેહજં મલમ્ ॥ ૨૩॥

માનસં ક્ષાલિતું તાનિ ન સમર્થાનિ વૈ નૃપ ।
શક્તાનિ યદિ ચેત્તાનિ ગઙ્ગાતીરનિવાસિનઃ ॥ ૨૪॥

મુનયો દ્રોહસંયુક્તાઃ કથં સ્યુર્ભાવિતેશ્વરાઃ ।
વસિષ્ઠસદૃશાઃ પ્રહ્વા વિશ્વામિત્રાદયઃ કિલ ॥ ૨૫॥

રાગદ્વેષરતાઃ સર્વે કામક્રોધાકુલાઃ સદા ।
ચિત્તશુદ્ધિમયં તીર્થં ગઙ્ગાદિભ્યોઽતિપાવનમ્ ॥ ૨૬॥

યદિ સ્યાદ્દૈવયોગેન ક્ષાલયત્યાન્તરં મલમ્ ।
વિશેષેણ તુ સત્સઙ્ગો જ્ઞાનનિષ્ઠસ્ય ભૂપતે ॥ ૨૭॥

ન વેદા ન ચ શાસ્ત્રાણિ ન વ્રતાનિ તપાંસિ ન ।
ન મખા ન ચ દાનાનિ ચિત્તશુદ્ધેસ્તુ કારણમ્ ॥ ૨૮॥

વસિષ્ઠો બ્રહ્મણઃ પુત્રો વેદવિદ્યાવિશારદઃ ।
રાગદ્વેષાન્વિતઃ કામં ગઙ્ગાતીરસમાશ્રિતઃ ॥ ૨૯॥

આડીબકં મહાયુદ્ધં વિશ્વામિત્રવસિષ્ઠયોઃ ।
જાતં નિરર્થકં દ્વેષાદ્દેવાનાં વિસ્મયપ્રદમ્ ॥ ૩૦॥

વિશ્વામિત્રો બકસ્તત્ર જાતઃ પરમતાપસઃ ।
શપ્તઃ સ તુ વસિષ્ઠેન હરિશ્ચન્દ્રસ્ય કારણાત્ ॥ ૩૧॥

કૌશિકેન વસિષ્ઠોઽપિ શપ્ત્વાડીદેહભાક્કૃતઃ ।
શાપાદાડીબકૌ જાતૌ તૌ મુની વિશદપ્રભૌ ॥ ૩૨॥

નિવાસં પ્રાપતુસ્તીરે સરસો માનસસ્ય ચ ।
ચક્રતુર્દારુણં યુદ્ધં નખચઞ્ચુપ્રતાડનૈઃ ॥ ૩૩॥

વર્ષાણામયુતં યાવત્તાવૃષી રોષસંયુતૌ ।
યુયુધાતે મદોન્મત્તૌ સિંહાવિવ પરસ્પરમ્ ॥ ૩૪॥

રાજોવાચ ।
કથં તૌ મુનિશાર્દૂલૌ તાપસૌ ધર્મતત્પરૌ ।
પરસ્પરં વૈરપરૌ સઞ્જાતૌ કેન હેતુના ॥ ૩૫॥

શાપં પરસ્પરં કેન કારણેન મહામતી ।
દત્તવન્તૌ મિથઃ ક્લેશકારકૌ દુઃખદૌ નૃણામ્ ॥ ૩૬॥

વ્યાસ ઉવાચ ।
હરિશ્ચન્દ્રો નૃપશ્રેષ્ઠસ્ત્રિશઙ્કુતનયઃ પુરા ।
બભૂવ રવિવંશીયો રામચન્દ્રસ્ય પૂર્વજઃ ॥ ૩૭॥

અનપત્યઃ સ રાજર્ષિર્વરુણાય મહાક્રતુમ્ ।
પ્રતિજજ્ઞે પુત્રકામો નરમેધં દુરાસદમ્ ॥ ૩૮॥

વરુણસ્તસ્ય સન્તુષ્ટો યજ્ઞસ્ય નિયમે કૃતે ।
દધાર ગર્ભં રાજ્ઞસ્તુ ભાર્યા પરમસુન્દરી ॥ ૩૯॥

રાજા બભૂવ સન્તુષ્ટો દૃષ્ટ્વા ભાર્યાં સદોહદામ્ ।
ચકાર વિધિવત્કર્મ ગર્ભસંસ્કારકારકમ્ ॥ ૪૦॥

સુષુવે તનયં નારી સર્વલક્ષણસંયુતમ્ ।
મુદં પ્રાપ નૃપસ્તત્ર પુત્રે જાતે વિશામ્પતે ॥ ૪૧॥

કૃતવાઞ્જાતકર્માદિસંસ્કારવિધિમુત્તમમ્ ।
દદૌ હિરણ્યં ગા દોગ્ધીર્બ્રાહ્મણેભ્યો વિશેષતઃ ॥ ૪૨॥

જન્મોત્સવેઽતિસંવૃત્તે ગેહે વૈ યાદસામ્પતિઃ ।
આજગામ મહારાજ વિપ્રવેષધરસ્તથા ॥ ૪૩॥

પૂજિતઃ પાર્થિવેનાથ દત્ત્વા વિધિવદાસનમ્ ।
કાર્યે પૃષ્ટેઽબ્રવીદ્વાક્યં વરુણોઽસ્મીતિ ભૂપતિમ્ ॥ ૪૪॥

કુરુ યજ્ઞં સુતં કૃત્વા પશું પરમપાવનમ્ ।
સત્યવાગ્ભવ રાજેન્દ્ર સઙ્કલ્પસ્તુ ત્વયા કૃતઃ ॥ ૪૫॥

તચ્છ્રુત્વા વચનં રાજા વિહ્વલોઽતિવ્યથાકુલઃ ।
સંસ્તભ્યાધિં નૃપઃ પ્રાહ વરુણં સત્કૃતાઞ્જલિઃ ॥ ૪૬॥

સ્વામિન્કરોમિ તં યજ્ઞં સર્વથા વિધિપૂર્વકમ્ ।
મયા તે યત્પ્રતિજ્ઞાતં ભવામિ સત્યવાગહમ્ ॥ ૪૭॥

પૂર્ણે માસે વિશુધ્યેત ધર્મપત્ની સુરોત્તમ ।
વિશુદ્ધાયાં તુ ભાર્યાયાં કર્તવ્યઃ સ પશોર્મખઃ ॥ ૪૮॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તે વચને રાજ્ઞા વરુણઃ સ્વગૃહં ગતઃ ।
રાજા બભૂવ સન્તુષ્ટઃ કિઞ્ચિચ્ચિન્તાતુરસ્તથા ॥ ૪૯॥

પૂર્ણે માસિ પુનઃ પાશી પરીક્ષાર્થં નૃપાલયે ।
આજગામ દ્વિજો ભૂત્વા સુવેષઃ સુષ્ઠુભાષકઃ ॥ ૫૦॥

કૃતાર્હણં સુખાસીનં ભૂપતિસ્તં સુરોત્તમમ્ ।
ઉવાચ વિનયોપેતો હેતુગર્ભં વચસ્તદા ॥ ૫૧॥

અસંસ્કૃતં સુતં સ્વામિન્યૂપે બધ્નામિ તં કથમ્ ।
સંસ્કૃત્ય ક્ષત્રિયં કૃત્વા યજેઽહં યજ્ઞમુત્તમમ્ ॥ ૫૨॥

દયસે યદિ દેવ ત્વં જ્ઞાત્વા દીનં સ્વસેવકમ્ ।

અસંસ્કૃતસ્ય બાલસ્ય નાધિકારોઽસ્તિ કુત્રચિત્ ॥ ૫૩॥

વરુણ ઉવાચ ।
પ્રતારયસિ રાજેન્દ્ર કૃત્વા સમયમગ્રતઃ ।
દુસ્ત્યજસ્તવ જાનામિ સુતસ્નેહો હ્યપુત્રિણઃ ॥ ૫૪॥

ગૃહં વ્રજામિ ભૂપાલ વચનાત્તવ કોમલાત્ ।
કિયત્કાલં પ્રતીક્ષ્યાહમાગમિષ્યામિ તે ગૃહમ્ ॥ ૫૫॥

ભવિતવ્યં ત્વયા તાત તદા સત્યવચોઽન્વિતમ્ ।
અન્યથા ત્વયિ મુઞ્ચામિ કોપં શાપસમન્વિતમ્ ॥ ૫૬॥

રાજોવાચ ।
સમાવર્તનકર્માન્તે સર્વથા યાદસામ્પતે ।
કૃત્વા પુત્રપશું યજ્ઞે યજિષ્યે વિધિપૂર્વકમ્ ॥ ૫૭॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં રાજ્ઞો વરુણઃ પ્રીતમાનસઃ ।
તથેત્યુક્ત્વા યયૌ તૂર્ણં નૃપસ્તુ સુસ્થિતોઽભવત્ ॥ ૫૮॥

રોહિતાખ્ય ઇતિ ખ્યાતઃ સુતસ્તસ્ય વિવૃદ્ધિમાન્ ।
સઞ્જાતશ્ચતુરઃ સર્વવિદ્યાનાં ચ વિશારદઃ ॥ ૫૯॥

યજ્ઞસ્ય કારણં તેન જ્ઞાતં સર્વં સવિસ્તરમ્ ।
ભયભીતસ્તતઃ સોઽપિ મત્વા મરણમાત્મનઃ ॥ ૬૦॥

કૃત્વા પલાયનં વીરો ગતોઽસૌ ગિરિગહ્વરે ।
અગમ્યે નૃપતિસ્થાને સ્થિતસ્તત્ર ભયાતુરઃ ॥ ૬૧॥

પ્રાપ્તે કાલેઽથ વરુણો યજ્ઞાર્થી નૃપતેર્ગૃહમ્ ।
ગત્વા તમાહ ભૂપાલં કુરુ યજ્ઞં વિશામ્પતે ॥ ૬૨॥

પ્રમ્લાનવદનો રાજા તમાહ વ્યથિતેન્દ્રિયઃ ।
કિં કરોમિ ગતઃ ક્વાપિ સુતો મે સુરસત્તમ ॥ ૬૩॥

શ્રુત્વા તદ્વચનં રાજ્ઞઃ કુપિતો યાદસામ્પતિઃ ।
શશાપ તં નૃપં કોપાદસત્યવાદિનં ભૃશમ્ ॥ ૬૪॥

જલોદરાભિધો વ્યાધિર્દેહે ભવતુ તે નૃપ ।
યતઃ પ્રતારિતશ્ચાહં કૃત્વા કપટપણ્ડિત ॥ ૬૫॥

ઇતિ શપ્ત્વા યયૌ ધામ સ્વકં પાશધરસ્તદા ।
રાજા ચિન્તાતુરસ્તસ્થૌ ભવને વ્યાધિપીડિતઃ ॥ ૬૬॥

યદાતિવ્યાધિતો રાજા રોગેણ શાપજેન હ ।
તદા શુશ્રાવ પુત્રોઽપિ પિતરં વ્યાધિપીડિતમ્ ॥ ૬૭॥

પાન્થિકઃ પ્રાહ પુત્રં હિ પિતા તે ભૃશદુઃખિતઃ ।
જલોદરવિકારેણ શાપજેન નૃપાત્મજ ॥ ૬૮॥

વિનષ્ટં જીવિતં તેઽદ્ય વૃથા જાતસ્ય દુર્મતે ।
યત્ત્યક્ત્વા પિતરં દુઃસ્થં પ્રાપ્તોઽસિ ગિરિગહ્વરમ્ ॥ ૬૯॥

કિમનેન શરીરેણ પ્રાપ્તં તે જન્મનઃ ફલમ્ ।
દેહદં દુઃખિતં કૃત્વા સ્થિતોઽસ્યત્ર સુતાધમ ॥ ૭૦॥

પ્રાણાસ્ત્યાજ્યાઃ પિતુઃ કાર્યે સત્પુત્રેણેતિ નિશ્ચયઃ ।
ત્વદર્થે દુઃખિતો રાજા ક્રન્દતિ વ્યાધિપીડિતઃ ॥ ૭૧॥

વ્યાસ ઉવાચ ।
તદાકર્ણ્ય વચસ્તથ્યં પાન્થિકાદ્ધર્મસંયુતમ્ ।
યદા ચક્રે મનો ગન્તું દ્રષ્ટું તાતં વ્યથાતુરમ્ ॥ ૭૨॥

તદા વિપ્રવપુર્ભૂત્વા વાસવસ્તમુપાગમત્ ।
રહઃ પ્રાહ હિતં વાક્યં દયાવાનિવ ભારત ॥ ૭૩॥

મૂર્ખોઽસિ રાજપુત્ર ત્વં ગમનાય મતિં વૃથા ।
કરોષિ પિતરં ત્વદ્ય ન જાનાસિ વ્યથાયુતમ્ ॥ ૭૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
હરિશ્ચન્દ્રસ્ય જલોદરવ્યાધિપીડાવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૬.૧૨॥

## ૬.૧૩ ત્રયોદશોઽધ્યાયઃ । આડીબકયુદ્ધ વર્ણનસહિતં દેવીમાહાત્મ્યવર્ણનમ્ ।

ઇન્દ્ર ઉવાચ ।
સાહસં કૃતવાન્ રાજા પૂર્વં યત્કથિતો મખઃ ।
વરુણાય પ્રતિજ્ઞાતઃ પુત્રં કૃત્વા પશું પ્રિયમ્ ॥ ૧॥

ગતે ત્વયિ પિતા પુત્રં બદ્ધ્વા યૂપેઽઘૃણઃ પુનઃ ।
પશું કૃત્વા મહાબુદ્ધે વધિષ્યતિ વ્યથાતુરઃ ॥ ૨॥

ઇત્થં નિષિદ્ધસ્તત્પુત્રઃ શક્રેણામિતતેજસા ।
સ્થિતસ્તત્રૈવ માયેશીમાયયા મોહિતો ભૃશમ્ ॥ ૩॥

યદા પુનઃ પુનઃ શ્રુત્વા પિતરં રોગપીડિતમ્ ।
ગમનાય મતિં ચક્રે તદેન્દ્રઃ પ્રત્યષેધયત્ ॥ ૪॥

હરિશ્ચન્દ્રોઽતિદુઃખાર્તઃ પપ્રચ્છ ગુરુમન્તિકે ।
સ્થિતં વસિષ્ઠમેકાન્તે સર્વજ્ઞં હિતતત્પરમ્ ॥ ૫॥

રાજોવાચ ।
ભગવન્ કિ કરોમ્યદ્ય કાતરોઽસ્મિ વ્યથાકુલઃ ।
ત્રાહિ માં દુઃખમનસં મહાવ્યાધિભયાતુરમ્ ॥ ૬॥

વસિષ્ઠ ઉવાચ ।
શૃણુ રાજન્નુપાયોઽસ્તિ રોગનાશં પ્રતિ સ્તુતઃ ।
ત્રયોદશવિધાઃ પુત્રાઃ કથિતા ધર્મસઙ્ગ્રહે ॥ ૭॥

તસ્માત્ક્રીતં સુતં કૃત્વા યજસ્વ મખમુત્તમમ્ ।
દ્રવ્યં દત્ત્વા યથોદ્દિષ્ટમાનયસ્વ દ્વિજોત્તમમ્ ॥ ૮॥

એવં કૃતે મખે ભૂપ રોગનાશો ભવિષ્યતિ ।
વરુણોઽપિ પ્રસન્નાત્મા ભવિષ્યતિ યથાસુખમ્ ॥ ૯॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા રાજા પ્રોવાચ મન્ત્રિણમ્ ।
અન્વેષય મહાબુદ્ધે વિષયેષ્વતિયત્નતઃ ॥ ૧૦॥

કદાચિત્કોઽપિ લોભાર્થી દદાતિ સ્વસુતં પિતા ।
સમાનય ધનં દત્ત્વા યાવત્પ્રાર્થયતેઽપ્યસૌ ॥ ૧૧॥

સર્વથૈવ સમાનેયો યજ્ઞાર્થે દ્વિજબાલકઃ ।
ન કાર્યા કૃપણા બુદ્ધિસ્ત્વયા મત્કાર્યહેતવે ॥ ૧૨॥

પ્રાર્થનીયસ્ત્વયા પુત્રઃ કસ્યચિદ્દ્વિજવાદિનઃ ।
દ્રવ્યેણ દેહિ યજ્ઞાર્થં કર્તવ્યોઽસૌ પશુઃ કિલ ॥ ૧૩॥

ઇતિ સઞ્ચોદિતસ્તેન સચિવઃ કાર્યહેતવે ।
અન્વેષયામાસ પુરે ગ્રામે ગ્રામે ગૃહે ગૃહે ॥ ૧૪॥

એવમન્વેષતસ્તસ્ય વિષયે કશ્ચિદાતુરઃ ।

નિર્ધનસ્ત્રિસુતશ્ચાસીદજીગર્તેતિ નામતઃ ॥ ૧૫॥

તસ્ય પુત્રં શુનઃશેપં મધ્યમં મન્ત્રિસત્તમઃ ।
આનયામાસ દત્ત્વાર્થં પ્રાર્થિતં યદ્ધનં તદા ॥ ૧૬॥

સમાનીય શુનઃશેપં સચિવઃ કાર્યતત્પરઃ ।
રાજ્ઞે નિવેદયામાસ પશુયોગ્યં દ્વિજાત્મજમ્ ॥ ૧૭॥

રાજાતિમુદિતસ્તેન વિપ્રાનાનીય સર્વતઃ ।
કારયામાસ સમ્ભારાન્યજ્ઞાર્થં વેદવિત્તમાન્ ॥ ૧૮॥

પ્રારબ્ધે તુ મખે તત્ર વિશ્વામિત્રો મહામુનિઃ ।
બદ્ધં દૃષ્ટ્વા શુનઃશેપં નિષિષેધ નૃપં તદા ॥ ૧૯॥

રાજન્મા સાહસં કાર્ષીર્મુઞ્ચૈનં દ્વિજબાલકમ્ ।
પ્રાર્થયામ્યહમાયુષ્મન્ સુખં તેઽદ્ય ભવિષ્યતિ ॥ ૨૦॥

ક્રન્દત્યયં શુનઃશેપઃ કરુણા માં દુનોત્યપિ ।
દયાવાન્ભવ રાજેન્દ્ર કુરુ મે વચનં નૃપ ॥ ૨૧॥

પરદેહસ્ય રક્ષાર્થે સ્વદેહં યે દયાપરાઃ ।
દદતિ ક્ષત્રિયાઃ પૂર્વં સ્વર્ગકામાઃ શુચિવ્રતાઃ ॥ ૨૨॥

ત્વં સ્વદેહસ્ય રક્ષાર્થં હંસિ દ્વિજસુતં બલાત્ ।
પાપં મા કુરુ રાજેન્દ્ર દયાવાન્ ભવ બાલકે ॥ ૨૩॥

સર્વેષાં સદૃશી પ્રીતિર્દેહે વેત્સિ સ્વયં નૃપ ।
મુઞ્ચૈનં બાલકં તસ્માત્પ્રમાણં યદિ મે વચઃ ॥ ૨૪॥

વ્યાસ ઉવાચ
અનાદૃત્ય ચ તદ્વાક્યં રાજા દુઃખાતુરો ભૃશમ્ ।
ન મુમોચ મુનિસ્તસ્મૈ ચૂકોપાતીવ તાપસઃ ॥ ૨૫॥

ઉપદેશં દદૌ તસ્મૈ શુનઃશેપાય કૌશિકઃ ।
મન્ત્રં પાશધરસ્યાથ દયાવાન્વેદવિત્તમઃ ॥ ૨૬॥

શુનઃશેપોઽપિ તં મન્ત્રમસકૃદ્બધકર્શિતઃ ।
સ્તુતસ્વરેણ ચુક્રોશ સંસ્મરન્વરુણં ભૃશમ્ ॥ ૨૭॥

સ્તુવન્તં મુનિપુત્રં તં જ્ઞાત્વા વૈ યાદસાં પતિઃ ।
તત્રાગત્ય શુનઃશેપં મુમોચ કરુણાર્ણવઃ ॥ ૨૮॥

રોગહીનં નૃપં કૃત્વા વરુણઃ સ્વગૃહં યયૌ ।
વિશ્વામિત્રસ્તુ તં પુત્રં કૃતવાન્મોચિતં મૃતેઃ ॥ ૨૯॥

ન કૃતં વચનં રાજ્ઞા કૌશિકસ્ય મહાત્મનઃ ।
રોષં દધાર મનસા રાજોપરિ સ ગાધિજઃ ॥ ૩૦॥

એકસ્મિન્સમયે રાજા હયારૂઢો વનં ગતઃ ।
સૂકરં હન્તુકામસ્તુ મધ્યાહ્ને કૌશિકીતટે ॥ ૩૧॥

વૃદ્ધબ્રાહ્મણવેષેણ વિશ્વામિત્રેણ વઞ્ચિતઃ ।
સર્વસ્વં પ્રાર્થિતં તસ્ય ગૃહીતં રાજ્યમદ્ભુતમ્ ॥ ૩૨॥

પીડિતોઽસૌ હરિશ્ચન્દ્રો યજમાનો યતો ભૃશમ્ ।
વસિષ્ઠઃ કૌશિકં પ્રાહ વને પ્રાપ્તં યદૃચ્છયા ॥ ૩૩॥

ક્ષત્રિયાધમ દુર્બુદ્ધે વૃથા બ્રાહ્મણવેષભૃત્ ।
બકધર્મ વૃથા કિં ત્વં ગર્વં વહસિ દામ્ભિક ॥ ૩૪॥

કસ્માત્ત્વયા નૃપશ્રેષ્ઠો યજમાનો મમાપ્યસૌ ।
અપરાધં વિના જાલ્મ ગમિતો દુઃખમદ્ભુતમ્ ॥ ૩૫॥

બકધ્યાનપરો યસ્માત્તસ્માત્ત્વં વૈ બકો ભવ ।
ઇતિ શપ્તો વસિષ્ઠેન કૌશિકઃ પ્રાહ તં પુનઃ ॥ ૩૬॥

ત્વમપ્યાડિર્ભવાયુષ્મન્ બકોઽહં યાવદેવ હિ ।
વ્યાસ ઉવાચ ।
એવં પરસ્પરં દત્ત્વા શાપં તૌ ક્રોધપીડિતૌ ॥ ૩૭॥

અણ્ડજૌ તરસા જાતૌ સરસ્યાડીબકૌ મુની ।
એકસ્મિન્પાદપે નીડં કૃત્વાસૌ બકરૂપભાક્ ॥ ૩૮॥

વિશ્વામિત્રઃ સ્થિતસ્તત્ર દિવ્યે સરસિ માનસે ।
અન્યસ્મિત્પાદપે કૃત્વા વસિષ્ઠો નીડમુત્તમમ્ ॥ ૩૯॥

આડીરૂપધરસ્તસ્થાવન્યોન્યં દ્વેષતત્પરૌ ।
દિને દિને તૌ સઙ્ગ્રામં ચક્રતુઃ ક્રોધસંયુતૌ ॥ ૪૦॥

દુઃખદં સર્વલોકાનાં ક્રન્દમાનાવુભૌ ભૃશમ્ ।
ચઞ્ચુપક્ષપ્રહારૈસ્તુ નખાઘાતૈઃ પરસ્પરમ્ ॥ ૪૧॥

જઘ્નતૂ રુધિરક્લિનૌ પુષ્પિતાવિવ કિંશુકૌ ।
એવં બહૂનિ વર્ષાણિ પક્ષિરૂપધરૌ મુની ॥ ૪૨॥

સ્થિતૌ તત્ર મહારાજ શાપપાશેન યન્ત્રિતૌ ।
રાજોવાચ ।
કથં મુક્તૌ મુનિશ્રેષ્ઠૌ શાપાદ્વસિષ્ઠકૌશિકૌ ॥ ૪૩॥

તન્મમાચક્ષ્વ વિપ્રર્ષે પરં કૌતૂહલં હિ મે ।
વ્યાસ ઉવાચ ।
યુધ્યમાનાબ્વુભૌ દૃષ્ટ્વા બ્રહ્મા લોકપિતામહઃ ॥ ૪૪॥

તત્રાજગામાનિમિષૈર્વૃતઃ સર્વૈર્દયાપરૈઃ ।
તાવાશ્વાસ્ય જગત્કર્તા યુદ્ધતો વિનિવાર્ય ચ ॥ ૪૫॥

શાપં સમ્મોચયામાસ તયોઃ ક્ષિપ્રં પરસ્પરમ્ ।
તતો જગ્મુઃ સુરાઃ સર્વે સ્વાનિ ધિષ્ણ્યાનિ પદ્મભૂઃ ॥ ૪૬॥

સત્યલોકં જગામાશુ હંસારૂઢઃ પ્રતાપવાન્ ।
વિશ્વામિત્રોઽપ્યગાત્તૂર્ણં વસિષ્ઠઃ સ્વાશ્રમં ગતઃ ॥ ૪૭॥

મિથઃ સ્નેહં તતઃ કૃત્વા પ્રજાપત્યુપદેશતઃ ।
મૈત્રાવરુણિનાપ્યેવં કૃતં યુદ્ધમકારણમ્ ॥ ૪૮॥

કૌશિકેન સમં ભૂપ દુઃખદં ચ પરસ્પરમ્ ।
કો નામ માનવો લોકે દેવો વા દાનવોઽપિ વા ॥ ૪૯॥

અહઙ્કારજયં કૃત્વા સર્વદા સુખભાગ્ભવેત્ ।
તસ્માદ્રાજંશ્ચિત્તશુદ્ધિર્મહતામપિ દુર્લભા ॥ ૫૦॥

યત્નેન સાધનીયા સા તદ્વિહીનં નિરર્થકમ્ ।
તીર્થં દાનં તપઃ સત્યં યત્કિઞ્ચિદ્ધર્મસાધનમ્ ॥ ૫૧॥

(શ્રદ્ધાત્ર ત્રિવિધા પ્રોક્તા સાત્ત્વિકી રાજસી તથા ।
તામસી સર્વદેહેષુ દેહિનાં ધર્મકર્મસુ ॥

સાત્ત્વિકી દુર્લભા લોકે યથોક્તફલદા સદા ।
તદર્ધફલદા પ્રોક્તા રાજસી વિધિસંયુતા ॥

તામસી ત્વફલા રાજન્ન તુ કીર્તિકરી પુનઃ ।
કામક્રોધાભિભૂતાનાં જનાનાં નૃપસત્તમ ॥)

વાસનારહિતં કૃત્વા તચ્ચિત્તં શ્રવણાદિના ।
તીર્થાદિષુ વસેન્નિત્યં દેવીપૂજનતત્પરઃ ॥ ૫૨॥

દેવીનામાનિ વચસા ગૃહ્ણંસ્તસ્યા ગુણાન્સ્તુવન્ ।
ધ્યાયંસ્તસ્યાઃ પદામ્ભોજં કલિદોષભયાર્દિતઃ ॥ ૫૩॥

એવં તુ કુર્વતસ્તસ્ય ન કદાચિત્કલેર્ભયમ્ ।
અનાયાસેન સંસારાન્મુચ્યતે પાતકી જનઃ ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
આડીબકયુદ્ધ વર્ણનસહિતં દેવીમાહાત્મ્યવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૬.૧૩॥

## ૬.૧૪ ચતુર્દશોઽધ્યાયઃ । વસિષ્ઠસ્ય મૈત્રાવરુણિરિતિનામવર્ણનમ્ ।

જનમેજય ઉવાચ ।
મૈત્રાવરુણિરિત્યુક્તં નામ તસ્ય મુનેઃ કથમ્ ।
વસિષ્ઠસ્ય મહાભાગ બ્રહ્મણસ્તનુજસ્ય હ ॥ ૧॥

કિમસૌ કર્મતો નામ પ્રાપ્તવાન્ ગુણતસ્તથા ।
બ્રૂહિ મે વદતાંશ્રેષ્ઠ કારણં તસ્ય નામજમ્ ॥ ૨॥

વ્યાસ ઉવાચ ।
નિબોધ નૃપતિશ્રેષ્ઠ વસિષ્ઠો બ્રહ્મણઃ સુતઃ ।
નિમિશાપાત્તનું ત્યક્ત્વા પુનર્જાતો મહાદ્યુતિઃ ॥ ૩॥

મિત્રાવરુણયોર્યસ્માત્તસ્માત્તન્નામ વિશ્રુતમ્ ।
મૈત્રાવરુણિરિત્યસ્મિઁલ્લોકે સર્વત્ર પાર્થિવ ॥ ૪॥

રાજોવાચ ।
કસ્માચ્છપ્તઃ સ ધર્માત્મા રાજ્ઞા બ્રહ્માત્મજો મુનિઃ ।
ચિત્રમેતન્મુનિં લગ્નો રાજ્ઞઃ શાપોઽતિદારુણઃ ॥ ૫॥

અનાગસં મુનિં રાજા કિમસૌ શપ્તવાન્મુને ।
કારણં વદ ધર્મજ્ઞ તસ્ય શાપસ્ય મૂલતઃ ॥ ૬॥

વ્યાસ ઉવાચ ।
કારણં તુ મયા પ્રોક્તં તવ પૂર્વં વિનિશ્ચિતમ્ ।
સંસારોઽયં ત્રિભિર્વ્યાપ્તો રાજન્માયાગુણૈઃ કિલ ॥ ૭॥

ધર્મં કરોતુ ભૂપાલશ્ચરન્તુ તાપસાસ્તપઃ ।
સર્વેષાં તુ ગુણૈર્વિદ્ધં નોજ્જ્વલં તદ્ભવેદિહ ॥ ૮॥

કામક્રોધાભિભૂતાશ્ચ રાજાનો મુનયસ્તથા ।
લોભાહઙ્કારસંયુક્તાશ્ચરન્તિ દુશ્ચરં તપઃ ॥ ૯॥

યજન્તિ ક્ષત્રિયા રાજન્ રજોગુણસમાવૃતાઃ ।
બ્રાહ્મણાસ્તુ તથા રાજન્ ન કોઽપિ સત્ત્વસંયુતઃ ॥ ૧૦॥

ઋષિણાસૌ નિમિઃ શપ્તસ્તેન શપ્તો મુનિઃ પુનઃ ।
દુઃખાદ્દુઃખતરં પ્રાપ્તાવુભાવપિ વિધેર્બલાત્ ॥ ૧૧॥

દ્રવ્યશુદ્ધિઃ ક્રિયાશુદ્ધિર્મનસઃ શુદ્ધિરુજ્જ્વલા ।
દુર્લભા પ્રાણિનાં ભૂપ સંસારે ત્રિગુણાત્મકે ॥ ૧૨॥

પરાશક્તિપ્રભાવોઽયં નોલ્લઙ્ઘ્યઃ કેનચિત્ક્વચિત્ ।
યસ્યાનુગૃહમિચ્છેત્સા મોચયત્યેવ તં ક્ષણાત્ ॥ ૧૩॥

મહાન્તોઽપિ ન મુચ્યન્તે હરિબ્રહ્મહરાદયઃ ।
પામરા અપિ મુચ્યન્તે યથા સત્યવ્રતાદયઃ ॥ ૧૪॥

તસ્યાસ્તુ હૃદયં કોઽપિ ન વેત્તિ ભુવનત્રયે ।
તથાપિ ભક્તવશ્યેયં ભવત્યેવ સુનિશ્ચિતમ્ ॥ ૧૫॥

તસ્માત્તદ્ભક્તિરાસ્થેયા દોષનિર્મૂલનાય ચ ।
રાગદમ્ભાદિયુક્તા ચેત્સા ભક્તિર્નાશિની ભવેત્ ॥ ૧૬॥

ઇક્ષ્વાકુકુલસમ્ભૂતો નિમિર્નામ નરાધિપઃ ।
રૂપવાન્ ગુણસમ્પન્નો ધર્મજ્ઞો લોકરઞ્જકઃ ॥ ૧૭॥

સત્યવાદી દાનપરો યાજકો જ્ઞાનવાઞ્છુચિઃ ।
દ્વાદશસ્તનયો ધીમાન્પ્રજાપાલનતત્પરઃ ॥ ૧૮॥

પુરં નિવેશયામાસ ગૌતમાશ્રમસન્નિધૌ ।
જયન્તપુરસંજ્ઞં તુ બ્રાહ્મણાનાં હિતાય સઃ ॥ ૧૯॥

બુદ્ધિસ્તસ્ય સમુત્પન્ના યજેયમિતિ રાજસી ।
યજ્ઞેન બહુકાલેન દક્ષિણાસંયુતેન ચ ॥ ૨૦॥

ઇસ્વાકું પિતરં પૃષ્ટ્વા યજ્ઞકાર્યાય પાર્થિવઃ ।
કારયામાસ સમ્ભારં યથોદ્દિષ્ટં મહાત્મભિઃ ॥ ૨૧॥

ભૃગુમઙ્ગિરસં ચૈવ વામદેવં ચ ગૌતમમ્ ।
વસિષ્ઠં ચ પુલસ્ત્યં ચ ઋચીકં પુલહં ક્રતુમ્ ॥ ૨૨॥

મુનીનામન્ત્રયામાસ સર્વજ્ઞાન્વેદપારગાન્ ।
યજ્ઞવિદ્યાપ્રવીણાંશ્ચ તાપસાન્વેદવિત્તમાન્ ॥ ૨૩॥

રાજા સમ્ભૃતસમ્ભારઃ સમ્પૂજ્ય ગુરુમાત્મનઃ ।
વસિષ્ઠં પ્રાહ ધર્મજ્ઞો વિનયેન સમન્વિતઃ ॥ ૨૪॥

યજેયં મુનિશાર્દૂલ યાજયસ્વ કૃપાનિધે ।
ગુરુસ્ત્વં સર્વવેત્તાસિ કાર્યં મે કુરુ સામ્પ્રતમ્ ॥ ૨૫॥

યજ્ઞોપકરણં સર્વં સમાનીતં સુસંસ્કૃતમ્ ।
પઞ્ચવર્ષસહસ્રં તુ દીક્ષાં કર્તું મતિશ્ચ મે ॥ ૨૬॥

યસ્મિન્યજ્ઞે સમારાધ્યા દેવી શ્રીજગદમ્બિકા ।
તત્પ્રીત્યર્થમહં યજ્ઞં કરોમિ વિધિપૂર્વકમ્ ॥ ૨૭॥

તચ્છ્રુત્વાસૌ નિમેર્વાક્યં વસિષ્ઠઃ પ્રાહ ભૂપતિમ્ ।
ઇન્દ્રેણાહં વૃતઃ પૂર્વં યજ્ઞાર્થં નૃપસત્તમ ॥ ૨૮॥

પરાશક્તિમખં કર્તુમુદ્યુક્તઃ પાકશાસનઃ ।
સ દીક્ષાં ગમિતો દેવઃ પઞ્ચવર્ષશતાત્મિકામ્ ॥ ૨૯॥

તસ્માત્ત્વમન્તરં તાવત્પ્રતિપાલય પાર્થિવ ।
ઇન્દ્રયજ્ઞે સમાપ્તેઽત્ર કૃત્વા કાર્યં દિવસ્પતેઃ ॥ ૩૦॥

આગમિષ્યામ્યહં રાજંસ્તાવત્ત્વં પ્રતિપાલય ।
રાજોવાચ ।
મયા નિમન્ત્રિતાશ્ચાન્યે મુનયો યજ્ઞકારણાત્ ॥ ૩૧॥

સમ્ભારાઃ સમ્ભૃતાઃ સર્વે પાલયામિ કથં ગુરો ।
ઇક્ષ્વાકૂણાં કુલે બ્રહ્મન્ગુરુસ્ત્વં વેદવિત્તમઃ ॥ ૩૨॥

કથં ત્યક્ત્વાદ્ય મે કાર્યમુદ્યતો ગન્તુમાશુ વૈ ।
ન તે યુક્તં દ્વિજશ્રેષ્ઠ યદુત્સૃજ્ય મખં મમ ॥ ૩૩॥

ગન્તાસિ ધનલોભેન લોભાકુલિતચેતનઃ ।
નિવારિતોઽપિ રાજ્ઞા સ જગામેન્દ્રમખં ગુરુઃ ॥ ૩૪॥

રાજાપિ વિમના ભૂત્વા ગૌતમં પ્રત્યપૂજયત્ ।
ઇયાજ હિમવત્પાર્શ્વે સાગરસ્ય સમીપતઃ ॥ ૩૫॥

દક્ષિણા બહુલા દત્તા વિપ્રેભ્યો મખકર્મણિ ।
નિમિના પઞ્ચસાહસ્રી દીક્ષા તત્ર કૃતા નૃપ ॥ ૩૬॥

ઋત્વિજઃ પૂજિતાઃ કામં ધનૈર્ગોભિર્મુદા યુતાઃ ।
શક્રયજ્ઞસમાપ્તે તુ પઞ્ચવર્ષશતાત્મકે ॥ ૩૭॥

આજગામ વસિષ્ઠસ્તુ રાજ્ઞઃ સત્રદિદૃક્ષયા ।
આગત્ય સંસ્થિતસ્તત્ર દર્શનાર્થં નૃપસ્ય ચ ॥ ૩૮॥

તદા રાજા પ્રસુપ્તસ્તુ નિદ્રયાપહૃતો ભૃશમ્ ।
નાસૌ પ્રબોધિતો ભૃત્યૈર્નાગતસ્તુ મુનિં નૃપઃ ॥ ૩૯॥

વસિષ્ઠસ્ય તતો મન્યુઃ પ્રાદુર્ભૂતોઽવમાનતઃ ।
અદર્શનાન્નિમેસ્તત્ર ચુકોપ મુનિસત્તમઃ ॥ ૪૦॥

શાપં ચ દત્તવાંસ્તસ્મૈ રાજ્ઞે મન્યુવશં ગતઃ ।
યસ્માત્ત્વં માં ગુરું ત્યક્ત્વા કૃત્વાન્યં ગુરુમાત્મનઃ ॥ ૪૧॥

દીક્ષિતોઽસિ બલાન્મન્દ મામવજ્ઞાય પાર્થિવ ।
વારિતોઽપિ મયા તસ્માદ્વિદેહસ્ત્વં ભવિષ્યસિ ॥ ૪૨॥

પતત્વિદં શરીરં તે વિદેહો ભવ ભૂપતે ।
વ્યાસ ઉવાચ ।
ઇતિ તદ્વ્યાહૃતં શ્રુત્વા રાજ્ઞસ્તુ પરિચારકાઃ ॥ ૪૩॥

સદ્યઃ પ્રબોધયામાસુર્મુનિમાહુઃ પ્રકોપિતમ્ ।
કુપિતં તં સમાગત્ય રાજા વિગતકલ્મષઃ ॥ ૪૪॥

ઉવાચ વચનં શ્લક્ષ્ણં હેતુગર્ભં ચ યુક્તિમત્ । ।
મમ દોષો ન ધર્મજ્ઞ ગતસ્ત્વં તૃષ્ણયાઽઽકુલઃ ॥ ૪૫॥

હિત્વા માં યજમાનં વૈ પ્રાર્થિતોઽપિ મયા ભૃશમ્ ।
ન લજ્જસે દ્વિજશ્રેષ્ઠ કૃત્વા કર્મ જુગુપ્સિતમ્ ॥ ૪૬॥

સન્તોષે બ્રાહ્મણશ્રેષ્ઠ જાનન્ધર્મસ્ય નિશ્ચયમ્ ।
પુત્રોઽસિ બ્રહ્મણઃ સાક્ષાદ્વેદવેદાઙ્ગવિત્તમઃ ॥ ૪૭॥

ન વેત્સિ વિપ્રધર્મસ્ય ગતિં સૂક્ષ્માં દુરત્યયામ્ ।

આત્મદોષં મયિ જ્ઞાત્વા મૃષા માં શસ્તુમિચ્છસિ ॥ ૪૮॥

ત્યાજ્યસ્તુ સુજનૈઃ ક્રોધશ્ચાણ્ડાલાદધિકો યતઃ ।
વૃથા ક્રોધપરીતેન મયિ શાપઃ પ્રપાતિતઃ ॥ ૪૯॥

તવાપિ ચ પતત્વદ્ય દેહોઽયં ક્રોધસંયુતઃ ।
એવં શપ્તો મુની રાજ્ઞા રાજા ચ મુનિના તથા ॥ ૫૦॥

પરસ્પરં પ્રાપ્ય શાપં દુઃખિતૌ તૌ બભૂવતુઃ ।
વસિષ્ઠસ્ત્વતિચિન્તાર્તો બ્રહ્માણં શરણં ગતઃ ॥ ૫૧॥

નિવેદયામાસ તથા શાપં ભૂપકૃતં મહત્ ।
વસિષ્ટ ઉવાચ ।
રાજ્ઞા શપ્તોઽસ્મિ દેહોઽયં પતત્વદ્ય તવેતિ વૈ ॥ ૫૨॥

કિં કરોમિ પિતઃ પ્રાપ્યં કષ્ટં કાયપ્રપાતજમ્ ।
અન્યદેહસમુત્પત્તૌ જનકં વદ સામ્પ્રતમ્ ॥ ૫૩॥

તથા મે દેહસંયોગઃ પૂર્વવત્સમપદ્યતામ્ ।
યાદૃશં જ્ઞાનમેતસ્મિન્દેહે તત્રાસ્તુ તત્પિતઃ ॥ ૫૪॥

સમર્થોઽસિ મહારાજ પ્રસાદં કર્તુમર્હસિ ।
વસિષ્ઠસ્ય વચઃ શ્રુત્વા બ્રહ્મા પ્રોવાચ તં સુતમ્ ॥ ૫૫॥

મિત્રાવરુણયોસ્તેજસ્ત્વં પ્રવિશ્ય સ્થિરો ભવ ।
તસ્માદયોનિજઃ કાલે ભવિતા ત્વં ન સંશયઃ ॥ ૫૬॥

પુનર્દેહં સમાસાદ્ય ધર્મયુક્તો ભવિષ્યસિ ।
ભૂતાત્મા વેદવિત્કામં સર્વજ્ઞઃ સર્વપૂજિતઃ ॥ ૫૭॥

એવમુક્તસ્તદા પિત્રા પ્રયયૌ વરુણાલયમ્ ।
કૃત્વા પ્રદક્ષિણં પ્રીત્યા પ્રણમ્ય ચ પિતામહમ્ ॥ ૫૮॥

વિવેશ સ તયોર્દેહે મિત્રાવરુણયોઃ કિલ ।
જીવાંશેન વસિષ્ઠોઽથ ત્યક્ત્વા દેહમનુત્તમમ્ ॥ ૫૯॥

કદાચિત્તૂર્વશી રાજન્નાગતા વરુણાલયમ્ ।
યદૃચ્છયા વરારોહા સખીગણસમાવૃતા ॥ ૬૦॥

દૃષ્ટ્વા તામપ્સરાં દિવ્યાં રૂપયૌવનસંયુતામ્ ।
જાતૌ કામાતુરૌ દેવૌ તદા તામૂચતુર્નૃપ ॥ ૬૧॥

વિવશૌ ચારુસર્વાઙ્ગીં દેવકન્યાં મનોરમામ્ ।
આવાં ત્વમનવદ્યાઙ્ગિ વરયસ્વ સમાકુલૌ ॥ ૬૨॥

વિહરસ્વ યથાકામં સ્થાનેઽસ્મિન્વરવર્ણિનિ ।
તથોક્તા સા તતો દેવી તાભ્યાં તત્ર સ્થિતાવશા ॥ ૬૩॥

કૃત્વા ભાવં સ્થિરં દેવી મિત્રાવરુણયોર્ગૃહે ।
સા ગૃહીત્વા તયોર્ભાવં સંસ્થિતા ચારુદર્શના ॥ ૬૪॥

તયોસ્તુ પતિતં વીર્યં કુમ્ભે દૈવાદનાવૃતે ।
તસ્માજ્જાતૌ મુની રાજન્દ્વાવેવાતિમનોહરૌ ॥ ૬૫॥

અગસ્તિઃ પ્રથમસ્તત્ર વસિષ્ઠશ્ચાપરસ્તથા ।
મિત્રાવરુણયોર્વીર્યાત્તાપસાવૃષિસત્તમૌ ॥ ૬૬॥

પ્રથમસ્તુ વનં પ્રાપ્તો બાલ એવ મહાતપાઃ ।
ઇક્ષ્વાકુસ્તુ વસિષ્ઠં તં બાલં વવ્રે પુરોહિતમ્ ॥ ૬૭॥

વંશસ્યાસ્ય સુખાર્થં તે પાલયામાસ પાર્થિવ ।
વિશેષેણ મુનિં જ્ઞાત્વા પ્રીત્યા યુક્તો બભૂવ હ ॥ ૬૮॥

એતત્તે સર્વમાખ્યાતં વસિષ્ઠસ્ય ચ કારણમ્ ।
શાપાદ્દેહાન્તરપ્રાપ્તિર્મિત્રાવરુણયોઃ કુલે ॥ ૬૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
વસિષ્ઠસ્ય મૈત્રાવરુણિરિતિનામવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૬.૧૪॥

## ૬.૧૫ પઞ્ચદશોઽધ્યાયઃ । દેવીમહિમ્નિ નાનાભાવવર્ણનમ્ ।

જનમેજય ઉવાચ ।
દેહપ્રાપ્તિર્વસિષ્ઠસ્ય કથિતા ભવતા કિલ ।
નિમિઃ કથં પુનર્દેહં પ્રાપ્તવાનિતિ મે વદ ॥ ૧॥

વ્યાસ ઉવાચ ।
વસિષ્ઠેન ચ સમ્પ્રાપ્તઃ પુનર્દેહો નરાધિપ ।
નિમિના ન તથા પ્રાપ્તો દેહઃ શાપાદનન્તરમ્ ॥ ૨॥

યદા શપ્તો વસિષ્ઠેન તદા તે બ્રાહ્મણાઃ ક્રતૌ

ઋત્વિજો યે વૃતા રાજ્ઞા તે સર્વે સમચિન્તયન્ ॥ ૩॥

કિં કર્તવ્યમહોઽસ્માભિઃ શાપદગ્ધો મહીપતિઃ ।
અસ્મિન્યજ્ઞે ત્વસમ્પૂર્ણે દીક્ષાયુક્તશ્ચ ધાર્મિકઃ ॥ ૪॥

કિં કર્તવ્યં કાર્યમેતદ્વિપરીતમભૂત્કિલ ।
અવશ્યમ્ભાવિભાવત્વાદશક્તાઃ સ્મ નિવારણે ॥ ૫॥

મન્ત્રૈર્બહુવિધૈર્દેહં તદા તસ્ય મહાત્મનઃ ।
રક્ષિતં ધારયામાસુઃ કિઞ્ચિચ્છ્વસનસંયુતમ્ ॥ ૬॥

ગન્ધૈર્માલ્યૈશ્ચ વિવિધૈઃ પૂજ્યમાનં મુહુર્મુહુઃ ।
મન્ત્રશક્ત્યા પ્રતિષ્ટભ્ય નિર્વિકારં સુપૂજિતમ્ ॥ ૭॥

સમાપ્તે ચ ક્રતૌ તત્ર દેવાઃ સર્વે સમાગતાઃ ।
ઋત્વિગ્ભિસ્તુ સ્તુતાઃ સર્વે સુપ્રીતાશ્ચાભવન્નૃપ ॥ ૮॥

વિજ્ઞપ્તા મુનિભિઃ સ્તોત્રૈર્નિર્વિણ્ણાત્માનમબ્રુવન્ ।
પ્રસન્નાઃ સ્મ મહીપાલ વરં વરય સુવ્રત ॥ ૯॥

યજ્ઞેનાનેન રાજર્ષે વરં જન્મ વિધીયતે ।
દેવદેહં નૃદેહં વા યત્તે મનસિ વાઞ્છિતમ્ ॥ ૧૦॥

દૃપ્તઃ કામં પુરોધાસ્તે મૃત્યુલોકે યથાસુખમ્ ।
એવમુક્તો નિમેરાત્મા સન્તુષ્ટસ્તાનુવાચ હ ॥ ૧૧॥

ન દેહે મમ વાઞ્છાસ્તિ સર્વદૈવ વિનશ્વરે ।
વાસો મે સર્વસત્ત્વાનાં દૃષ્ટાવસ્તુ સુરોત્તમાઃ ॥ ૧૨॥

નેત્રેષુ સર્વભૂતાનાં વાયુભૂતશ્ચરામ્યહમ્ ।
એવમુક્તાઃ સુરાસ્તત્ર નિમેરાત્માનમબ્રુવન્ ॥ ૧૩॥

પ્રાર્થય ત્વં મહારાજ દેવીં સર્વેશ્વરીં શિવામ્ ।
મખેનાનેન સન્તુષ્ટા સા તેઽભીષ્ટં વિધાસ્યતિ ॥ ૧૪॥

સ દેવૈરેવમુક્તસ્તુ પ્રાર્થયામાસ દેવતામ્ ।
સ્તોત્રૈર્નાનાવિધૈર્દિવ્યૈર્ભક્ત્યા ગદ્ગદયા ગિરા ॥ ૧૫॥

પ્રસન્ના સા તદા દેવી પ્રત્યક્ષં દર્શનં દદૌ ।
કોટિસૂર્યપ્રતીકાશં રૂપં લાવણ્યદીપિતં । ૧૬
દૃષ્ટ્વા પ્રમુદિતાઃ સર્વે કૃતકૃત્યાશ્ચ ચેતસિ ।

પ્રસન્નાયાં દેવતાયાં રાજા વવ્રે વરં નૃપ ॥ ૧૭॥

જ્ઞાનં તદ્વિમલં દેહિ યેન મોક્ષો ભવેદપિ ।
નેત્રેષુ સર્વભૂતાનાં નિવાસો મે ભવેદિતિ ॥ ૧૮॥

તતઃ પ્રસન્ના દેવેશી પ્રોવાચ જગદમ્બિકા ।
જ્ઞાનં તે વિમલં ભૂયાત્પ્રારબ્ધસ્યાવશેષતઃ ॥ ૧૯॥

નેત્રેષુ સર્વભૂતાનાં નિવાસોઽપિ ભવિષ્યતિ ।
નિમિષં યાન્તિ ચક્ષૂંષિ ત્વત્કૃતેનૈવ દેહિનામ્ ॥ ૨૦॥

તવ વાસાત્સનિમિષા માનવાઃ પશવસ્તથા ।
પતઙ્ગાશ્ચ ભવિષ્યન્તિ પુનશ્ચાનિમિષાઃ સુરાઃ ॥ ૨૧॥

ઇતિ દત્ત્વા વરં તસ્મૈ તદા શ્રીવરદેવતા ।
આમન્ત્ર્ય ચ મુનીન્સર્વાંસ્તત્રૈવાન્તર્હિતાભવત્ ॥ ૨૨॥

અન્તર્હિતાયાં દેવ્યાં તુ મુનયસ્તત્ર સંસ્થિતાઃ ।
વિચિન્ત્ય વિધિવત્સર્વે નિમેર્દેહં સમાહરન્ ॥ ૨૩॥

અરણિં તત્ર સંસ્થાપ્ય મમન્થુર્મન્ત્રવત્તદા ।
મન્ત્રહોમૈર્મહાત્માનઃ પુત્રહેતોર્નિમેરથ ॥ ૨૪॥

અરણ્યાં મથ્યમાનાયાં પુત્રઃ પ્રાદુરભૂત્તદા ।
સર્વલક્ષણસમ્પન્નઃ સાક્ષાન્નિમિરિવાપરઃ ॥ ૨૫॥

અરણ્યા મથનાજ્જાતસ્તસ્માન્મિથિરિતિ સ્મૃતઃ ।
યેનાયં જનકાજ્જાતસ્તેનાસૌ જનકોઽભવત્ ॥ ૨૬॥

વિદેહસ્તુ નિમિર્જાતો યસ્માત્તસ્માત્તદન્વયે ।
સમુદ્ભૂતાસ્તુ રાજાનો વિદેહા ઇતિ કીર્તિતાઃ ॥ ૨૭॥

એવં નિમિસુતો રાજા પ્રથિતો જનકોઽભવત્ ।
નગરી નિર્મિતા તેન ગઙ્ગાતીરે મનોહરા ॥ ૨૮॥

મિથિલેતિ સુવિખ્યાતા ગોપુરાટ્ટાલસંયુતા ।
ધનધાન્યસમાયુક્તા હટ્ટશાલાવિરાજિતા ॥ ૨૯॥

વંશેઽસ્મિન્યેઽપિ રાજાનસ્તે સર્વે જનકાસ્તથા ।
વિખ્યાતા જ્ઞાનિનઃ સર્વે વિદેહાઃ પરિકીર્તિતાઃ ॥ ૩૦॥

એતત્તે કથિતં રાજન્નિમેરાખ્યાનમુત્તમમ્ ।
શાપાદ્યસ્ય વિદેહત્વં વિસ્તરાદુદિતં મયા ॥ ૩૧॥

રાજોવાચ ।
ભગવન્ભવતા પ્રોક્તં નિમિશાપસ્ય કારણમ્ ।
શ્રુત્વા સન્દેહમાપન્નં મનો મેઽતીવ ચઞ્ચલમ્ ॥ ૩૨॥

વસિષ્ઠો બ્રાહ્મણઃ શ્રેષ્ઠો રાજ્ઞશ્ચૈવ પુરોહિતઃ ।
પુત્રઃ પઙ્કજયોનેસ્તુ રાજ્ઞા શપ્તઃ કથં મુનિઃ ॥ ૩૩॥

ગુરું ચ બ્રાહ્મણં જ્ઞાત્વા નિમિના ન કૃતા ક્ષમા ।
યજ્ઞકર્મ શુભં કૃત્વા કથં ક્રોધમુપાગતઃ ॥ ૩૪॥

જ્ઞાત્વા ધર્મસ્ય વિજ્ઞાનં કથમિક્ષ્વાકુસમ્ભવઃ ।
ક્રોધસ્ય વશમાપન્તઃ શપ્તવાન્બ્રાહ્મણં ગુરુમ્ ॥ ૩૫॥

વ્યાસ ઉવાચ ।
ક્ષમાતિદુર્લભા રાજન્પ્રાણિભિરજિતાત્મભિઃ ।
ક્ષમાવાન્દુર્લભો લોકે સુસમર્થો વિશેષતઃ ॥ ૩૬॥

સર્વસઙ્ગપરિત્યાગી મુનિર્ભવતુ તાપસઃ ।
નિદ્રાક્ષુધોર્વિજેતા ચ યોગાભ્યાસે સુનિષ્ઠિતઃ ॥ ૩૭॥

કામઃ ક્રોધસ્તથા લોભો હ્યહઙ્કારશ્ચતુર્થકઃ ।
દુર્જેયા દેહમધ્યસ્થા રિપવસ્તેન સર્વથા ॥ ૩૮॥

ન ભૂતપૂર્વઃ સંસારે ન ચૈવ વર્તતેઽધુના ।
ભવિતા ન પુમાન્કશ્ચિદ્યો જયેત રિપૂનિમાન્ ॥ ૩૯॥

ન સ્વર્ગે ન ચ ભૂલોકે બ્રહ્મલોકે હરેઃ પદે ।
કૈલાસે નેદૃશઃ કશ્ચિદ્યો જયેત રિપૂનિમાન્ ॥ ૪૦॥

મુનયો બ્રહ્મપુત્રાશ્ચ તથાન્યે તાપસોત્તમાઃ ।
તેઽપિ ગુણત્રયાવિદ્ધાઃ કિં પુનર્માનવા ભુવિ ॥ ૪૧॥

કપિલઃ સાઙ્ખ્યવેત્તા ચ યોગાભ્યાસરતઃ શુચિઃ ।
તેનાપિ દૈવયોગાદ્ધિ પ્રદગ્ધાઃ સગરાત્મજાઃ ॥ ૪૨॥

તસ્માદ્રાજન્નહઙ્કારાત્સઞ્જાતં ભુવનત્રયમ્ ।
કાર્યકારણભાવાત્તુ તદ્વિયુક્તં કથં ભવેત્ ॥ ૪૩॥

બ્રહ્મા ગુણત્રયાવિષ્ટો વિષ્ણુશ્ચૈવાથ શઙ્કરઃ ।
પ્રભવન્તિ શરીરેષુ તેષાં ભાવાઃ પૃથક્પૃથક્ ॥ ૪૪॥

માનવાનાં ચ કા વાર્તા સત્ત્વૈકાન્તવ્યવસ્થિતૌ ।
ગુણાનાં સઙ્કરો રાજન્સર્વત્ર સમવસ્થિતઃ ॥ ૪૫॥

કદાચિત્સત્ત્વવૃદ્ધિઃ સ્યાત્કદાચિદ્રજસઃ કિલ ।
કદાચિત્તમસો વૃદ્ધિઃ સમભાવઃ કદાચન ॥ ૪૬॥

નિર્ગુણઃ પરમાત્માસૌ નિર્લેપઃ પરમોઽવ્યયઃ ।
અલક્ષ્યઃ સર્વસત્ત્વાનામપ્રમેયઃ સનાતનઃ ॥ ૪૭॥

તથૈવ પરમા શક્તિર્નિર્ગુણા બ્રહ્મસંસ્થિતા ।
દુર્જ્ઞેયા ચાલ્પમતિભિઃ સર્વભૂતવ્યવસ્થિતિઃ ॥ ૪૮॥

પરાત્મનસ્તથા શક્તેસ્તયોરૈક્યં સદૈવ હિ ।
અભિન્નં તદ્વપુર્જ્ઞાત્વા મુચ્યતે સર્વદોષતઃ ॥ ૪૯॥

તજ્જ્ઞાનાદેવ મોક્ષઃ સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ।
યો વેદ સ વિમુક્તોઽસ્મિન્સંસારે ત્રિગુણાત્મકે ॥ ૫૦॥

જ્ઞાનં તુ દ્વિવિધં પ્રોક્તં શાબ્દિકં પ્રથમં સ્મૃતમ્ ।
વેદશાસ્ત્રાર્થવિજ્ઞાનાત્તદ્ભવેદ્બુદ્ધિયોગતઃ ॥ ૫૧॥

વિકલ્પાસ્તત્ર બહવો ભવન્તિ મતિકલ્પિતાઃ ।
(કુતર્કકલ્પિતાઃ કેચિત્સતર્કકલ્પિતાઃ પરે ।
વિતર્કૈર્વિભ્રમોત્પત્તિર્વિભ્રમાદ્બુદ્ધિભ્રંશતા ।
બુદ્ધિભ્રંશાજ્જ્ઞાનનાશઃ પ્રાણિનાં પરિકીર્તિતઃ । )
અનુભવાખ્યં દ્વિતીયં તુ જ્ઞાનં તદ્દુર્લભં નૃપ ॥ ૫૨॥

તત્તદા પ્રાપ્યતે તસ્ય વેત્તુઃ સઙ્ગો યદા ભવેત્ ।
શબ્દજ્ઞાનાન્ન કાર્યસ્ય સિદ્ધિર્ભવતિ ભારત ॥ ૫૩॥

તસ્માન્નાનુભવજ્ઞાનં સમ્ભવત્યતિમાનુષમ્ ।
અન્તર્ગતં તમશ્છેત્તું શાબ્દબોધો હિ ન ક્ષમઃ ॥ ૫૪॥

યથા ન નશ્યતિ તમઃ કૃતયા દીપવાર્તયા ।
તત્કર્મ યન્ન બન્ધાય સા વિદ્યા યા વિમુક્તયે ॥ ૫૫॥

આયાસાયાપરં કર્મ વિદ્યાન્યા શિલ્પનૈપુણમ્ ।

શીલં પરહિતત્વં ચ કોપાભાવઃ ક્ષમા ધૃતિઃ ॥ ૫૬॥

સન્તોષશ્ચેતિ વિદ્યાયાઃ પરિપાકોજ્જ્વલં ફલમ્ ।
વિદ્યયા તપસા વાપિ યોગાભ્યાસેન ભૂપતે ॥ ૫૭॥

વિના કામાદિશત્રૂણાં નૈવ નાશઃ કદાચન ।
(મનસ્તુ ચઞ્ચલં રાસ્વભાવાદતિદુર્ગ્રહમ્ ।
તદ્વશઃ સર્વથા પ્રાણી ત્રિવિધો ભુવનત્રયે । )
કામક્રોધાદયો ભાવાશ્ચિત્તજાઃ પરિકીર્તિતાઃ ॥ ૫૮॥

તે તદા ન ભવન્ત્યેવ યદા વૈ નિર્જિતં મનઃ ।
તસ્માત્તુ નિમિના રાજન્ન ક્ષમા વિહિતા મુનૌ ॥ ૫૯॥

યથા યયાતિના પૂર્વં કૃતા શુક્રે કૃતાગસિ ।
ભૃગુપુત્રેણ શપ્તોઽપિ યયાતિર્નૃપસત્તમઃ ॥ ૬૦॥

ન શશાપ મુનિં ક્રોધાજ્જરાં રાજા ગૃહીતવાન્ ।
કશ્ચિત્સૌમ્યો ભવેત્કશ્ચિત્ક્રૂરો ભવતિ પાર્થિવઃ ॥ ૬૧॥

સ્વભાવભેદાન્નૃપતે કસ્ય દોષોઽત્ર કલ્પ્યતે ।
હૈહયા ભાર્ગવાન્પૂર્વં ધનલોભાત્પુરોહિતાન્ ॥ ૬૨॥

બ્રાહ્મણાન્મૂલતઃ સર્વાંશ્ચિચ્છિદુઃ ક્રોધમૂર્ચ્છિતાઃ ।
પાતકં પૃષ્ઠતઃ કૃત્વા બ્રહ્મહત્યાસમુદ્ભવમ્ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે દેવીમહિમ્નિ નાનાભાવવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૬.૧૫॥

## ૬.૧૬ ષોડશોઽધ્યાયઃ । હૈહયૈર્ધનાહરણેન સહ ભૃગૂણાં વધવર્ણનમ્ ।

જનમેજય ઉવાચ ।
કુલે કસ્ય સમુત્પન્નાઃ ક્ષત્રિયા હૈહયાશ્ચ તે ।
બ્રહ્મહત્યામનાદૃત્ય નિજઘ્નુર્ભાર્ગવાંશ્ચ યે ॥ ૧॥

વૈરસ્ય કારણં તેષાં કિં મે બ્રૂહિ પિતામહ ।
નિમિત્તેન વિના ક્રોધં કથં કુર્વન્તિ સત્તમાઃ ॥ ૨॥

વૈરં પુરોહિતૈઃ સાર્ધં કસ્માત્તેષામજાયત ।
નાલ્પહેતોર્હિ તદ્વૈરં ક્ષત્રિયાણાં ભવિષ્યતિ ॥ ૩॥

અન્યથા બ્રાહ્મણાન્ પૂજ્યાન્કથં જઘ્નુરનાગસઃ ।
બાહુજા બલવન્તોઽપિ પાપભીતાઃ કથં ન તે ॥ ૪॥

સ્વલ્પેઽપરાધે કો હન્યાદ્વાઽવાન્ક્ષત્રિયર્ષભઃ ।
સન્દેહો મે મુનિશ્રેષ્ઠ કારણં વક્તુમર્હસિ ॥ ૫॥

સૂત ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા તેન રાજ્ઞા સત્યવતીસુતઃ ।
ઉવાચ પરમપ્રીતઃ કથાં સંસ્મૃત્ય ચેતસા ॥ ૬॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ પારિક્ષિતે વાર્તાં ક્ષત્રિયાણાં પુરાતનીમ્ ।
આશ્ચર્યકારિણીં સમ્યગ્વિદિતાં ચ પુરા મયા ॥ ૭॥

કાર્તવીર્યેતિ નામ્નાભૂદ્ધૈહયઃ પૃથિવીપતિઃ ।
સહસ્રબાહુર્બલવાનર્જુનો ધર્મતત્પરઃ ॥ ૮॥

દત્તાત્રેયસ્ય શિષ્યોઽભૂદવતારો હરેરિવ ।
સિદ્ધઃ સર્વાર્થદઃ શાક્તો ભૃગૂણાં યાજ્ય એવ સઃ ॥ ૯॥

યજ્વા પરમધર્મિષ્ઠઃ સદા દાનપરાયણઃ ।
દદૌ વિત્તં ભૃગુભ્યોઽસૌ કૃત્વા યજ્ઞાનનેકશઃ ॥ ૧૦॥

ધનિનસ્તે દ્વિજા જાતા ભૃગવો નૃપદાનતઃ ।
હયરત્નસમૃદ્ધ્યાઢ્યાઃ સઞ્જાતાઃ પ્રથિતા ભુવિ ॥ ૧૧॥

સ્વર્યાતે નૃપશાર્દૂલે કાર્તવીર્યાર્જુને પુનઃ ।
હૈહયા નિર્ધના જાતાઃ કાલેન મહતા નૃપ ॥ ૧૨॥

ધનકાર્યં સમુત્પન્નં હૈહયાનાં કદાચન ।
યાચિષ્ણવોઽભિજગ્મુસ્તાન્ભૃગૂંસ્તે હૈહયા નૃપ ॥ ૧૩॥

વિનયં ક્ષત્રિયાઃ કૃત્વાપ્યયાચન્ત ધનં બહુ ।
ન દદુસ્તેઽતિલોભાર્તા નાસ્તિ નાસ્તીતિવાદિનઃ ॥ ૧૪॥

ભૂમૌ ચ નિદધુઃ કેચિદ્ભૃગવો ધનમુત્તમમ્ ।
દદુઃ કેચિદ્દ્વિજાતિભ્યો જ્ઞાત્વા ક્ષત્રિયતો ભયમ્ ॥ ૧૫॥

કૃત્વા સ્થાનાન્તરે દ્રવ્યં બ્રાહ્મણા ભયવિહ્વલાઃ ।
ત્યક્ત્વાઽઽશ્રમાન્યયુઃ સર્વે ભૃગવસ્તૃષ્ણયાન્વિતાઃ ॥ ૧૬॥

યાજ્યાંશ્ચ દુઃખિતાન્દૃષ્ટ્વા ન દદુર્લોભમોહિતાઃ ।
પલાયિત્વા ગતાઃ સર્વે ગિરિદુર્ગાનુપાશ્રિતાઃ ॥ ૧૭॥

તતસ્તે હૈહયાસ્તાત દુઃખિતાઃ કાર્યગૌરવાત્ ।
ભૃગૂણામાશ્રમાગ્જગ્મુર્દ્રવ્યાર્થં ક્ષત્રિયર્ષભાઃ ॥ ૧૮॥

ભૃગૂંસ્તુ નિર્ગતાન્વીક્ષ્ય શૂન્યાંસ્ત્યક્ત્વા ગૃહાનથ ।
ચખનુર્ભૂતલં તત્ર દ્રવ્યાર્થં હૈહયા ભૃશમ્ ॥ ૧૯॥

ખનતાધિગતં વિત્તં કેનચિદ્ભૃગુવેશ્મનિ ।
દદૃશુઃ ક્ષત્રિયાઃ સર્વે તદ્વિત્તં શ્રમકર્શિતાઃ ॥ ૨૦॥

યત્ર યત્ર સમુત્પન્નં ભૂરિ દ્રવ્યં મહીતલાત્ ।
તદા તે પાર્શ્વભાગસ્થબ્રાહ્મણાનાં ગૃહાણ્યપિ ॥ ૨૧॥

નિર્ભિદ્ય હૈહયા દ્રવ્યં દદૃશુર્ધનલિપ્સયા ।
બ્રાહ્મણાશ્ચુકુશઃ સર્વે ભીતાશ્ચ શરણં ગતાઃ ॥ ૨૨॥

અતિચિન્વત્સુ વિપ્રાણાં ભવનાન્નિઃસૃતં બહુ ।
નિજઘ્નુસ્તાઞ્છરૈઃ કોપાદ્બાડવાઞ્છરણાગતાન્ ॥ ૨૩॥

યયુસ્તે ગિરિદુર્ગાંશ્ચ યત્ર વૈ ભૃગવઃ સ્થિતાઃ ।
આગર્ભાદનુકૃન્તન્તશ્ચેરુશ્ચૈવ મહીમિમામ્ ॥ ૨૪॥

પ્રાપ્તાન્પ્રાપ્તાન્ભૃગૂન્સર્વાન્નિજઘ્નુર્નિશિતૈઃ શરૈઃ ।
આબાલવૃદ્ધાનપરાનવમન્ય ચ પાતકમ્ ॥ ૨૫॥

એવમુત્પાટ્યમાનેષુ ભાર્ગવેષુ યતસ્તતઃ ।
હન્યુર્ગર્ભાંશ્ચ નારીણાં ગૃહીત્વા હૈહયા ભૃશમ્ ॥ ૨૬॥

રુરુદુસ્તાઃ સ્ત્રિયઃ કામં કુરર્ય ઇવ દુઃખિતાઃ ।
ગર્ભાશ્ચ કૃન્તિતા યાસાં ક્ષત્રિયૈઃ પાપનિશ્ચયૈઃ ॥ ૨૭॥

અન્યેઽપ્યાહુશ્ચ તાન્દૃષ્ટ્વા મુનયસ્તીર્થવાસિનઃ ।
મુઞ્ચન્તુ ક્ષત્રિયાઃ ક્રોધં બ્રાહ્મણેષુ ભયાવહમ્ ॥ ૨૮॥

અયુક્તમેતદારબ્ધં ભવદ્ભિઃ કર્મ ગર્હિતમ્ ।
યદ્ગર્ભાન્ભૃગુપત્નીનાં નિહન્યુઃ ક્ષત્રિયર્ષભાઃ ॥ ૨૯॥

અત્યુગ્રપુણ્યપાપાનામિહૈવ ફલમાપ્નુયાત્ ।
તસ્માજ્જુગુપ્સિતં કર્મ ત્યક્તવ્યં ભૂતિમિચ્છતા ॥ ૩૦॥

તાનાહુર્હૈહયાઃ ક્રુદ્ધા મુનીનથ દયાપરાન્ ।
ભવન્તઃ સાધવઃ સર્વે નાર્થજ્ઞાઃ પાપકર્મણામ્ ॥ ૩૧॥

એભિર્હૃતં ધનં સર્વં પૂર્વજાનાં મહાત્મનામ્ ।
વઞ્ચયિત્વા છલાભિજ્ઞૈર્માર્ગે પાટચ્ચરૈરિવ ॥ ૩૨॥

એતે પ્રતારકા દમ્ભાસ્તાદૃશા બકવૃત્તયઃ ।
ઉત્પન્ને ચ મહાકાર્યે પ્રાર્થિતા વિનયેન તે ॥ ૩૩॥

ન દદુઃ પ્રાર્થિતં વિપ્રાઃ પાદવૃદ્ધ્યાપિ યાચિતાઃ ।
નાસ્તીતિવાદિનઃ સ્તબ્ધાઃ દુઃખિતાન્વીક્ષ્ય યાજ્યકાન્ ॥ ૩૪॥

ધનં પ્રાપ્તં કાર્તવીર્યાદ્રક્ષિતં કેન હેતુના ।
ન કૃતાઃ ક્રતવઃ કિં તૈર્દાનં ચાર્થિષુ ભૂરિશઃ ॥ ૩૫॥

ન સઞ્ચિતવ્યં વિપ્રૈસ્તુ ધનં ચાપિ કદાચન ।
યષ્ટવ્યં વિધિવદ્દેયં ભોક્તવ્યં ચ યથાસુખમ્ ॥ ૩૬॥

દ્રવ્યે ચૌરભયં પ્રોક્તં તથા રાજભયં દ્વિજાઃ ।
વહ્નેર્ભયં મહાઘોરં તથા ધૂર્તભયં મહત્ ॥ ૩૭॥

યેન કેનાપ્યુપાયેન ધનં ત્યજતિ રક્ષકમ્ ।
અથવાસૌ મૃતો યાતિ દ્રવ્યં ત્યક્ત્વા હ્યસદ્ગતિમ્ ॥ ૩૮॥

પાદવૃદ્ધ્યા તથાસ્માભિઃ પ્રાર્થિતં વિનયાન્વિતૈઃ ।
તથાપિ લોભસન્દિગ્ધૈર્ન દત્તં નઃ પુરોહિતૈઃ ॥ ૩૯॥

દાનં ભોગસ્તથા નાશો ધનસ્ય ગતિરીદૃશી ।
દાનભોગૌ કૃતીનાં ચ નાશઃ પાપાત્મનાં કિલ ॥ ૪૦॥

ન દાતા ન ચ યો ભોક્તા કૃપણો ગુપ્તિતત્પરઃ ।
રાજ્ઞાસૌ સર્વથા દણ્ડ્યો વઞ્ચકો દુઃખભાઙ્નરઃ ॥ ૪૧॥

તસ્માદ્વયં ગુરૂનેતાન્વઞ્ચકાન્બ્રાહ્મણાધમાન્ ।
હન્તું સમુદ્યતાઃ સર્વે ન ક્રોધવ્યં મહાત્મભિઃ ॥ ૪૨॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા હેતુમદ્વાક્યં તાનાશ્વાસ્ય મુનીનથ ।
વિચેરુશ્ચ વિચિન્વાના ભૃગુદારાનનેકશઃ ॥ ૪૩॥

ભયાર્તા ભૃગુપત્ન્યસ્તુ હિમવન્તં ધરાધરમ્ ।
પ્રપેદિરે રુદન્ત્યશ્ચ વેપમાનાઃ કૃશા ભૃશમ્ ॥ ૪૪॥

એવં તે હૈહયૈર્વિપ્રાઃ પીડિતા ધનકામુકૈઃ ।
નિહતાશ્ચ યથાકામં સંરબ્ધૈઃ પાપકર્મભિઃ ॥ ૪૫॥

લોભ એવ મનુષ્યાણાં દેહસંસ્થો મહારિપુઃ ।
સર્વદુઃખાકરઃ પ્રોક્તો દુઃખદઃ પ્રાણનાશકઃ ॥ ૪૬॥

સર્વપાપસ્ય મૂલં હિ સર્વદા તૃષ્ણયાન્વિતઃ ।
વિરોધકૃત્ત્રિવર્ણાનાં સર્વાર્તેઃ કારણં તથા ॥ ૪૭॥

લોભાત્ત્યજન્તિ ધર્મં વૈ કુલધર્મં તથૈવ હિ ।
માતરં ભ્રાતરં હન્તિ પિતરં બાન્ધવં તથા ॥ ૪૮॥

ગુરું મિત્રં તથા ભાર્યાં પુત્રં ચ ભગિનીં તથા ।
લોભાવિષ્ટો ન કિં કુર્યાદકૃત્યં પાપમોહિતઃ ॥ ૪૯॥

ક્રોધાત્કામાદહઙ્કારાલ્લોભ એવ મહારિપુઃ ।
પ્રાણાંસ્ત્યજતિ લોભેન કિં પુનઃ સ્યાદનાવૃતમ્ ॥ ૫૦॥

પૂર્વજાસ્તે મહારાજ ધર્મજ્ઞાઃ સત્પથે સ્થિતાઃ ।
પાણ્ડવાઃ કૌરવાશ્ચૈવ લોભેન નિધનં ગતાઃ ॥ ૫૧॥

યત્ર ભીષ્મશ્ચ દ્રોણશ્ચ કૃપઃ કર્ણશ્ચ બાહ્લિકઃ ।
ભીમસેનો ધર્મપુત્રસ્તથૈવાર્જુનકેશવૌ ॥ ૫૨॥

તથાપિ યુદ્ધમત્યુગ્રં કૃતં તૈશ્ચ પરસ્પરમ્ ।
કુટુમ્બકદનં ભૂરિ કૃતં લોભાતુરૈરિહ ॥ ૫૩॥

હતો દ્રોણો હતો ભીષ્મસ્તથૈવ પાણ્ડવાત્મજાઃ ।
ભ્રાતરઃ પિતરઃ પુત્રાઃ સર્વે વૈ નિહતા રણે ॥ ૫૪॥

તસ્માલ્લોભાભિભૂતસ્તુ કિં ન કુર્યાન્નરઃ કિલ ।
હૈહયૈર્નિહતાઃ સર્વે ભૃગવઃ પાપબુદ્ધિભિઃ ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
હૈહયૈર્ધનાહરણેન સહ ભૃગૂણાં વધવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૬.૧૬॥

## ૬.૧૭ સપ્તદશોઽધ્યાયઃ । હૈહયાનામુત્પત્તિપ્રસઙ્ગે રમાવિષ્ણુસંવાદવર્ણનમ્ ।

જનમેજય ઉવાચ ।
કથં તાશ્ચ સ્ત્રિયઃ સર્વા ભૃગૂણાં દુઃખસાગરાત્ ।
મુક્તા વંશઃ પુનસ્તેષાં બ્રાહ્મણાનાં સ્થિરોઽભવત્ ॥ ૧॥

હૈહયૈઃ કિં કૃતં કાર્યં હત્વા તાન્બ્રાહ્મણાનપિ ।
ક્ષત્રિયૈર્લોભસંયુક્તૈઃ પાપાચારૈર્વદસ્વ તત્ ॥ ૨॥

ન તૃપ્તિરસ્તિ મે બ્રહ્મન્ પિબતસ્તે કથામૃતમ્ ।
પાવનં સુખદં નૃણાં પરલોકે ફલપ્રદમ્ ॥ ૩॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્પ્રવક્ષ્યામિ કથાં પાપપ્રણાશિનીમ્ ।
યથા સ્ત્રિયસ્તુ તા મુક્તા દુઃખાત્તસ્માદ્દુરત્યયાત્ ॥ ૪॥

ભૃગુપત્ન્યો યદા રાજન્ હિમવન્તં ગિરિં ગતાઃ ।
ભયત્રસ્તા વિભગ્નાશા હૈહયૈઃ પીડિતા ભૃશમ્ ॥ ૫॥

ગૌરીં તત્ર તુ સંસ્થાપ્ય મૃણ્મયીં સરિતસ્તટે ।
ઉપોષણપરાશ્ચક્રુર્નિશ્ચયં મરણં પ્રતિ ॥ ૬॥

સ્વપ્ને ગત્વા તદા દેવી પ્રાહ તાઃ પ્રમદોત્તમાઃ ।
યુષ્માસુ મધ્યે કસ્યાશ્ચિદ્ભવિતા ચોરુજઃ પુમાન્ ॥ ૭॥

મદંશશક્તિસમ્ભિન્નઃ સ વઃ કાર્યં વિધાસ્યતિ ।
ઇત્યાદિશ્ય પરામ્બા સા પશ્ચાદન્તર્હિતાભવત્ ॥ ૮॥

જાગૃતાસ્તુ તતઃ સર્વા મુદમાપુર્વરાઙ્ગનાઃ ।
કાચિત્તાસાં ભયોદ્વિગ્ના કામિની ચતુરા ભૃશમ્ ॥ ૯॥

દધાર ચોરુણૈકેન ગર્ભં સા કુલવૃદ્ધયે ।
પલાયનપરા દૃષ્ટા ક્ષત્રિયૈર્બ્રાહ્મણી યદા ॥ ૧૦॥

વિહ્વલા તેજસા યુક્તા તદા તે દુદ્રુવુર્ભૃશમ્ ।
ગૃહ્યતાં વધ્યતાં નારી સગર્ભા યાતિ સત્વરા ॥ ૧૧॥

ઇતિ બ્રુવન્તઃ સમ્પ્રાપ્તાઃ કામિનીં ખડ્ગપાણયઃ ।
સા ભયાર્તા તુ તાન્દૃષ્ટ્વા રુરોદ સમુપાગતાન્ ॥ ૧૨॥

ગર્ભસ્ય રક્ષણાર્થં સા ચુક્રોશાતિભયાતુરા ।

રુદતીં માતરં શ્રુત્વા દીનાં પ્રાણવિવર્જિતામ્ ॥ ૧૩॥

નિરાધારાં ક્રન્દમાનાં ક્ષત્રિયૈર્ભૃશતાપિતામ્ ।
ગૃહીતામિવ સિંહેન સગર્ભાં હરિણીં યથા ॥ ૧૪॥

સાશ્રુનેત્રાં વેપમાનાં સઙ્ક્રુધ્ય બાલકસ્તદા ।
ભિત્ત્વોરું નિર્જગામાશુ ગર્ભઃ સૂર્ય ઇવાપરઃ ॥ ૧૫॥

મુષ્ણન્દૃષ્ટીઃ ક્ષત્રિયાણાં તેજસા બાલકઃ શુભઃ ।
દર્શનાદ્બાલકસ્યાશુ સર્વે જાતા વિલોચનાઃ ॥ ૧૬॥

બભ્રમુર્ગિરિદુર્ગેષુ જન્માન્ધા ઇવ ક્ષત્રિયાઃ ।
ચિન્તિતં મનસા સર્વૈઃ કિમેતદિતિ સામ્પ્રતમ્ ॥ ૧૭॥

સર્વે ચક્ષુર્વિહીના યજ્જાતા સ્મ બાલદર્શનાત્ ।
બ્રાહ્મણ્યાસ્તુ પ્રભાવોઽયં સતીવ્રતબલં મહત્ ॥ ૧૮॥

ક્ષણાદ્વામોઘસઙ્કલ્પાઃ કિં કરિષ્યન્તિદુઃખિતાઃ ।
ઇતિ સઞ્ચિન્ત્ય મનસા નેત્રહીના નિરાશ્રયાઃ ॥ ૧૯॥

બ્રાહ્મણીં શરણં જગ્મુર્હૈહયા ગતચેતસઃ ।
પ્રણેમુસ્તાં ભયત્રસ્તાં કૃતાઞ્જલિપુટાશ્ચ તે ॥ ૨૦॥

ઊચુશ્ચૈનાં ભયોદ્વિગ્નાં દૃષ્ટ્યર્થં ક્ષત્રિયર્ષભાઃ ।
પ્રસીદ સુભગે માતઃ સેવકાસ્તે વયં કિલ ॥ ૨૧॥

કૃતાપરાધા રમ્ભોરુ ક્ષત્રિયાઃ પાપબુદ્ધયઃ ।
દર્શનાત્તવ તન્વઙ્ગિ જાતાઃ સર્વે વિલોચનાઃ ॥ ૨૨॥

મુખં તે નૈવ પશ્યામો જન્માન્ધા ઇવ ભામિનિ ।
અદ્ભુતં તે તપો વીર્યં કિં કુર્મઃ પાપકારિણઃ ॥ ૨૩॥

શરણં તે પ્રપન્નાઃ સ્મો દેહિ ચક્ષૂંષિ માનદે ।
અન્ધત્વં મરણાદુગ્રં કૃપાં કર્તું ત્વમર્હસિ ॥ ૨૪॥

પુનર્દૃષ્ટિપ્રદાનેન સેવકાન્ક્ષત્રિયાન્કુરુ ।
ઉપરમ્ય ચ ગચ્છેમ સહિતાઃ પાપકર્મણઃ ॥ ૨૫॥

અતઃ પરં ન કર્તવ્યમીદૃશં કર્મ કર્હિચિત્ ।
ભાર્ગવાણાં તુ સર્વેષાં સેવકાઃ સ્મો વયં કિલ ॥ ૨૬॥

અજ્ઞાનાદ્યત્કૃતં પાપં ક્ષન્તવ્યં તત્ત્વયાધુના ।
વૈરં નાતઃ પરં ક્વાપિ ભૃગુભિઃ ક્ષત્રિયૈઃ સહ ॥ ૨૭॥

કર્તવ્યં શપથૈઃ સમ્યગ્વર્તિતવ્યં તુ હૈહયૈઃ ।
સપુત્રા ભવ સુશ્રોણિ પ્રણતાઃ સ્મો વયં ચ તે ॥ ૨૮॥

પ્રસાદં કુરુ કલ્યાણિ ન દ્વિષ્યામઃ કદાચન ।
વ્યાસ ઉવાચ ।
ઇતિ તેષાં વચઃ શ્રુત્વા બ્રાહ્મણી વિસ્મયાન્વિતા ॥ ૨૯॥

તાનાહ પ્રણતાન્દુઃસ્થાનાશ્વાસ્ય ગતલોચનાન્ ।
ગૃહીતા ન મયા દૃષ્ટિર્યુષ્માકં ક્ષત્રિયાઃ કિલ ॥ ૩૦॥

નાહં રુષાન્વિતા સત્યં કારણં શ‍ૃણુતાદ્ય યત્ ।
અયં ચ ભાર્ગવો નૂનમૂરુજઃ કુપિતોઽદ્ય વઃ ॥ ૩૧॥

ચક્ષૂંષિ તેન યુષ્માકં સ્તમ્ભિતાનિ રુષાવતા ।
સ્વબન્ધૂન્નિહતાંજ્ઞાત્વા ગર્ભસ્થાનપિ ક્ષત્રિયૈઃ ॥ ૩૨॥

અનાગસો ધર્મપરાંસ્તાપસાન્ધનકામ્યયા ।
ગર્ભાનપિ યદા યૂયં ભૃગૂનઘ્નંસ્તુ પુત્રકાઃ ॥ ૩૩॥

તદાયમૂરુણા ગર્ભો મયા વર્ષશતં ધૃતઃ ।
ષડઙ્ગશ્ચાખિલો વેદો ગૃહીતોઽનેન ચાઞ્જસા ॥ ૩૪॥

ગર્ભસ્થેનાપિ બાલેન ભૃગુવંશવિવૃદ્ધયે ।
સોઽપિ પિતૃવધાન્નૂનં ક્રોધેદ્ધો હન્તુમિચ્છતિ ॥ ૩૫॥

ભગવત્યાઃ પ્રસાદેન જાતોઽયં મમ બાલકઃ ।
તેજસા યસ્ય દિવ્યેન ચક્ષૂંષિ મુષિતાનિ વઃ ॥ ૩૬॥

તસ્માદૌર્વં સુતં મેઽદ્ય યાચધ્વં વિનયાન્વિતાઃ ।
પ્રણિપાતેન તુષ્ટોઽસૌ દૃષ્ટિં વઃ પ્રતિમોક્ષ્યતિ ॥ ૩૭॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્યા હૈહયાસ્તુષ્ટુવુશ્ચ તમ્ ।
પ્રણેમુર્વિનયોપેતા ઊરુજં મુનિસત્તમમ્ ॥ ૩૮॥

સ સન્તુષ્ટો બભૂવાથ તાનુવાચ વિચક્ષુષઃ ।
ગચ્છધ્વં સ્વગૃહાન્ભૂપા મમાખ્યાનકૃતં વચઃ ॥ ૩૯॥

અવશ્યમ્ભાવિભાવાસ્તે ભવન્તિ દેવનિર્મિતાઃ ।
નાત્ર શોકસ્તુ કર્તવ્યઃ પુરુષેણ વિજાનતા ॥ ૪૦॥

પૂર્વવદૃષયઃ સર્વે પ્રાપ્નુવન્તુ યથાસુખમ્ ।
વ્રજન્તુ વિગતક્રોધા ભવનાનિ યથાસુખમ્ ॥ ૪૧॥

ઇતિ તેન સમાદિષ્ટા હૈહયાઃ પ્રાપ્તલોચનાઃ ।
ઔર્વમામન્ત્ર્ય જગ્મુસ્તે સદનાનિ યથારુચિ ॥ ૪૨॥

બ્રાહ્મણી તં સુતં દિવ્યં ગૃહીત્વા સ્વાશ્રમં ગતા ।
પાલયામાસ ભૂપાલ તેજસ્વિનમતન્દ્રિતા ॥ ૪૩॥

એવં તે કથિતં રાજન્ ભૃગૂણાં તુ વિનાશનમ્ ।
લોભાવિષ્ટૈઃ ક્ષત્રિયૈશ્ચ યત્કૃતં પાતકં કિલ ॥ ૪૪॥

જનમેજય ઉવાચ ।
શ્રુતં મયા મહત્કર્મ ક્ષત્રિયાણાઞ્ચ દારુણમ્ ।
કારણં લોભ એવાત્ર દુઃખદશ્ચોભયોસ્તુ સઃ ॥ ૪૫॥

કિઞ્ચિત્પ્રષ્ટુમિહેચ્છામિ સંશયં વાસવીસુત ।
હૈહયાસ્તે કથં નામ્ના ખ્યાતા ભુવિ નૃપાત્મજાઃ ॥ ૪૬॥

યદોસ્તુ યાદવાઃ કામં ભરતાદ્ભારતાસ્તથા ।
હૈહયઃ કોઽપિ રાજાભૂત્તેષાં વંશે પ્રતિષ્ઠિતઃ ॥ ૪૭॥

તદહં શ્રોતુમિચ્છામિ કારણં કરુણાનિધે ।
હૈહયાસ્તે કથં જાતાઃ ક્ષત્રિયાઃ કેન કર્મણા ॥ ૪૮॥

વ્યાસ ઉવાચ ।
હૈહયાનાં સમુત્પત્તિં શ‍ૃણુ ભૂપ સવિસ્તરામ્ ।
પુરાતનીં સુપુણ્યાં ચ કથાં પાપપ્રણાશિનીમ્ ॥ ૪૯॥

કસ્મિંશ્ચિત્સમયે ભૂપ સૂર્યપુત્રઃ સુશોભનઃ ।
રેવન્તેતિ ચ વિખ્યાતો રૂપવાનમિતપ્રભઃ ॥ ૫૦॥

ઉચ્ચૈઃશ્રવસમારુહ્ય હયરત્નં મનોહરમ્ ।
જગામ વિષ્ણુસદનં વૈકુણ્ઠં ભાસ્કરાત્મજઃ ॥ ૫૧॥

ભગવદ્દર્શનાકાઙ્ક્ષી હયારૂઢો યદાગતઃ ।
હયસ્થસ્તુ તદા દૃષ્ટો લક્ષ્મ્યાસૌ રવિનન્દનઃ ॥ ૫૨॥

રમા વીક્ષ્ય હયં દિવ્યં ભ્રાતરં સાગરોદ્ભવમ્ ।
રૂપેણ વિસ્મિતા તસ્ય તસ્થૌ સ્તમ્ભિતલોચના ॥ ૫૩॥

ભગવાનપિ તં દૃષ્ટ્વા હયારૂઢં મનોહરમ્ ।
આગચ્છન્તં રમાં વિષ્ણુઃ પપ્રચ્છ પ્રણયાત્પ્રભુઃ ॥ ૫૪॥

કોઽયમાયાતિ ચાર્વઙ્ગિ હયારૂઢ ઇવાપરઃ ।
સ્મરતેજસ્તનુઃ કાન્તે મોહયન્ભુવનત્રયમ્ ॥ ૫૫॥

પ્રેક્ષમાણા તદા લક્ષ્મીસ્તચ્ચિત્તા દૈવયોગતઃ ।
નોવાચ વચનં કિઞ્ચિત્પૃષ્ટાપિ ચ પુનઃ પુનઃ ॥ ૫૬॥

વ્યાસ ઉવાચ ।
અશ્વાસક્તમતિં વીક્ષ્ય કામિનીમતિમોહિતામ્ ।
પશ્યન્તીં પરમપ્રેમ્ણા ચઞ્ચલાક્ષીં ચ ચઞ્ચલામ્ ॥ ૫૭॥

તામાહ ભગવાન્કુદ્ધઃ કિં પશ્યસિ સુલોચને ।
મોહિતા ચ હરિં દૃષ્ટ્વા પૃષ્ટા નૈવાભિભાષસે ॥ ૫૮॥

સર્વત્ર રમસે યસ્માદ્રમા તસ્માદ્ભવિષ્યસિ ।
ચઞ્ચલત્વાચ્ચલેત્યેવં સર્વથૈવ ન સંશયઃ ॥ ૫૯॥

પ્રાકૃતા ચ યથા નારી નૂનં ભવતિ ચઞ્ચલા ।
તથા ત્વમપિ કલ્યાણિ સ્થિરા નૈવ કદાચન ॥ ૬૦॥

ત્વં હયં મત્સમીપસ્થા સમીક્ષ્ય યદિ મોહિતા ।
વડવા ભવ વામોરુ મર્ત્યલોકેઽતિદારુણે ॥ ૬૧॥

ઇતિ શપ્તા રમા દેવી હરિણા દૈવયોગતઃ ।
રુરોદ વેપમાના સા ભયભીતાતિદુઃખિતા ॥ ૬૨॥

તમુવાચ રમાનાથ શઙ્કિતા ચારુહાસિની ।
પ્રણમ્ય શિરસા દેવં સ્વપતિં વિનયાન્વિતા ॥ ૬૩॥

દેવદેવ જગન્નાથ કરુણાકર કેશવ ।
સ્વલ્પેઽપરાધે ગોવિન્દ કસ્માચ્છાપં દદાસિ મે ॥ ૬૪॥

ન કદાચિન્મયા દૃષ્ટઃ ક્રોધસ્તે હીદૃશઃ પ્રભો ।
ક્વ ગતસ્તે મયિ સ્નેહઃ સહજો ન તુ નશ્વરઃ ॥ ૬૫॥

વજ્રપાતસ્તુ શત્રૌ વૈ કર્તવ્યો ન સુહૃજ્જને ।

સદાહં વરયોગ્યા તે શાપયોગ્યા કથં કૃતા ॥ ૬૬॥

પ્રાણાંસ્ત્યક્ષ્યામિ ગોવિન્દ પશ્યતોઽદ્ય તવાગ્રતઃ ।
કથં જીવે ત્વયા હીના વિરહાનલતાપિતા ॥ ૬૭॥

પ્રસાદં કુરુ દેવેશ શાપાદસ્માત્સુદારુણાત્ ।
કદા મુક્તા સમીપં તે પ્રાપ્નોમિ સુખદં વિભૌ ॥ ૬૮॥

હરિરુવાચ ।
યદા તે ભવિતા પુત્રઃ પૃથિવ્યાં મત્સમઃ પ્રિયે ।
તદા માં પ્રાપ્ય તન્વઙ્ગિ સુખિતા ત્વં ભવિષ્યસિ ॥ ૬૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
હૈહયાનામુત્પત્તિપ્રસઙ્ગે રમાવિષ્ણુસંવાદવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૬.૧૭॥

## ૬.૧૮ અષ્ટાદશોઽધ્યાયઃ । શિવપ્રસાદેન લક્ષ્મીદ્વારા ભગવત્યાઃ સમારાધનવર્ણનમ્ ।

જનમેજય ઉવાચ ।
ઇતિ શપ્તા ભગવતા સિન્ધુજા કોપયોગતઃ ।
કથં સા વડવા જાતા રેવન્તેન ચ કિં કૃતમ્ ॥ ૧॥

કસ્મિન્દેશેઽબ્ધિજા દેવી વડવારૂપધારિણી ।
સંસ્થિતૈકાકિની બાલા પરોષિત્પતિકા યથા ॥ ૨॥

કાલં કિયન્તમાયુષ્મન્ વિયુક્તા પતિના રમા ।
સંસ્થિતા વિજનેઽરણ્યે કિં કૃતં ચ તયા પુનઃ ॥ ૩॥

સમાગમં કદા પ્રાપ્તા વાસુદેવસ્ય સિન્ધુજા ।
પુત્રઃ કથં તયા પ્રાપ્તો નારાયણવિયુક્તયા ॥ ૪॥

એતદ્વૃત્તાન્તમાર્યેશ કથયસ્વ સવિસ્તરમ્ ।
શ્રોતુકામોઽસ્મિ વિપ્રેન્દ્ર કથાખ્યાનમનુત્તમમ્ ॥ ૫॥

સૂત ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા વ્યાસઃ પરીક્ષિત્તનયેન વૈ ।
કથયામાસ ભો વિપ્રાઃ કથામેતાં સુવિસ્તરામ્ ॥ ૬॥

વ્યાસ ઉવાચ ।
શ ृણુ રાજન્ પ્રવક્ષ્યામિ કથાં પૌરાણિકીં શુભામ્ ।

પાવનીં સુખદાં કર્ણે વિશદાક્ષરસંયુતામ્ ॥ ૭॥

રેવન્તસ્તુ રમાં દૃષ્ટ્વા શપ્તા દેવેન કામિનીમ્ ।
ભયાર્તઃ પ્રયયૌ દૂરાત્પ્રણમ્ય જગતાં પતિમ્ ॥ ૮॥

પિતુઃ સકાશં ત્વરિતો વીક્ષ્ય કોપં જગત્પતેઃ ।
નિવેદયામાસ કથાં ભાસ્કરાય સ શાપજામ્ ॥ ૯॥

દુઃખિતા સા રમા દેવી પ્રણમ્ય જગદીશ્વરમ્ ।
આજ્ઞપ્તા માનુષં લોકં પ્રાપ્તા કમલલોચના ॥ ૧૦॥

સૂર્યપત્ન્યા તપસ્તપ્તં યત્ર પૂર્વં સુદારુણમ્ ।
તત્રૈવ સા યયાવાશુ વડવારૂપધારિણી ॥ ૧૧॥

કાલિન્દીતમસાસઙ્ગે સુપર્ણાક્ષસ્ય ચોત્તરે ।
સર્વકામપ્રદે સ્થાને સુરમ્યવનમણ્ડિતે ॥ ૧૨॥

તત્ર સ્થિતા મહાદેવં શઙ્કરં વાઞ્છિતપ્રદમ્ ।
દધ્યૌ ચૈકેન મનસા શૂલિનં ચન્દ્રશેખરમ્ ॥ ૧૩॥

પઞ્ચાનનં દશભુજં ગૌરીદેહાર્ધધારિણમ્ ।
કર્પૂરગૌરદેહાભં નીલકણ્ઠં ત્રિલોચનમ્ ॥ ૧૪॥

વ્યાઘ્રાજિનધરં દેવં ગજચર્મોત્તરીયકમ્ ।
કપાલમાલાકલિતં નાગયજ્ઞોપવીતિનમ્ ॥ ૧૫॥

સાગરસ્ય સુતા કૃત્વા હયીરૂપં મનોહરમ્ ।
તસ્મિંસ્તીર્થે રમાદેવી ચકાર દુશ્ચરં તપઃ ॥ ૧૬॥

ધ્યાયમાના પરં દેવં વૈરાગ્યં સમુપાશ્રિતા ।
દિવ્યં વર્ષસહસ્રં તુ ગતં તત્ર મહીપતે ॥ ૧૭॥

તતસ્તુષ્ટો મહાદેવો વૃષારૂઢસ્ત્રિલોચનઃ ।
પ્રત્યક્ષોઽભૂન્મહેશાનઃ પાર્વતીસહિતઃ પ્રભુઃ ॥ ૧૮॥

તત્રૈત્ય સગણઃ શમ્ભુસ્તામાહ હરિવલ્લભામ્ ।
તપસ્યન્તીં મહાભાગામશ્વિનીરૂપધારિણીમ્ ॥ ૧૯॥

કિં તપસ્યસિ કલ્યાણિ જગન્માતર્વદસ્વ મે ।
સર્વાર્થદઃ પતિસ્તેઽસ્તિ સર્વલોકવિધાયકઃ ॥ ૨૦॥

હરિં ત્યક્ત્વાદ્ય માં કસ્માત્સ્તૌષિ દેવિ જગત્પતિમ્ ।
વાસુદેવં જગન્નાથં ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૨૧॥

વેદોક્તં વચનં કાર્યં નારીણાં દેવતા પતિઃ ।
નાન્યસ્મિન્સર્વથા ભાવઃ કર્તવ્યઃ કર્હિચિત્ક્વચિત્ ॥ ૨૨॥

પતિશુશ્રૂષણં સ્ત્રીણાં ધર્મ એવ સનાતનઃ ।
યાદૃશસ્તાદૃશઃ સેવ્યઃ સર્વથા શુભકામ્યયા ॥ ૨૩॥

નારાયણસ્તુ સર્વેષાં સેવ્યો યોગ્યઃ સદૈવ હિ ।
તં ત્યક્ત્વા દેવદેવેશં કિં માં ધ્યાયસિ સિન્ધુજે ॥ ૨૪॥

લક્ષ્મીરુવાચ ।
આશુતોષ મહેશાન શપ્તાહં પતિના શિવ ।
માં સમુદ્ધર દેવેશ શાપાદસ્માદ્દયાનિધે ॥ ૨૫॥

તદોક્તં હરિણા શમ્ભો શાપાનુગ્રહકારણમ્ ।
વિજ્ઞપ્તેન મયા કામં દયાયુક્તેન વિષ્ણુના ॥ ૨૬॥

યદા તે ભવિતા પુત્રસ્તદા શાપસ્ય મોક્ષણમ્ ।
ભવિષ્યતિ ચ વૈકુણ્ઠવાસસ્તે કમલાલયે ॥ ૨૭॥

ઇત્યુક્તાહં તપસ્તપ્તુમાગતાસ્મિ તપોવને ।
આરાધિતો મયા દેવ ત્વં સર્વાર્થપ્રદાયકઃ ॥ ૨૮॥

પતિસઙ્ગં વિના પુત્રં દેવદેવ લભે કથમ્ ।
સ તુ તિષ્ઠતિ વૈકુણ્ઠે ત્યક્ત્વા વામામનાગસમ્ ॥ ૨૯॥

વરં મે દેહિ દેવેશ યદિ તુષ્ટોઽસિ શઙ્કર ।
તવ તસ્ય દ્વિધા ભાવો નાસ્તિ નૂનં કદાચન ॥ ૩૦॥

મયૈતદ્ગિરિજાકાન્ત જ્ઞાતં પત્યુઃ પુરો હર ।
યસ્ત્વં યોઽસૌ પુનર્યોઽસૌ સ ત્વં નાસ્ત્યત્ર સંશયઃ ॥ ૩૧॥

એકત્વં ચ મયા જ્ઞાત્વા મયા તે સ્મરણં કૃતમ્ ।
અન્યથા મમ દોષસ્ત્વામાશ્રયન્ત્યા ભવેચ્છિવ ॥ ૩૨॥

શિવ ઉવાચ ।
કથં જ્ઞાતસ્ત્વયા દેવિ મમ તસ્ય ચ સુન્દરિ ।
ઐક્યભાવો હરેર્નૂનં સત્યં મે વદ સિન્ધુજે ॥ ૩૩॥

એકત્વં ચ ન જાનન્તિ દેવાશ્ચ મુનયસ્તથા ।
જ્ઞાનિનો વેદતત્ત્વજ્ઞાઃ કુતર્કોપહતાઃ કિલ ॥ ૩૪॥

મદ્ભક્તા વાસુદેવસ્ય નિન્દકા બહવસ્તથા ।
વિષ્ણભક્તાસ્તુ બહવો મમ નિન્દાપરાયણાઃ ॥ ૩૫॥

ભવન્તિ કાલભેદેન કલૌ દેવિ વિશેષતઃ ।
કથં જ્ઞાતસ્ત્વયા ભદ્રે દુર્જ્ઞેયો હ્યકૃતાત્મભિઃ ॥ ૩૬॥

સર્વથા ત્વૈક્યભાવસ્તુ હરેર્મમ ચ દુર્લભઃ ।
વ્યાસ ઉવાચ ।
ઇતિ સા શમ્ભુના પૃષ્ટા તુષ્ટેન હરિવલ્લભા ॥ ૩૭॥

વૃત્તાન્તં તસ્ય વિજ્ઞાતં પ્રવક્તુમુપચક્રમે ।
શિવં પ્રતિ રમા તત્ર પ્રસન્નવદના ભૃશમ્ ॥ ૩૮॥

લક્ષ્મીરુવાચ ।
એકદા દેવદેવેશ વિષ્ણુર્ધ્યાનપરો રહઃ ।
દૃષ્ટો મયા તપઃ કુર્વન્પદ્માસનગતો યદા ॥ ૩૯॥

તદાહં વિસ્મિતા દેવં તમપૃચ્છં પતિં કિલ ।
પ્રબુદ્ધં સુપ્રસન્નં ચ જ્ઞાત્વા વિનયપૂર્વકમ્ ॥ ૪૦॥

દેવદેવ જગન્નાથ યદાહં નિર્ગતાર્ણવાત્ ।
મથ્યમાનાત્સુરૈર્દૈત્યૈઃ સર્વૈર્બ્રહ્માદિભિઃ પ્રભો ॥ ૪૧॥

વીક્ષિતાશ્ચ મયા સર્વે પતિકામનયા તદા ।
વૃતસ્ત્વં સર્વદેવેભ્યઃ શ્રેષ્ઠોઽસીતિ વિનિશ્ચયાત્ ॥ ૪૨॥

ત્વં કં ધ્યાયસિ સર્વેશ સંશયોઽયં મહાન્મમ ।
પ્રિયોઽસિ કૈટભારે મે કથયસ્વ મનોગતમ્ ॥ ૪૩॥

વિષ્ણુરુવાચ ।
શ઼ૃણુ કાન્તે પ્રવક્ષ્યામિ યં ધ્યાયામિ સુરોત્તમમ્ ।
આશુતોષં મહેશાનં ગિરિજાવલ્લભં હૃદિ ॥ ૪૪॥

કદાચિદ્દેવદેવો માં ધ્યાયત્યમિતવિક્રમઃ ।
ધ્યાયામ્યહં ચ દેવેશં શઙ્કરં ત્રિપુરાન્તકમ્ ॥ ૪૫॥

શિવસ્યાહં પ્રિયઃ પ્રાણઃ શઙ્કરસ્તુ તથા મમ ।

ઉભયોરન્તરં નાસ્તિ મિથઃ સંસક્તચેતસોઃ ॥ ૪૬॥

નરકં યાન્તિ તે નૂનં યે દ્વિષન્તિ મહેશ્વરમ્ ।
ભક્તા મમ વિશાલાક્ષિ સત્યમેતદ્બ્રવીમ્યહમ્ ॥ ૪૭॥

ઇત્યુક્તં દેવદેવેન વિષ્ણુના પ્રભવિષ્ણુના ।
એકાન્તે કિલ પૃષ્ટેન મયા શૈલસુતાપ્રિય ॥ ૪૮॥

તસ્માત્ત્વાં વલ્લભં વિષ્ણોર્જ્ઞાત્વા ધ્યાતવતી હ્યહમ્ ।
તથા કુરુ મહેશાન યથા મે પ્રિયસઙ્ગમઃ ॥ ૪૯॥

વ્યાસ ઉવાચ ।
ઇતિ શ્રિયો વચઃ શ્રુત્વા પ્રત્યુવાચ મહેશ્વરઃ ।
તામાશ્વાસ્ય પ્રિયૈર્વાક્યૈર્યથાર્થં વાક્યકોવિદઃ ॥ ૫૦॥

સ્વસ્થા ભવ પૃથુશ્રોણિ તુષ્ટોઽહં તપસા તવ ।
સમાગમસ્તે પતિના ભવિષ્યતિ ન સંશયઃ ॥ ૫૧॥

અત્રૈવ હયરૂપેણ ભગવાઞ્જગદીશ્વરઃ ।
આગમિષ્યતિ તે કામં પૂર્ણં કર્તું મયેરિતઃ ॥ ૫૨॥

તથાહં પ્રેરયિષ્યામિ તં દેવં મધુસૂદનમ્ ।
યથાસૌ હયરૂપેણ ત્વામેષ્યતિ મદાતુરઃ ॥ ૫૩॥

પુત્રસ્તે ભવિતા સુભ્રુ નારાયણસમઃ ક્ષિતૌ ।
ભવિષ્યતિ સ ભૂપાલઃ સર્વલોકનમસ્કૃતઃ ॥ ૫૪॥

સુતં પ્રાપ્ય મહાભાગે ત્વં તેન પતિના સહ ।
ગન્તાસિ દેવિ વૈકુણ્ઠં પ્રિયા તસ્ય ભવિષ્યસિ ॥ ૫૫॥

એકવીરેતિ નામ્નાસૌ ખ્યાતિં યાસ્યતિ તે સુતઃ ।
તસ્માત્તુ હૈહયો વંશો ભુવિ વિસ્તારમેષ્યતિ ॥ ૫૬॥

પરં તુ વિસ્મૃતાસિ ત્વં હૃદિસ્થાં પરમેશ્વરીમ્ ।
મદાન્ધા મત્તચિત્તા ચ તેન તે ફલમીદૃશમ્ ॥ ૫૭॥

અતસ્તદ્દોષશાન્ત્યર્થં હૃદિસ્થાં પરદેવતામ્ ।
શરણં યાહિ સર્વાત્મભાવેન જલધેઃ સુતે ॥ ૫૮॥

અન્યથા તવ ચિત્તં તુ કથં ગચ્છેદ્ધયોત્તમે ।
વ્યાસ ઉવાચ ।

ઇતિ દત્ત્વા વરં દેવ્યૈ ભગવાઞ્છૈલજાપતિઃ ॥ ૫૯॥

અન્તર્ધાનં ગતઃ સાક્ષાદુમયા સહિતઃ શિવઃ ।
સાપિ તત્રૈવ ચાર્વઙ્ગી સંસ્થિતા કમલાસના ॥ ૬૦॥

ધ્યાયન્તી ચરણામ્ભોજં દેવ્યાઃ પરમશોભનમ્ ।
દેવાસુરશિરોરત્નનિઘૃષ્ટનખમણ્ડલમ્ ॥ ૬૧॥

પ્રેમગદ્ગદયા વાચા તુષ્ટાવ ચ મુહુર્મુહુઃ ।
પ્રતીક્ષમાણા ભર્તારં હયરૂપધરં હરિમ્ ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
શિવપ્રસાદેન લક્ષ્મીદ્વારા ભગવત્યાઃ સમારાધનવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૬.૧૮॥

## ૬.૧૯ એકોનવિંશોઽધ્યાયઃ । પુત્રજન્માનન્તરં સ્વસ્વરૂપેણ વૈકુણ્ઠગમનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તસ્યૈ દત્ત્વા વરં શમ્ભુઃ કૈલાસં ત્વરિતો યયૌ ।
રમ્યં દેવગણૈર્જુષ્ટમપ્સરોભિશ્ચ મણ્ડિતમ્ ॥ ૧॥

તત્ર ગત્વા ચિત્રરૂપં ગણં કાર્યવિશારદમ્ ।
પ્રેષયામાસ વૈકુણ્ઠે લક્ષ્મીકાર્યાર્થસિદ્ધયે ॥ ૨॥

શિવ ઉવાચ ।
ચિત્રરૂપ હરિં ગત્વા બ્રૂહિ ત્વં વચનાન્મમ ।
યથાસૌ દુઃખિતાં પત્નીં વિશોકાં ચ કરિષ્યતિ ॥ ૩॥

ઇત્યુક્તશ્ચિત્રરૂપોઽથ નિર્જગામ ત્વરાન્વિતઃ ।
વૈકુણ્ઠં પરમં સ્થાનં વૈષ્ણવૈશ્ચ ગણૈર્વૃતમ્ ॥ ૪॥

નાનાદ્રુમગણાકીર્ણં વાપીશતવિરાજિતમ્ ।
સઞ્જુષ્ટં હંસકારણ્ડમયૂરશુકકોકિલૈઃ ॥ ૫॥

ઉચ્ચપ્રાસાદસંયુક્તં પતાકાભિરલઙ્કૃતમ્ ।
નૃત્યગીતકલાપૂર્ણં મન્દારદ્રુમસંયુતમ્ ॥ ૬॥

બકુલાશોકતિલકચમ્પકાલિવિમણ્ડિતમ્ ।
કૂજિતૈર્વિહગાનાં તુ કર્ણાહ્લાદકરૈર્યુતમ્ ॥ ૭॥

સંવીક્ષ્ય ભવનં વિષ્ણોર્દ્વાઃસ્થૌ પ્રાહ પ્રણમ્ય ચ ।

જયવિજયનામાનૌ વેત્રપાણી સ્થિતાવુભૌ ॥ ૮॥

ચિત્રરૂપ ઉવાચ ।
ભો નિવેદયત શીઘ્રં હરયે પરમાત્મને ।
દૂતં પ્રાપ્યં હરસ્યાત્ર પ્રેરિતં શૂલપાણિના ॥ ૯॥

તચ્છ્રુત્વા વચનં તસ્ય જયઃ પરમબુદ્ધિમાન્ ।
ગત્વા હરિં પ્રણમ્યાહ કૃતાઞ્જલિપુટઃ પુરઃ ॥ ૧૦॥

દેવદેવ રમાકાન્ત કરુણાકર કેશવ ।
દ્વારિ તિષ્ઠતિ દૂતોઽત્ર શઙ્કરસ્ય સમાગતઃ ॥ ૧૧॥

આજ્ઞાપય પ્રવેષ્ટવ્યો ન વેતિ ગરુડધ્વજ ।
ચિત્રરૂપધરોઽપ્યસ્તિ ન જાને કાર્યગૌરવમ્ ॥ ૧૨॥

ઇત્યાકર્ણ્ય હરિઃ પ્રાહ જયં પ્રજ્ઞાતકારણઃ ।
પ્રવેશયાત્ર રુદ્રસ્ય ભૃત્યં સમયસંસ્થિતમ્ ॥ ૧૩॥

ઇત્યાકર્ણ્ય જયસ્તૂર્ણં ગત્વા તં પરમાદ્ભુતમ્ ।
એહીત્યાકારયામાસ જયઃ શઙ્કરસેવકમ્ ॥ ૧૪॥

પ્રવેશિતો જયેનાથ ચિત્રરૂપસ્તથાકૃતિઃ ।
પ્રણમ્ય દણ્ડવદ્વિષ્ણું કૃતાઞ્જલિપુટઃ સ્થિતઃ ॥ ૧૫॥

દૃષ્ટ્વા તં વિસ્મયં પ્રાપ ભગવાન્ ગરુડધ્વજઃ ।
ચિત્રરૂપધરં શમ્ભોઃ સેવકં વિનયાન્વિતમ્ ॥ ૧૬॥

પપ્રચ્છ તં સ્મિતં કૃત્વા ચિત્રરૂપં રમાપતિઃ ।
કુશલં દેવદેવસ્ય સકુટુમ્બસ્ય ચાનઘ ॥ ૧૭॥

કસ્માત્ત્વં પ્રેષિતોઽસ્યત્ર બ્રૂહિકાર્યં હરસ્ય કિમ્ ।
અથવા દેવતાનાં ચ કિઞ્ચિત્કાર્યં સમુત્થિતમ્ ॥ ૧૮॥

દૂત ઉવાચ ।
કિમજ્ઞાતં તવાસ્તીહ સંસારે ગરુડધ્વજ ।
વર્તમાનં ત્રિકાલજ્ઞ યદહં પ્રબ્રવીમિ વૈ ॥ ૧૯॥

પ્રેષિતોઽસ્મિ ભવેનાત્ર વિજ્ઞસ્તુ ત્વાં જનાર્દન ।
હરસ્ય વચનાદ્વાક્યં પ્રબ્રવીમિ ત્વયિ પ્રભો ॥ ૨૦॥

તેનોક્તમેતદ્દેવેશ ભાર્યા તે કમલાલયા ।

તપસ્તપતિ કાલિન્દીતમસાસઙ્ગમે વિભો ॥ ૨૧॥

હયીરૂપધરા દેવી સર્વાર્થસિદ્ધિદાયિની ।
ધ્યાતું યોગ્યામરગણૈર્માનવૈર્યક્ષકિન્નરૈઃ ॥ ૨૨॥

વિના તયા નરઃ કોઽપિસુખભાગી ભવેન્ન હિ ।
તાં ત્યક્ત્વા પુણ્ડરીકાક્ષ પ્રાપ્નોષિ કિં સુખં હરે ॥ ૨૩॥

દુર્બલોઽપિ સ્ત્રિયં પાતિ નિર્ધનોઽપિ જગત્પતે ।
વિનાપરાધં ચ વિભો કિં ત્યક્તા જગદીશ્વરી ॥ ૨૪॥

દુઃખં પ્રાપ્નોતિ સંસારે યસ્ય ભાર્યા જગદ્ગુરો ।
ધિક્તસ્ય જીવિતં લોકે નિન્દિતં ત્વરિમણ્ડલે ॥ ૨૫॥

સકામા રિપવસ્તેઽદ્ય દૃષ્ટ્વા તાં દુઃખિતા ભૃશમ્ ।
ત્વાં વિયુક્તં ચ રમયા હસિષ્યન્તિ દિવાનિશમ્ ॥ ૨૬॥

રમાં રમય દેવેશ ત્વદુત્સઙ્ગગતાં કુરુ ।
સર્વલક્ષણસમ્પન્નાં સુશીલાં ચ સુરૂપિણીમ્ ॥ ૨૭॥

સુખિતો ભવ તાં પ્રાપ્ય વલ્લભાં ચારુહાસિનીમ્ ।
કાન્તાવિરહજં દુઃખં સ્મરામ્યહમનાતુરઃ ॥ ૨૮॥

મમ ભાર્યા મૃતા વિષ્ણો દક્ષયજ્ઞે સતી યદા ।
તદાહં દુઃસહં દુઃખં ભુક્તવાનમ્બુજેક્ષણ ॥ ૨૯॥

સંસારેઽસ્મિન્નરઃ કોઽપિ માભૂન્મત્સદૃશોઽપરઃ ।
મનસાકરવં શોકં તસ્યા વિરહપીડિતઃ ॥ ૩૦॥

કાલેન મહતા પ્રાપ્તા મયા ગિરિસુતા પુનઃ ।
તપસ્તપ્ત્વાતિદુઃસાધ્યં યા દગ્ધા તુ રુષાધ્વરે ॥ ૩૧॥

હરે કિં સુખમાપન્નં ત્વયા સન્ત્યજ્ય કામિનીમ્ ।
એકાકી તિષ્ઠતા કાલં સહસ્રવત્સરાત્મકમ્ ॥ ૩૨॥

ગત્વાશ્વાસ્ય મહાભાગાં સમાનય નિજાલયમ્ ।
માભૂત્કોઽપીહ સંસારે વિમુક્તો રમયા તયા ॥ ૩૩॥

કૃત્વા તુરગરૂપં ત્વં ભજ તાં કમલાલયામ્ ।
ઉત્પાદ્ય પુત્રમાયુષ્મંસ્તામાનય શુચિસ્મિતામ્ ॥ ૩૪॥

વ્યાસ ઉવાચ ।

હરિરાકર્ણ્ય તદ્વાક્યં ચિત્રરૂપસ્ય ભારત ।

તથેત્યુક્ત્વા તુ તં દૂતં પ્રેષયામાસ શઙ્કરમ્ ॥ ૩૫॥

ગતે દૂતેઽથ ભગવાન્વૈકુણ્ઠાત્કામસંયુતઃ ।

જગામ ધૃત્વા તત્રાશુ વાજિરૂપં મનોહરમ્ ॥ ૩૬॥

યત્ર સા વડવારૂપં કૃત્વા તપતિ સિન્ધુજા ।

વિષ્ણુસ્તં દેશમાસાદ્ય તામપશ્યદ્ધયીં સ્થિતામ્ ॥ ૩૭॥

સાપિ તં વીક્ષ્ય ગોવિન્દં હયરૂપધરં પતિમ્ ।

જ્ઞાત્વા વીક્ષ્ય સ્થિતા સાધ્વી વિસ્મિતા સાશ્રુલોચના ॥ ૩૮॥

તયોસ્તુ સઙ્ગમસ્તત્ર પ્રવૃત્તો મન્મથાર્તયોઃ ।

કાલિન્દીતમસાસઙ્ગે પાવને લોકવિશ્રુતે ॥ ૩૯॥

સગર્ભા સા તદા જાતા વડવા હરિવલ્લભા ।

સુષુવે સુન્દરં બાલં તત્રૈવ સુગુણોત્તરમ્ ॥ ૪૦॥

તામાહ ભગવાન્વાક્યં પ્રહસ્ય સમયાશ્રિતમ્ ।

ત્યજાદ્ય વાડવં દેહં પૂર્વદેહા ભવાધુના ॥ ૪૧॥

ગમિષ્યાવઃ સ્વવૈકુણ્ઠમાવાં કૃત્વા નિજં વપુઃ ।

તિષ્ઠત્વત્ર કુમારોઽયં ત્વયા જાતઃ સુલોચને ॥ ૪૨॥

લક્ષ્મીરુવાચ ।

સ્વદેહસમ્ભવં પુત્રં કથં હિત્વા વ્રજામ્યહમ્ ।

સ્નેહઃ સુદુસ્ત્યજઃ કામં સ્વાત્મજસ્ય સુરર્ષભ ॥ ૪૩॥

કા ગતિઃ સ્યાદમેયાત્મન્ બાલસ્યાસ્ય નદીતટે ।

અનાથસ્યાસમર્થસ્ય વિજનેઽલ્પતનોરિહ ॥ ૪૪॥

અનાશ્રયં સુતં ત્યક્ત્વા કથં ગન્તું મનો મમ ।

સમર્થં સદયં સ્વામિન્ ભવેદમ્બુજલોચન ॥ ૪૫॥

દિવ્યદેહૌ તતો જાતૌ લક્ષ્મીનારાયણાવુભૌ ।

વિમાનવરસંવિષ્ટૌ સ્તૂયમાનૌ સુરૈર્દિવિ ॥ ૪૬॥

ગન્તુકામં પતિં પ્રાહ કમલા કમલાપતિમ્ ।

ગૃહાણેમં સુતં નાથ નાહં શક્તાસ્મિ હાપિતુમ્ ॥ ૪૭॥

પ્રાણપ્રિયોઽસ્તિ મે પુત્રઃ કાન્ત્યા ત્વત્સદૃશઃ પ્રભો ।
ગૃહીત્વૈનં ગમિષ્યાવો વૈકુણ્ઠં મધુસૂદન ॥ ૪૮॥

હરિરુવાચ ।
મા વિષાદં પ્રિયે કર્તું ત્વમર્હસિ વરાનને ।
તિષ્ઠત્વયં સુખેનાત્ર રક્ષા મે વિહિતા ત્વિહ ॥ ૪૯॥

કાર્યં કિમપિ વામોરુ વર્તતે મહદદ્ભુતમ્ ।
નિબોધ કથયામ્યદ્ય સુતસ્યાત્ર વિમોચને ॥ ૫૦॥

તુર્વસુર્નામ વિખ્યાતો યયાતિતનુજો ભુવિ ।
હરિવર્મેતિ પિત્રાસ્ય કૃતં નામ સુવિશ્રુતમ્ ॥ ૫૧॥

સ રાજા પુત્રકામોઽથ તપસ્તપતિ પાવને ।
તીર્થે વર્ષશતં જાતં તસ્ય વૈ કુર્વતસ્તપઃ ॥ ૫૨॥

તસ્યાર્થે નિર્મિતઃ પુત્રો મયાયં કમલાલયે ।
તત્ર ગત્વા નૃપં સુભ્રુ પ્રેરયિષ્યામિ સામ્પ્રતમ્ ॥ ૫૩॥

તસ્મૈ દાસ્યામ્યહં પુત્રં પુત્રકામાય કામિનિ ।
ગૃહીત્વા સ્વગૃહં રાજા પ્રાપયિષ્યતિ બાલકમ્ ॥ ૫૪॥

વ્યાસ ઉવાચ ।
ઇત્યાશ્વાસ્ય પ્રિયાં પદ્માં કૃત્વા રક્ષાં ચ બાલકે ।
વિમાનવરમારુહ્ય પ્રયયૌ પ્રિયયા સહ ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
પુત્રજન્માનન્તરં સ્વસ્વરૂપેણ વૈકુણ્ઠગમનવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૬.૧૯॥

## ૬.૨૦ વિંશોઽધ્યાયઃ । એકવીરાખ્યાનવર્ણનમ્ ।

જનમેજય ઉવાચ ।
સંશયોઽયં મહાનત્ર જાતમાત્રઃ શિશુસ્તથા ।
મુક્તઃ કેન ગૃહીતોઽસાવેકાકી વિજને વને ॥ ૧॥

કા ગતિસ્તસ્ય બાલસ્ય જાતા સત્યવતીસુત ।
વ્યાઘ્રસિંહાદિભિર્હિંસ્રૈર્ગૃહીતો નાતિબાલકઃ ॥ ૨॥

વ્યાસ ઉવાચ ।

લક્ષ્મીનારાયણૌ તસ્માત્સ્થાનાચ્ચ ચલિતૌ યદા ।
તદૈવ તત્ર ચમ્પાખ્યઃ પ્રાપ્તો વિદ્યાધરઃ કિલ ॥ ૩॥

વિમાનવરમારૂઢઃ કામિન્યા સહિતો નૃપ ।
મદનાલસયા કામં ક્રીડમાનો યદૃચ્છયા ॥ ૪॥

વિલોક્ય તં શિશું ભૂમાવેકાકિનમનુત્તમમ્ ।
દેવપુત્રપ્રતીકાશં રમમાણં યથાસુખમ્ ॥ ૫॥

વિમાનાત્તરસોત્તીર્ય ચમ્પકસ્તં શિશુ જવાત્ ।
જગ્રાહ ચ મુદં પ્રાપ નિધિં પ્રાપ્ય યથાધનઃ ॥ ૬॥

ગૃહીત્વા ચમ્પકઃ પ્રાદાદ્દેવ્યૈ તં મદનોપમમ્ ।
મદનાલસાયૈ તં બાલં જાતમાત્રં મનોહરમ્ ॥ ૭॥

સા ગૃહીત્વા શિશું પ્રેમ્ણા સરોમાઞ્ચા સવિસ્મયા ।
મુખં ચુચુમ્બ બાલસ્ય કૃત્વા તુ હૃદયે ભૃશમ્ ॥ ૮॥

આલિઙ્ગિતશ્ચુમ્બિતશ્ચ તયાસૌ પ્રીતિપૂર્વકમ્ ।
ઉત્સઙ્ગે ચ કૃતસ્તન્વ્યા પુત્રભાવેન ભારત ॥ ૯॥

કૃત્વાઙ્કે તૌ સમારૂઢૌ વિમાનં દમ્પતી મુદા ।
પતિં પપ્રચ્છ ચાર્વઙ્ગી પ્રહસ્ય મદનાલસા ॥ ૧૦॥

કસ્યાયં બાલકઃ કાન્ત ત્યક્તઃ કેન ચ કાનને ।
પુત્રોઽયં મમ દેવેન દત્તસ્ત્ર્યમ્બકપાણિના ॥ ૧૧॥

ચમ્પક ઉવાચ ।
પ્રિયે ગત્વાદ્ય પૃચ્છેયં શક્રં સર્વજ્ઞમાશુ વૈ ।
દેવો વા દાનવો વાપિ ગન્ધર્વો વા શિશુઃ કિલ ॥ ૧૨॥

તેનાજ્ઞપ્તઃ કરિષ્યામિ પુત્રં પ્રાપ્તં વનાદમુમ્ ।
અપૃષ્ટ્વા નૈવ કર્તવ્યં કાર્યં કિઞ્ચિન્મયા ધ્રુવમ્ ॥ ૧૩॥

ઇત્યુક્ત્વા તાં ગૃહીત્વા તં વિમાનેનાથ ચમ્પકઃ ।
યયૌ શક્રપુરં તૂર્ણં હર્ષેણોત્ફુલ્લલોચનઃ ॥ ૧૪॥

પ્રણમ્ય પાદયોઃ પ્રીત્યા ચમ્પકસ્તુ શચીપતિમ્ ।
નિવેદ્ય બાલકં પ્રાહ કૃતાઞ્જલિપુટઃ સ્થિતઃ ॥ ૧૫॥

દેવદેવ મયા લબ્ધસ્તીર્થે પરમપાવને ।

કાલિન્દીતમસાસઙ્ગે બાલકોઽયં સ્મરપ્રભઃ ॥ ૧૬॥

કસ્યાયં બાલકઃ કાન્તઃ કથં ત્યક્તઃ શચીપતે ।
આજ્ઞા ચેત્તવ દેવેશ કુર્વેઽહં બાલકં સુતમ્ ॥ ૧૭॥

અતીવ સુન્દરો બાલઃ પ્રિયાયા વલ્લભઃ સુતઃ ।
કૃત્રિમસ્તુ સુતઃ પ્રોક્તો ધર્મશાસ્ત્રેષુ સર્વથા ॥ ૧૮॥

ઇન્દ્ર ઉવાચ ।
પુત્રોઽયં વાસુદેવસ્ય વાજિરૂપધરસ્ય હ ।
હૈહયોઽયં મહાભાગ લક્ષ્મ્યાં જાતઃ પરન્તપઃ ॥ ૧૯॥

ઉત્પાદિતો ભગવતા કાર્યાર્થં કિલ બાલકઃ ।
દાતું નૃપતયે નૂનં યયાતિતનયાય ચ ॥ ૨૦॥

હરિણા પ્રેરિતઃ સોઽદ્ય રાજા પરમધાર્મિકઃ ।
આગમિષ્યતિ પુત્રાર્થં તીર્થે તસ્મિન્મનોરમે ॥ ૨૧॥

તાવત્ત્વં ગચ્છ તત્રૈવ ગૃહીત્વા બાલકં શુભમ્ ।
યાવન્ન યાતિ નૃપતિર્ગ્રહીતું હરિણેરિતઃ ॥ ૨૨॥

ગત્વા તત્ર વિમુચ્યૈનં વિલમ્બં મા કૃથા વર ।
અદૃષ્ટ્વા બાલકં રાજા દુઃખિતશ્ચ ભવિષ્યતિ ॥ ૨૩॥

તસ્માચ્ચમ્પક મુચ્યૈનં રાજા પ્રાપ્નોતુ પુત્રકમ્ ।
એકવીરેતિ નામ્નાયં ખ્યાતઃ સ્યાત્ પૃથિવીતલે ॥ ૨૪॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા ચમ્પકસ્ત્વરયાન્વિતઃ ।
જગામ પુત્રમાદાય સ્થલે તસ્મિન્મહીપતે ॥ ૨૫॥

મુમોચ બાલકં તત્ર યત્ર પૂર્વં સ્થિતો હ્યભૂત્ ।
આરુહ્ય સ્વવિમાનં તુ યયૌ સ્વાશ્રમમણ્ડલમ્ ॥ ૨૬॥

તદૈવ કમલાકાન્તો લક્ષ્મ્યા સહ જગદ્ગુરુઃ ।
વિમાનવરમારૂઢો જગામ નૃપતિં પ્રતિ ॥ ૨૭॥

દૃષ્ટસ્તદા તેન નૃપેણ વિષ્ણુઃ
સમુત્તરંસ્તત્ર વિમાનમુખ્યાત્ ।
જહર્ષ રાજા હરિદર્શનેન

પપાત ભૂમૌ ખલુ દણ્ડવચ્ચ ॥ ૨૮॥

ઉત્તિષ્ઠ વત્સેતિ હરિઃ પતન્ત-
માશ્વાસયદ્ભૂમિગતં સ્વભક્તમ્ ।
સોઽપ્યુત્સુકો વાસુદેવં પુરઃસ્થં
તુષ્ટાવ ભક્ત્યા મુખરીકૃતોઽથ ॥ ૨૯॥

દેવાધિદેવાખિલલોકનાથ
કૃપાનિધે લોકગુરો રમેશ ।
મન્દસ્ય મે તે કિલ દર્શનં ય-
ત્સુદુર્લભં યોગિજનૈરલભ્યમ્ ॥ ૩૦॥

યે નિઃસ્પૃહાસ્તે વિષયૈરપેતા-
સ્તેષાં ત્વદીયં ખલુ દર્શનં સ્યાત્ ।
આશાપરોઽહં ભગવન્નનન્ત
યોગ્યો ન તે દર્શને દેવદેવ ॥ ૩૧॥

ઇતિ સ્તુતસ્તેન નૃપેણ વિષ્ણુ-
સ્તમાહ વાક્યેન સુધામયેન ।
વૃણીષ્વ રાજન્ મનસેપ્સિતં તે
દદામિ તુષ્ટસ્તપસા તવેતિ ॥ ૩૨॥

તતો નૃપસ્તં પ્રણિપત્ય પાદયોઃ
પ્રોવાચ વિષ્ણું પુરતઃ સ્થિતં ચ ।
તપસ્તુ તપ્તં હિ મયા સુતાર્થે
પુત્રં દદસ્વાત્મસમં મુરારે ॥ ૩૩॥

શ્રુત્વા નૃપપ્રાર્થિતમાદિદેવ-
સ્તમાહ રાજાનમમોઘવાક્યમ્ ।
યયાતિસૂનો વ્રજ તત્ર તીર્થે
કલિન્દકન્યાતમસાપ્રસઙ્ગે ॥ ૩૪॥

મયાદ્ય પુત્રસ્તુ યથેપ્સિતસ્તે
તત્રૈવ મુક્તોઽસ્ત્યમિતપ્રભાવઃ ।
લક્ષ્મ્યાઃ પ્રસૂતો મમ વીર્યજશ્ચ
કૃતસ્તવાર્થેઽથ ગૃહાણ રાજન્ ॥ ૩૫॥

શ્રુત્વા હરેર્વાક્યમતીવ મૃષ્ટં
સન્તુષ્ટચિત્તઃ પ્રબભૂવ રાજા ।
હરિસ્તુ દત્ત્વેતિ વરં જગામ
વૈકુણ્ઠલોકં રમયા યુતશ્ચ ॥ ૩૬॥

ગતે હરૌ સોઽથ યયાતિસૂનુ-
ર્યયાવનુદ્ધાતરથેન રાજા ।
પ્રેમાન્વિતસ્તત્ર સુતોઽસ્તિ યત્ર
વચો નિશમ્યેતિ જનાર્દનસ્ય ॥ ૩૭॥

સ તત્ર ગત્વાતિમનોહરં તં
દદર્શ બાલં ભુવિ ખેલમાનમ્ ।
મુખે નિવેશ્યૈકકરેણ કૃત્વા
શ્લક્ષ્ણં પદાઙ્ગુષ્ઠમનન્યસત્ત્વઃ ॥ ૩૮॥

તં વીક્ષ્ય પુત્રં મદનસ્વરૂપં
નારાયણાંશં કમલાપ્રસૂતમ્ ।
હરિપ્રભાવં હરિવર્મનામા
હર્ષપ્રફુલ્લાનનપઙ્કજોઽભૂત્ ॥ ૩૯॥

ગૃહ્ણન્ સુવેગાત્ કરપઙ્કજાભ્યાં
બભૂવ પ્રેમાર્ણવમગ્નદેહઃ ।
મૂર્ધ્ન્યુપાઘ્રાય મુદાન્વિતોઽસૌ
નનન્દ રાજા સુતમાલિલિઙ્ગ ॥ ૪૦॥

મુખં સમીક્ષ્યાતિમનોહરં ત-
મુવાચ નેત્રામ્બુનિરુદ્ધકણ્ઠઃ ।
દત્તોઽસિ દેવેન જનાર્દનેન
માત્રા હિ પુત્રાવમદુઃખભીતેઃ ॥ ૪૧॥

તપ્તં મયા પુત્ર તપસ્તવાર્થે
સુદુષ્કરં વર્ષશતં ચ પૂર્ણમ્ ।
તેનૈવ તુષ્ટેન રમાપ્રિયેણ
દત્તોઽસિ સંસારસુખોદયાય ॥ ૪૨॥

માતા રમા ત્વાં તનુજં મદર્થે
ત્યક્ત્વા ગતા સા હરિણા સમેતા ।

ધન્યા તુ સા યા પ્રહસન્તમઙ્કે
કૃત્વા સુતં ત્વાં મુદિતાનના સ્યાત્ ॥ ૪૩॥

ત્વમેવ સંસારસમુદ્રનૌકા-
રૂપઃ કૃતઃ પુત્ર લક્ષ્મીધરેણ ।
ઇત્યેવમુક્ત્વા નૃપતિઃ સુતં તં
મુદા સમાદાય યયૌ ગૃહાય ॥ ૪૪॥

પુરીસમીપે નૃપમાગતં ત-
માકર્ણ્ય સર્વે સચિવાસ્તુ રાજ્ઞઃ ।
યયુઃ સમીપં નૃપતેશ્ચ લોકાઃ
સોપાયનાસ્તે સપુરોહિતાશ્ચ ॥ ૪૫॥

બન્દીજના ગાયનકાશ્ચ સૂતાઃ
સમાયયુઃ સમ્મુખમાશુ રાજ્ઞઃ ।
નૃપઃ પુરં પ્રાપ્ય પુરઃ સમાગતં
જનં સમાશ્વાસ્ય વાક્યૈશ્ચ દૃષ્ટ્યા ॥ ૪૬॥

સમ્પૂજિતઃ પૌરજનેન રાજા
વિવેશ પુત્રેણ યુતો નગર્યામ્ ।
માર્ગેષુ લાજૈઃ કુસુમૈઃ સમન્તા-
દ્વિકીર્યમાણો નૃપતિર્જગામ ॥ ૪૭॥

ગૃહં સમૃદ્ધં સચિવૈઃ સમેતઃ
સુતં સમાદાય મુદા કરાભ્યામ્ ।
રાજ્યૈ દદૌ ચાથ સુતં મનોજ્ઞં
સદ્યઃપ્રસૂતં ચ મનોભવાભમ્ ॥ ૪૮॥

રાજ્ઞી ગૃહીત્વાભિનવં તનૂજં
પપ્રચ્છ રાજાનમનિન્દિતા સા ।
રાજન્ કુતશ્ચૈવ સુતઃ સુજન્મા
પ્રાપ્તસ્ત્વયા મન્મથતુલ્યરૂપઃ ॥ ૪૯॥

કેનૈષ દત્તઃ કથયાશુ કાન્ત
ચેતો મદીયં પ્રહૃતં સુતેન ।
નૃપસ્તદોવાચ મુદાન્વિતોઽસૌ
પ્રિયે રમેશેન સુતો હિ મહ્યમ્ ॥ ૫૦॥

લોલાક્ષિ દત્તઃ કમલાસમુત્થો
જનાર્દનાંશોઽયમહીનસત્ત્વઃ ।
સા તં ગૃહીત્વા મુદમાપ રાજ્ઞી
રાજા ચકારોત્સવમદ્ભુતં ચ ॥ ૫૧॥

દદૌ ચ દાનં કિલ યાચકેભ્યો
ગીતાનિ વાદ્યાનિ બહૂનિ નેદુઃ ।
કૃત્વોત્સવં ભૂપતિરાત્મજસ્ય
નામૈકવીરેતિ ચકાર વિશ્રુતમ્ ॥ ૫૨॥

સુખં ચ સમ્પ્રાપ્ય મુદાન્વિતોઽસૌ
નનન્દ દેવાધિપતુલ્યવીર્યઃ ।
પુત્રં હરે રૂપગુણાનુરૂપં
સમ્પ્રાપ્ય વંશસ્ય ઋણાચ્ચ મુક્તઃ ॥ ૫૩॥

ઇતિ સકલસુરાણામીશ્વરેણાર્પિતં તં
સકલગુણગણાઢ્યં પુત્રમાસાદ્ય રાજા ।
વિવિધસુખવિનોદૈર્ભાર્યયા સેવ્યમાનો
વ્યહરત નિજગેહે શક્રતુલ્યપ્રતાપઃ ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે એકવીરાખ્યાનવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૬.૨૦॥

## ૬.૨૧ એકવિંશોઽધ્યાયઃ । રાજપુત્ર્યાઃ એકાવલ્યાઃ વર્ણનમ્ ।

વ્યાસ ઉવાચ ।
જાતકર્માદિસંસ્કારાંશ્ચકાર નૃપતિસ્તદા ।
દિને દિને જગામાશુ વૃદ્ધિં બાલઃ સુલાલિતઃ ॥ ૧॥

નૃપઃ સંસારજં પ્રાપ્ય સુખં પુત્રસમુદ્ભવમ્ ।
ઋણત્રયવિમોક્ષં ચ મેને તેન મહાત્મના ॥ ૨॥

ષષ્ઠેઽન્નપ્રાશનં તસ્ય કૃત્વા માસિ યથાવિધિ ।
તૃતીયેઽથ તથા વર્ષે ચૂડાકરણમુત્તમમ્ ॥ ૩॥

ચકાર બ્રાહ્મણાન્ દ્રવ્યૈઃ સમ્પૂજ્ય વિવિધૈર્ધનૈઃ ।

ગોભિશ્ચ વિવિધૈર્દાનૈર્યાચકાનિતરાનપિ ॥ ૪॥

વર્ષે ચૈકાદશે તસ્ય મૌઞ્જીબન્ધનકર્મ વૈ ।
કારયિત્વા ધનુર્વેદમધ્યાપયત પાર્થિવઃ ॥ ૫॥

અધીતવેદં પુત્રં તં રાજધર્મવિશારદમ્ ।
દૃષ્ટ્વા તસ્યાભિષેકાય મતિં ચક્રે જનાધિપઃ ॥ ૬॥

પુષ્યાર્કયોગસંયુક્તે દિવસે નૃપસત્તમઃ ।
કારયામાસ સમ્ભારાનભિષેકાર્થમાદરાત્ ॥ ૭॥

દ્વિજાનાહૂય વેદજ્ઞાન્ સર્વશાસ્ત્રવિચક્ષણાન્ ।
અભિષેકં ચકારાસૌ વિધિવત્ સ્વાત્મજસ્ય હ ॥ ૮॥

જલમાનીય તીર્થેભ્યઃ સાગરેભ્યશ્ચ પાર્થિવઃ ।
સ્વયં ચકાર વિથિવદભિષેકં શુભે દિને ॥ ૯॥

ધનં દત્ત્વાથ વિપ્રેભ્યો રાજ્યં પુત્રે નિવેશ્ય સઃ ।
જગામ વનમેવાશુ સ્વર્ગકામઃ સ ભૂપતિઃ ॥ ૧૦॥

એકવીરં નૃપં કૃત્વા સમ્માન્ય સચિવાનથ ।
ભાર્યયા સહ ભૂપાલઃ પ્રવિવેશ વનં વશી ॥ ૧૧॥

મૈનાકશિખરે રાજા કૃત્વા તાર્તીયમાશ્રમમ્ ।
નિત્યં પત્રફલાહારશ્ચિન્તયામાસ પાર્વતીમ્ ॥ ૧૨॥

એવં સ નૃપતિઃ કૃત્વા દિષ્ટાન્તે સહ ભાર્યયા ।
મૃતોઽસૌ વાસવં લોકં ગતઃ પુણ્યેન કર્મણા ॥ ૧૩॥

ઇન્દ્રલોકં પિતા પ્રાપ્ત ઇતિ શ્રુત્વાથ હૈહયઃ ।
ચકાર વેદનિર્દિષ્ટં કર્મ ચૈવૌર્ધ્વદૈહિકમ્ ॥ ૧૪॥

કૃત્વોત્તરાઃ ક્રિયાઃ સર્વાઃ પિતુઃ પાર્થિવનન્દનઃ ।
રાજ્યં ચકાર મેધાવી પિત્રા દત્તં સુસમ્મતમ્ ॥ ૧૫॥

એકવીરોઽથ ધર્મજ્ઞઃ પ્રાપ્ય રાજ્યમનુત્તમમ્ ।
બુભુજે વિવિધાન્ ભોગાન્સચિવૈશ્ચ સુમાનિતઃ ॥ ૧૬॥

એકસ્મિન્ દિવસે રાજા મન્ત્રિપુત્રૈઃ સમન્વિતઃ ।
જગામ જાહ્નવીતીરે હયારૂઢઃ પ્રતાપવાન્ ॥ ૧૭॥

સમ્પશ્યન્ પાદપાન્ રમ્યાન્ કોકિલાલાપસંયુતાન્ ।
પુષ્પિતાન્ ફલસંયુક્તાન્ ષટ્પદાલિવિરાજિતાન્ ॥ ૧૮॥

મુનીનામાશ્રમાન્દિવ્યાન્ વેદધ્વનિનિનાદિતાન્ ।
હોમધૂમાવૃતાકાશાન્ મૃગશાવસમાવૃતાન્ ॥ ૧૯॥

કેદારાઞ્છાલિસમ્પક્વાન્ ગોપિકાભિઃ સુરક્ષિતાન્ ।
પ્રફુલ્લપઙ્કજારામાન્નિકુઞ્જાંશ્ચ મનોરમાન્ ॥ ૨૦॥

પ્રેક્ષમાણઃ પ્રિયાલાંસ્તુ ચમ્પકાન્ પનસદ્રુમાન્ ।
બકુલાંસ્તિલકાન્નીપાન્મન્દારાંશ્ચ પ્રફુલ્લિતાન્ ॥ ૨૧॥

શાલાંસ્તાલાંસ્તમાલાંશ્ચ જમ્બૂચૂતકદમ્બકાન્ ।
સ ગચ્છઞ્જાહ્નવીતોયે પ્રફુલ્લં શતપત્રકમ્ ॥ ૨૨॥

પઙ્કજં ચાતિગન્ધાઢ્યમપશ્યદવનીપતિઃ ।
દક્ષિણે જલજસ્યાથ પાર્શ્વે કમલલોચનામ્ ॥ ૨૩॥

કનકાભાં સુકેશીં ચ કમ્બુગ્રીવાં કૃશોદરીમ્ ।
બિમ્બોષ્ઠી સુન્દરીં કિઞ્ચિત્સમુદ્યત્સુપયોધરામ્ ॥ ૨૪॥

સુનાસાં ચારુસર્વાઙ્ગીમપશ્યત્ કન્યકાં નૃપઃ ।
રુદતીં તાં સખીં ત્યક્ત્વા વિહ્વલાં દુઃખપીડિતામ્ ॥ ૨૫॥

સાશ્રુનેત્રાં ક્રન્દમાનાં વિજને કુરરીમિવ ।
સંવીક્ષ્ય રાજા પપ્રચ્છ કન્યકાં શોકકારણમ્ ॥ ૨૬॥

સુનસે બ્રૂહિ કાસિ ત્વં કસ્ય પુત્રી શુભાનને ।
ગન્ધર્વી દેવકન્યાથ કથં રોદિષિ સુન્દરિ ॥ ૨૭॥

કથમેકાકિની બાલે ત્યક્તા કેન પિકસ્વરે ।
પતિસ્તે ક્વ ગતઃ કાન્તે પિતા વા બ્રૂહિ સામ્પ્રતમ્ ॥ ૨૮॥

કિં તે દુઃખમરાલભ્રુ કથયાદ્ય મમાન્તિકે ।
કરોમિ દુઃખનાશં તે સર્વથૈવ કૃશોદરિ ॥ ૨૯॥

ન રાજ્યે મમ તન્વઙ્ગિ પીડાં કોઽપિ કરોત્યલમ્ ।
ન ભયં ચૌરજં કાન્તે ન રાક્ષસભયં તથા ॥ ૩૦॥

મયિ શાસતિ ભૂપાલે નોત્પાતા દારુણા ભુવિ ।
ભયં ન વ્યાઘ્રસિંહેભ્યો ન ભયં કસ્યચિદ્ભવેત્ ॥ ૩૧॥

વદ વામોરુ કસ્માત્ત્વં વિલાપં જાહ્નવીતટે ।
કરોષિ ત્રાણહીનાત્ર કિં તે દુઃખં વદસ્વ મે ॥ ૩૨॥

હન્મ્યહં દુઃખમત્યુગ્રં પ્રાણિનાં પૃથિવીતલે ।
દૈવં ચ માનુષં કાન્તે વ્રતમેતન્મમાદ્ભુતમ્ ॥ ૩૩॥

વિશાલલોચને બ્રૂહિ કરોમિ તવ ચિન્તિતમ્ ।
ઇત્યુક્તે વચને રાજ્ઞા શ્રુત્વોવાચ મૃદુસ્વના ॥ ૩૪॥

શ‍ૃણુ રાજેન્દ્ર વક્ષ્યામિ મમ શોકસ્ય કારણમ્ ।
વિપત્તિરહિતઃ પ્રાણી કથં રુદતિ ભૂપતે ॥ ૩૫॥

પ્રબ્રવીમિ મહાબાહો યદર્થં રુદતી ત્વહમ્ ।
તવ રાજ્યાદન્યદેશે રાજા પરમધાર્મિકઃ ॥ ૩૬॥

રૈભ્યો નામ મહારાજઃ સન્તાનરહિતો ભૃશમ્ ।
તસ્ય ભાર્યા સુવિખ્યાતા રુક્મરેખેતિ નામતઃ ॥ ૩૭॥

સુરૂપા ચતુરા સાધ્વી સર્વલક્ષણસંયુતા ।
અપુત્રા દુઃખિતા કાન્તમિત્યુવાચ પુનઃ પુનઃ ॥ ૩૮॥

કિં જીવિતેન મે નાથ ધિગ્વૃથા જીવિતં મમ ।
વન્ધ્યાયાઃ સુખહીનાયા હ્યપુત્રાયા ધરાતલે ॥ ૩૯॥

ઇત્યેવં ભાર્યયા ભૂપઃ પ્રેરિતો મખમુત્તમમ્ ।
ચકાર બ્રાહ્મણાંસ્તજ્જ્ઞાનાહૂય વિધિવત્તદા ॥ ૪૦॥

પુત્રકામો ધનં ભૂરિ દદાવથ યથોદિતમ્ ।
હૂયમાને ઘૃતેઽત્યર્થં પાવકાદતિસુપ્રભાત્ ॥ ૪૧॥

આવિર્બભૂવ ચાર્વઙ્ગી કન્યકા શુભલક્ષણા ।
બિમ્બોષ્ઠી સુદતી સુભ્રૂઃ પૂર્ણચન્દ્રનિભાનના ॥ ૪૨॥

કનકાભા સુકેશાન્તા રક્તપાણિતલા મૃદુઃ ।
સુરક્તનયના તન્વી રક્તપાદતલા ભૃશમ્ ॥ ૪૩॥

હુતાશનાત્સમુદ્ભૂતા હોત્રા સા સ્વીકૃતા તદા ।
હોતા પ્રોવાચ રાજાનં ગૃહીત્વા તાં સુમધ્યમામ્ ॥ ૪૪॥

રાજન્ પુત્રીં ગૃહાણેમાં સર્વલક્ષણસંયુતામ્ ।

એકાવલીવ સમ્ભૂતા હૂયમાનાદ્ધુતાશનાત્ ॥ ૪૫॥

નામ્ના ચૈકાવલી લોકે ખ્યાતા પુત્રી ભવિષ્યતિ ।
સુખિતો ભવ ભૂપાલ પુત્ર્યા પુત્રસમાનયા ॥ ૪૬॥

સન્તોષં કુરુ રાજેન્દ્ર દત્તા દેવેન વિષ્ણુના ।
હોતુર્વાક્યં નૃપઃ શ્રુત્વા દૃષ્ટ્વા તાં કન્યકાં શુભામ્ ॥ ૪૭॥

જગ્રાહ પરમપ્રીતો હોત્રા દત્તાં સુસમ્મતામ્ ।
ગૃહીત્વા નૃપતિસ્તાં તુ દદૌ પત્ન્યૈ વરાનનામ્ ॥ ૪૮॥

આભાષ્ય રુક્મરેખાયૈ ગૃહાણ સુભગે સુતામ્ ।
સા તાં કમલપત્રાક્ષીં પ્રાપ્ય કન્યાં મનોરમામ્ ॥ ૪૯॥

જહર્ષ મુદિતા રાજ્ઞી પુત્રં પ્રાપ્ય યથાસુખમ્ ।
ચકાર મઙ્ગલં કર્મ જાતકર્માદિકં શુભમ્ ॥ ૫૦॥

પુત્રજન્મસમુત્થં યત્તત્સર્વં વિધિવત્તતઃ ।
સમાપ્ય ચ મખં રાજા દ્વિજેભ્યો દક્ષિણાં શુભામ્ ॥ ૫૧॥

દત્ત્વા વિસૃજ્ય વિપ્રેન્દ્રાન્ મુદં પ્રાપ મહીપતિઃ ।
દિને દિનેઽસિતાપાઙ્ગી પુત્રવૃદ્ધ્યા ભૃશં બભૌ ॥ ૫૨॥

મુદં ચ પરમાં પ્રાપ નૃપભાર્યા સુતાન્વિતા ।
ઉત્સવસ્તદ્દિને તસ્ય પ્રવૃત્તઃ સુતજન્મજઃ ॥ ૫૩॥

પુત્રી પુત્રસમાત્યર્થં બભૂવ વલ્લભા કિલ ।
રાજ્ઞો મન્ત્રિસુતા ચાહં સુબુદ્ધે મન્મથાકૃતે ॥ ૫૪॥

યશોવતી ચ મે નામ સમાનં વય આવયોઃ ।
વયસ્યાહં કૃતા રાજ્ઞા ક્રીડનાય તયા સહ ॥ ૫૫॥

સદા સહચરી જાતા પ્રેમયુક્તા દિવાનિશમ્ ।
એકાવલી ગન્ધવન્તિ યત્ર પદ્માનિ પશ્યતિ ॥ ૫૬॥

તત્ર સા રમતે બાલા નાન્યત્ર સુખમાપ્નુયાત્ ।
સુદૂરે જાહ્નવીતીરે ભવન્તિ કમલાન્યપિ ॥ ૫૭॥

રમમાણા તત્ર યાતા મત્સમેતા સખીયુતા ।
મયા નિવેદિતં રાજન્ પુત્રી તે કમલાકરાન્ ॥ ૫૮॥

પ્રેક્ષમાણાતિદૂરે સા પ્રયાતિ નિર્જને વને ।
નિષેધિતાથ પિત્રાસૌ ગૃહે કૃત્વા જલાશયાન્ ॥ ૫૯॥

કમલાન્ વાપયિત્વાથ પુષ્પિતાન્ ભ્રમરાવૃતાન્ ।
તથાપિ નિર્યયૌ બાલા કમલાસક્તચેતના ॥ ૬૦॥

તદા રાજ્ઞા રક્ષપાલાઃ પ્રેરિતાઃ શસ્ત્રપાણયઃ ।
એવં રક્ષાયુતા તન્વી મત્સમેતા સખીયુતા ।
ક્રીડાર્થં જાહ્નવીતોયે નિત્યમાયાતિ યાતિ ચ ॥ ૬૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે રાજપુત્ર્યાઃ એકાવલ્યાઃ વર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૬.૨૧॥

## ૬.૨૨ દ્વાવિંશોઽધ્યાયઃ । હૈહયૈકવીરાય યશોવત્યૈકાવલીમોચનાય દેવીસ્વપ્નવર્ણનમ્ ।

યશોવત્યુવાચ ।
પ્રાતરુત્થાય તન્વઙ્ગી ચલિતા ચ સખીયુતા ।
ચામરૈર્વીજ્યમાના સા રક્ષિતા બહુરક્ષિભિઃ ॥ ૧॥

સાયુધૈશ્ચાતિસન્નદ્ધૈઃ સહિતા વરવર્ણિની ।
ક્રીડાર્થમત્ર રાજેન્દ્ર સમ્પ્રાપ્તા નલિનીં શુભામ્ ॥ ૨॥

અહમપ્યનયા સાર્ધં ગઙ્ગાતીરે સમાગતા ।
અપ્સરોભિઃ સમેતા ચ કમલૈઃ ક્રીડમાનયા ॥ ૩॥

એકાવલી તથા ચાહં જાતે ક્રીડાપરે યદા ।
સહસૈવ તદાયાતો દાનવો બલસંયુતઃ ॥ ૪॥

કાલકેતુરિતિ ખ્યાતો રાક્ષસૈર્બહુભિર્યુતઃ ।
પરિઘાસિગદાચાપબાણતોમરપાણિભિઃ ॥ ૫॥

દૃષ્ટા ચૈકાવલી તેન રૂપયૌવનશાલિની ।
દ્વિતીયા કામપત્નીવ ક્રીડમાના સુપઙ્કજૈઃ ॥ ૬॥

મયોક્તૈકાવલી રાજન્ કોઽયં દૈત્યઃ સમાગતઃ ।
ગચ્છાવો રક્ષપાલાનાં મધ્યે પઙ્કજલોચને ॥ ૭॥

વિમૃશ્યૈવ સખી ચાહં ત્વરયૈવ ગતે ભયાત્ ।
મધ્યે વૈ સૈનિકાનાં તુ સાયુધાનાં નૃપાત્મજ ॥ ૮॥

કાલકેતુસ્તુ તાં દૃષ્ટ્વા મોહિનીં મદનાતુરઃ ।
ગદાં ગુર્વીં ગૃહીત્વા તુ ધાવમાનઃ સમાગતઃ ॥ ૯॥

રક્ષકાન્દૂરતઃ કૃત્વા જગ્રાહામ્બુજલોચનામ્ ।
ત્રસ્તાં વેપથુસંયુક્તાં ક્રન્દમાનાં કૃશોદરીમ્ ॥ ૧૦॥

ત્યજૈનાં માં ગૃહાણેતિ મયા ચોક્તોઽપિ દાનવઃ ।
ન માં જગ્રાહ કામાર્તસ્તાં ગૃહીત્વા વિનિઃસૃતઃ ॥ ૧૧॥

તિષ્ઠ તિષ્ઠેતિ ભાષન્તો રક્ષકાસ્તં મહાબલમ્ ।
પ્રતિષિધ્ય તુ સઙ્ગ્રામં ચક્રુર્વિસ્મયકારકમ્ ॥ ૧૨॥

તસ્યાપિ રાક્ષસાઃ ક્રૂરાઃ સર્વતઃ શસ્ત્રપાણયઃ ।
યુયુધૂ રક્ષકૈઃ સાર્ધં સ્વામિકાર્યે કૃતોદ્યમાઃ ॥ ૧૩॥

સઙ્ગ્રામસ્તુ તદા જાતઃ કાલકેતોસ્તથા રણે ।
નિહત્ય રક્ષકાન્સર્વાન્ગૃહીત્વૈનાં મહાબલઃ ॥ ૧૪॥

યુક્તો રાક્ષસસૈન્યેન નિર્જગામ પુરં પ્રતિ ।
વીક્ષ્ય તાં રુદતીં બાલાં ગૃહીતા દાનવેન તુ ॥ ૧૫॥

પૃષ્ઠતોઽહં ગતા તત્ર યત્ર નીતા સખી મમ ।
વિક્રોશન્તી યથા સા માં પશ્યેદિતિ પદાનુગા ॥ ૧૬॥

સાપિ મામાગતાં વીક્ષ્ય કિઞ્ચિત્સ્વસ્થાભવત્તદા ।
ગતાહં તત્સમીપે તુ તામાભાષ્ય પુનઃ પુનઃ ॥ ૧૭॥

સા માં પ્રાપ્યાતિદુઃખાર્તા સ્તમ્ભસ્વેદસમાકુલા ।
કણ્ઠે ગૃહીત્વા માં ભૂપ રુરોદ ભૃશદુઃખિતા ॥ ૧૮॥

સ મામાહ કાલકેતુઃ પ્રીતિપૂર્વમિદં વચઃ ।
સમાશ્વાસય ભીતાં ત્વં સખીં ચઞ્ચલલોચનામ્ ॥ ૧૯॥

પ્રાપ્તં મમાદ્ય નગરં દેવલોકસમં પ્રિયે ।
દાસોઽસ્મિ તવ રત્યા હિ કસ્માત્ક્રન્દસિ કાતરા ॥ ૨૦॥

કથયૈનાં સખીં તેઽદ્ય સ્વસ્થા ભવ સુલોચને ।
ઇત્યુક્ત્વા માં સખીપાર્શ્વે સમારોપ્ય રથોત્તમે ॥ ૨૧॥

જગામ તરસા દુષ્ટઃ પુરે સ્વસ્ય મનોહરે ।
સૈન્યેન મહતા યુક્તઃ પ્રફુલ્લવદનામ્બુજઃ ॥ ૨૨॥

એકાવલી તથા માં ચ સંસ્થાપ્ય ધવલે ગૃહે ।
રાક્ષસાન્ ગૃહરક્ષાર્થં કલ્પયામાસ કોટિશઃ ॥ ૨૩॥

દ્વિતીયે દિવસે સોઽથ મામુવાચ રહો નૃપ ।
પ્રબોધય સખીં બાલાં શોચન્તીં વિરહાતુરામ્ ॥ ૨૪॥

પત્ની મે ભવ સુશ્રોણિ સુખં ભુઙ્ક્ષ્વ યથેપ્સિતમ્ ।
રાજ્યં ત્વદીયં ચન્દ્રાસ્યે સેવકોઽહં સદા તવ ॥ ૨૫॥

પુનરુક્તં મયા વાક્યં શ્રુત્વા તદ્ભાષિતં ખરમ્ ।
નાહં ક્ષમાપ્રિયં વક્તું ત્વમેનાં કથય પ્રભો ॥ ૨૬॥

ઇત્યુક્તે વચને દુષ્ટો મદનક્ષતમાનસઃ ।
ઉવાચ વિનયાદેનાં સખીં ક્ષામોદરીં પ્રિયામ્ ॥ ૨૭॥

કૃશોદરિ ત્વયા મન્ત્રો નિક્ષિપ્તોઽસ્તિ મમોપરિ ।
તેન મે હૃદયં કાન્તે હૃતં તે વશતાં ગતમ્ ॥ ૨૮॥

તેનાહં તવ દાસોઽદ્ય કૃતોઽસ્મીતિ વિનિશ્ચયઃ ।
ભજ માં કામબાણેન પીડિતં વિવશં ભૃશમ્ ॥ ૨૯॥

યૌવનં યાતિ રમ્ભોરુ ચઞ્ચલં દુર્લભં તદા ।
સફલં કુરુ કલ્યાણિ પતિં માં પરિરભ્ય ચ ॥ ૩૦॥

એકાવલ્યુવાચ ।
પિત્રાહં કલ્પિતા પૂર્વં દાતું રાજસુતાય વૈ ।
હૈહયસ્તુ મહાભાગ સ મયા મનસા વૃતઃ ॥ ૩૧॥

કથમન્યં ભજે કાન્તં ત્યક્ત્વા ધર્મં સનાતનમ્ ।
કન્યાધર્મં વિહાયાદ્ય વેત્સિ શાસ્ત્રવિનિશ્ચયમ્ ॥ ૩૨॥

યસ્મૈ દદ્યાત્પિતા કામં કન્યા તં પતિમાપ્નુયાત્ ।
પરતન્ત્રા સદા કન્યા ન સ્વાતન્ત્ર્યં કદાચન ॥ ૩૩॥

ઇત્યુક્તોઽપિ તયા પાપી વિરરામ ન મોહિતઃ ।
ન મુમોચ વિશાલાક્ષીં માં ચ પાર્શ્વસ્થિતાં તથા ॥ ૩૪॥

પાતાલવિવરે તસ્ય પુરં પરમસઙ્કટે ।
રાક્ષસૈ રક્ષિતં દુર્ગં મણ્ડિતં પરિખાવૃતમ્ ॥ ૩૫॥

તત્ર તિષ્ઠતિ દુઃખાર્તા સખી મે પ્રાણવલ્લભા ।
તેનાહં વિરહેણાત્ર રારટીમિ સુદુઃખિતા ॥ ૩૬॥

એકવીર ઉવાચ ।
કથં ત્વમત્ર સમ્પ્રાપ્તા પુરાત્તસ્ય દુરાત્મનઃ ।
વિસ્મયો મે મહાનત્ર તત્ત્વં બ્રૂહિ વરાનને ॥ ૩૭॥

ત્વયા ચ કથિતં વાક્યં સન્દિગ્ધં ભાતિ ભામિનિ ।
હૈહયાર્થે કલ્પિતા સા પિત્રેતિ મમ સામ્પ્રતમ્ ॥ ૩૮॥

હૈહયો નામ રાજાહં નાન્યોઽસ્તિ પૃથિવીપતિઃ ।
મદર્થે કથિતા સા કિં સખી તવ સુલોચના ॥ ૩૯॥

એતન્મે સંશયં સુભ્રુ છેત્તુમર્હસિ ભામિનિ ।
અહં તામાનયિષ્યામિ તં હત્વા રાક્ષસાધમમ્ ॥ ૪૦॥

સ્થાનં દર્શય મે તસ્ય યદિ જાનાસિ સુવ્રતે ।
રાજ્ઞે નિવેદિતં કિં વા તત્પિત્રે ચાતિદુઃખિતા ॥ ૪૧॥

યસ્યૈષા વલ્લભા પુત્રી ન કિં જાનાતિ તાં હૃતામ્ ।
નોદ્યમઃ કિં કૃતસ્તેન તતો મોચનહેતવે ॥ ૪૨॥

બન્દીકૃતાં સુતાં જ્ઞાત્વા કથં તિષ્ઠતિ સુસ્થિરઃ ।
અસમર્થો નૃપઃ કિં વા કારણં બ્રૂહિ સત્વરમ્ ॥ ૪૩॥

ત્વયા મેઽપહૃતં ચેતો ગુણાનુક્ત્વા હ્યમાનુષાન્ ।
સખ્યાઃ પઙ્કજપત્રાક્ષિ કૃતઃ કામવશો ભૃશમ્ ॥ ૪૪॥

કદા પશ્યામિ તાં કાન્તાં મોચયિત્વાતિસઙ્કટાત્ ।
ઇતિ મે હૃદયં ચાદ્ય કરોત્યતિમનોરથમ્ ॥ ૪૫॥

બ્રૂહિ મે ગમનોપાયં પુરે તસ્યાતિદુર્ગમે ।
કથં ત્વમાગતા તસ્માત્સઙ્કટાદત્ર તદ્વદ ॥ ૪૬॥

યશોવત્યુવાચ ।
બાલભાવાન્મયા મન્ત્રો ભગવત્યા વિશામ્પતે ।
પ્રાપ્તોઽસ્તિ બ્રાહ્મણાત્સિદ્ધાત્સબીજધ્યાનપૂર્વકઃ ॥ ૪૭॥

તત્રાવસ્થિતયા રાજન્ મયા ચિત્તે વિચારિતમ્ ।
આરાધયામિ સતતં ચણ્ડિકાં ચણ્ડવિક્રમામ્ ॥ ૪૮॥

સા દેવી સેવિતા કામં બન્ધમોક્ષં કરિષ્યતિ ।
ભક્તાનુકમ્પિની શક્તિઃ સમર્થા સર્વસાધને ॥ ૪૯॥

યા વિશ્વં સૃજતે શક્ત્યા પાલયત્યેવ સા પુનઃ ।
કલ્પાન્તે સંહરત્યેવ નિરાકારા નિરાશ્રયા ॥ ૫૦॥

ઇતિ સઞ્ચિન્ત્ય મનસા દેવીં વિશ્વેશ્વરીં શિવામ્ ।
ધ્યાત્વા રક્તામ્બરાં સૌમ્યાં સુરક્તનયનાં હૃદિ ॥ ૫૧॥

સંસ્મૃત્ય મનસા રૂપં મન્ત્રજાપ્યપરાભવમ્ ।
ઉપાસિતા મયા દેવી માસમેકં સમાધિના ॥ ૫૨॥

સ્વપ્ને મમ સમાયાતા ભક્તિભાવેન તોષિતા ।
મામાહામૃતયા વાચા કિં સુષ્માસીતિ ચણ્ડિકા ॥ ૫૩॥

ઉત્તિષ્ઠ યાહિ તરસા ગઙ્ગાતીરં મનોહરમ્ ।
આગમિષ્યતિ તત્રાસૌ હૈહયો નૃપપુઙ્ગવઃ ॥ ૫૪॥

એકવીરો મહાબાહુઃ સર્વશત્રુવિમર્દનઃ ।
દત્તાત્રેયેણ મન્મન્ત્રો મહાવિદ્યાભિધઃ પરઃ ॥ ૫૫॥

દત્તોઽસ્મૈ સોઽપિ સતતં મામુપાસ્તેઽતિભક્તિતઃ ।
મય્યાસક્તમતિર્નિત્યં મમ પૂજાપરાયણઃ ॥ ૫૬॥

મામેવ સર્વભૂતેષુ ધ્યાયન્નાસ્તે ચ મત્પરઃ ।
સ તે દુઃખવિનાશં વૈ કરિષ્યતિ મહામતિઃ ॥ ૫૭॥

માસુતો વિહરંસ્તત્ર તવ ત્રાતા ભવિષ્યતિ ।
હત્વા તં રાક્ષસં ઘોરં મોચયિષ્યતિ માનિનીમ્ ॥ ૫૮॥

એકાવલીમેકવીરઃ સર્વશાસ્ત્રવિશારદઃ ।
પશ્ચાત્સૈવ પતિઃ કાર્યસ્ત્વયા રાજસુતઃ શુભઃ ॥ ૫૯॥

ઇત્યુક્ત્વાન્તર્દધે દેવી પ્રબુદ્ધાહં તદૈવ હિ ।
કથિતં સ્વપ્નવૃત્તાન્તં દેવ્યાશ્ચારાધનં તથા ॥ ૬૦॥

પ્રસન્નવદના જાતા શ્રુત્વા સા કમલેક્ષણા ।
વિશેષેણ ચ સન્તુષ્ટા મામુવાચ શુચિસ્મિતા ॥ ૬૧॥

ગચ્છ તત્ર ત્વરાયુક્તા કુરુ કાર્યં મમ પ્રિયે ।
સત્યવાક્યા ભગવતી સાવાં મોક્ષં વિધાસ્યતિ ॥ ૬૨॥

ઇત્યાજ્ઞપ્તા તયા ચાહં સખ્યા વૈ પ્રેમયુક્તયા ।
મત્વોપસરણં યુક્તં તસ્માત્સ્થાનાત્તદા નૃપ ॥ ૬૩॥

ચાલિતાહં તતઃ શીઘ્રં મહાદેવીપ્રસાદતઃ ।
માર્ગજ્ઞાનં શીઘ્રગતિર્મયા પ્રાપ્તા નૃપાત્મજ ॥ ૬૪॥

ઇત્યેતત્કથિતં સર્વં કારણં મમ દુઃખજમ્ ।
કસ્ત્વં કસ્ય સુતશ્ચેતિ વદ વીર યથા તથા ॥ ૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
હૈહયૈકવીરાય યશોવત્યૈકાવલીમોચનાય દેવીસ્વપ્નવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૬.૨૨॥

## ૬.૨૩ ત્રયોવિંશોઽધ્યાયઃ । એકવીરૈકાવલ્યોર્વિવાહવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તસ્યાસ્તુ વચનં શ્રુત્વા રમાપુત્રઃ પ્રતાપવાન્ ।
પ્રફુલ્લવદનામ્ભોજસ્તામુવાચ વિશામ્પતે ॥ ૧॥

રાજોવાચ ।
રમ્ભોરુ યસ્ત્વયા પૃષ્ટો વૃત્તાન્તો વિશદાક્ષરઃ ।
હેહયોઽહં ચૈકવીરનામ્ના સિન્ધુસુતાસુતઃ ॥ ૨॥

મનો મે યત્ત્વયા નૂનં પરતન્ત્રં કૃતં કિલ ।
કિં કરોમિ ક્વ ગચ્છામિ વિરહેણાતિપીડિતઃ ॥ ૩॥

પ્રથમં રૂપમાખ્યાતં સર્વલોકાતિગં ત્વયા ।
તેન મે વિહ્વલં જાતં કામબાણહતં મનઃ ॥ ૪॥

તતસ્તસ્યા ગુણાઃ પ્રોક્તાસ્તૈસ્તુ ચિત્તં હૃતં પુનઃ ।
યત્ત્વયોક્તં પુનર્વાક્યં તેન મે વિસ્મયોઽભવત્ ॥ ૫॥

એકાવલ્યા વચઃ પ્રોક્તં દાનવાગ્રે મયા વૃતઃ ।
હૈહયસ્તં વિના નાન્યં વૃણોમીતિ વિનિશ્ચયઃ ॥ ૬॥

તેન વાક્યેન તન્વઙ્ગિ ભૃત્યોઽહમધુના કૃતઃ ।
ત્વયા તસ્યાઃ સુકેશાન્તે બ્રૂહિ કિં કરવાણિ વામ્ ॥ ૭॥

સ્થાનં તસ્ય ન જાનામિ રાક્ષસસ્ય દુરાત્મનઃ ।

ગતિર્મે નાસ્તિ ગમને પુરે તસ્મિન્સુલોચને ॥ ૮॥

વદ માં ત્વં વિશાલાક્ષિ તત્ર પ્રાપયિતું ક્ષમા ।
પ્રાપયાશુ સખી તે સા યત્ર તિષ્ઠતિ સુન્દરી ॥ ૯॥

હત્વા તં રાક્ષસં ક્રૂરં મોચયિષ્યામિ સામ્પ્રતમ્ ।
વિવશાં શોકસન્તપ્તાં રાજપુત્રીં તવ પ્રિયામ્ ॥ ૧૦॥

વિમુક્તદુઃખાં કૃત્વાઽઽશુ પ્રાપયિષ્યામિ તે પુરમ્ ।
પિત્રે ચાસ્યાઃ પ્રદાસ્યામિ કન્યામેકાવલીમહમ્ ॥ ૧૧॥

પશ્ચાદ્વિવાહં કર્તાસૌ રાજા પુત્ર્યાઃ પરન્તપઃ ।
એવં તે મનસઃ કામો મમ ચાપિ પ્રિયંવદે ॥ ૧૨॥

ભવિષ્યતિ સ સમ્પૂર્ણઃ સાધનેન તવાધુના ।
દર્શયાશુ પુરં તસ્ય પશ્ય મે ત્વં પરાક્રમમ્ ॥ ૧૩॥

યથા હન્મિ દુરાચારં પરદારાપહારકમ્ ।
તથા કુરુ પ્રિયં કર્તું શક્તાસિ વરવર્ણિનિ ॥ ૧૪॥

માર્ગં દર્શય તસ્યાદ્ય પુરસ્ય દુર્ગમસ્ય ચ ।
વ્યાસ ઉવાચ ।
તન્નિશમ્ય પ્રિયં વાક્યં મુદિતા ચ યશોવતી ॥ ૧૫॥

તમુવાચ રમાપુત્રં ગમનોપાયમાદરાત્ ।
મન્ત્રં ગૃહાણ રાજેન્દ્ર ભગવત્યાસ્તુ સિદ્ધિદમ્ ॥ ૧૬॥

દર્શયિષ્યામિ તસ્યાદ્ય પુરં રાક્ષસપાલિતમ્ ।
સજ્જો ભવ મહાભાગ ગમનાય મયા સહ ॥ ૧૭॥

સૈન્યેન મહતા યુક્તસ્તત્ર યુદ્ધં ભવિષ્યતિ ।
કાલકેતુર્મહાવીરો રાક્ષસૈર્બલિભિર્વૃતઃ ॥ ૧૮॥

તસ્માન્મન્ત્રં ગૃહીત્વા ત્વં વ્રજ તત્ર મયા સહ ।
દર્શયિષ્યામિ તે માર્ગં પુરસ્યાસ્ય દુરાત્મનઃ ॥ ૧૯॥

હત્વા તં પાપકર્માણં મોચયાશુ ચ મે સખીમ્ ।
શ્રુત્વા તદ્વચનં વીરો મન્ત્રં જગ્રાહ સત્વરઃ ॥ ૨૦॥

દત્તાત્રેયાદ્દૈવયોગાત્પ્રાપ્તાજ્જ્ઞાનિવરાચ્છુભાત્ ।
યોગેશ્વરીમહામન્ત્રં ત્રિલોકીતિલકાભિધમ્ ॥ ૨૧॥

તેન સર્વજ્ઞતા જાતા સર્વાન્તશ્ચારિતા તથા ।
તયા સહ જગામાશુ પુરં તસ્ય સુદુર્ગમમ્ ॥ ૨૨॥

રક્ષિતં રાક્ષસૈર્ઘોરૈઃ પાતાલમિવ પન્નગૈઃ ।
યશોવત્યા ચ સૈન્યેન મહતા સંયુતો નૃપઃ ॥ ૨૩॥

તમાયાન્તં સમાલોક્ય દૂતાસ્તસ્ય ભયાતુરાઃ ।
ક્રોશન્તોઽભિયયુઃ પાર્શ્વે કાલકેતોસ્તરસ્વિનઃ ॥ ૨૪॥

તમૂચુઃ સહસા મત્વા રાક્ષસં કામમોહિતમ્ ।
એકાવલીસમીપસ્થં કુર્વન્તં વિનયાન્બહૂન્ ॥ ૨૫॥

દૂતા ઊચુઃ ।
રાજન્ યશોવતી નારી કામિન્યાઃ સહચારિણી ।
આયાતિ સહ સૈન્યેન રાજપુત્રેણ સંયુતા ॥ ૨૬॥

જયન્તો વા મહારાજ કાર્તિકેયોઽથવા નુ કિમ્ ।
આગચ્છતિ બલોન્મત્તો વાહિનીસહિતઃ કિલ ॥ ૨૭॥

સંયત્તો ભવ રાજેન્દ્ર સઙ્ગ્રામઃ સમુપસ્થિતઃ ।
દેવપુત્રેણ યુધ્યસ્વ ત્યજ વા કમલેક્ષણામ્ ॥ ૨૮॥

ઇતો દૂરેઽસ્તિ સૈન્યં તદ્યોજનત્રયમાત્રતઃ ।
સજ્જો ભવ મહીપાલ દુન્દુભિં ઘોષયાશુ વૈ ॥ ૨૯॥

વ્યાસ ઉવાચ ।
તેષાં તદ્વચનં શ્રુત્વા રાક્ષસઃ ક્રોધમૂર્ચ્છિતઃ ।
રાક્ષસાન્પ્રેરયામાસ સાયુધાન્સબલાન્વહૂન્ ॥ ૩૦॥

ગચ્છધ્વં રાક્ષસાઃ સર્વે સમ્મુખાઃ શસ્ત્રપાણયઃ ।
તાનાજ્ઞાપ્ય કાલકેતુઃ પપ્રચ્છ પ્રણયાન્વિતઃ ॥ ૩૧॥

એકાવલીં સમીપસ્થાં વિવશાં ભૃશદુઃખિતામ્ ।
કોઽયમાયાતિ તન્વઙ્ગિ પિતા તે વાપરઃ પુમાન્ ॥ ૩૨॥

ત્વદર્થે સૈન્યસંયુક્તો બ્રૂહિ સત્યં કૃશોદરિ ।
પિતા તે યદિ સમ્પ્રાપ્તો નેતું ત્વાં વિરહાતુરઃ ॥ ૩૩॥

જ્ઞાત્વા તે પિતરં સમ્યક્ સઙ્ગ્રામં ન કરોમ્યહમ્ ।

આનયિત્વા ગૃહે પૂજાં રત્નૈર્વસ્ત્રૈર્હયૈઃ શુભૈઃ ॥ ૩૪॥

કરોમિ તસ્ય ચાતિથ્યં ગૃહે પ્રાપ્તસ્ય સર્વથા ।
અન્યશ્ચેદ્યદિ સમ્પ્રાપ્તસ્તં હન્મિ નિશિતૈઃ શરૈઃ ॥ ૩૫॥

આનીતઃ કિલ કાલેન મરણાય મહાત્મના ।
તસ્માદ્વદ વિશાલાક્ષિ કોઽયમાયાતિ મન્દધીઃ ॥ ૩૬॥

અજ્ઞાત્વા માં દુરાધર્ષં કાલરૂપં મહાબલમ્ ।
એકાવલ્યુવાચ ।
ન જાનેઽહં મહાભાગ કોઽયમાયાતિ સત્વરઃ ॥ ૩૭॥

નમેઽસ્તિ વિદિતઃ કોઽપિ સ્થિતાયાસ્તવ બન્ધને ।
નાયં પિતા મે ન ભ્રાતા કોઽપ્યન્યોઽસ્તિ મહાબલઃ ॥ ૩૮॥

કિમર્થમિહ ચાયાતિ નાહં વેદ વિનિશ્ચયમ્ ।
દૈત્ય ઉવાચ ।
એવં વદન્ત્યમી દૂતા વયસ્યા તે યશોવતી ॥ ૩૯॥

સમાનીય ચ તં વીરમાગતેતિ કૃતોદ્યમા ।
ક્વ ગતા સા સખી કાન્તે વિદગ્ધા કાર્યનિશ્ચયે ॥ ૪૦॥

નાન્યઃ કોઽપિ મમારાતિર્યો મે પ્રતિબલો ભવેત્ ।
વ્યાસ ઉવાચ ।
એતસ્મિન્નન્તરે દૂતાસ્તત્રાન્યે વૈ સમાગતાઃ ॥ ૪૧॥

તે હોચુસ્ત્વરિતા ભીતાઃ કાલકેતું ગૃહે સ્થિતમ્ ।
કિં સ્વસ્થોઽસિ મહારાજ સમીપે સૈન્યમાગતમ્ ॥ ૪૨॥

નિર્ગચ્છ નગરાત્તૂર્ણં સૈન્યેન મહતાઽઽવૃતઃ ।
ઇતિ તેષાં વચઃ શ્રુત્વા કાલકેતુર્મહાબલઃ ॥ ૪૩॥

રથમારુહ્ય ત્વરિતો નિર્યયૌ સ્વપુરાદ્બહિઃ ।
એકવીરોઽપિ સહસા હયારૂઢઃ પ્રતાપવાન્ ॥ ૪૪॥

આગતસ્તત્ર કામિન્યા વિરહેણ સમાકુલઃ ।
યુદ્ધં તયોરભૂત્તત્ર વૃત્રવાસવયોરિવ ॥ ૪૫॥

શસ્ત્રાસ્ત્રૈર્બહુધા મુક્તૈરાદીપિતદિગન્તરમ્ ।
વર્તમાને તદા યુદ્ધે કાતરાણાં ભયાવહે ॥ ૪૬॥

ગદયા તાડયામાસ દૈત્યં સિન્ધુસુતાસુતઃ ।
સ ગતાસુઃ પપાતોર્વ્યાં વજ્રાહત ઇવાચલઃ ॥ ૪૭॥

પલાયિત્વા ગતાઃ સર્વે રાક્ષસા ભયપીડિતાઃ ।
યશોવતી તતો ગત્વા વેગાદેકાવલીં તદા ॥ ૪૮॥

ઉવાચ મધુરાં વાણીં વિસ્મિતા મુદિતા ભૃશમ્ ।
એહ્યાલિ નૃપપુત્રેણ દાનવોઽસૌ નિપાતિતઃ ॥ ૪૯॥

એકવીરેણ ધીરેણ યુદ્ધં કૃત્વા સુદારુણમ્ ।
સ્કન્ધાવારેઽપ્યસૌ રાજા તિષ્ઠત્યદ્ય શ્રમાતુરઃ ॥ ૫૦॥

દર્શનં કાઙ્ક્ષમાણસ્તે શ્રુતરૂપગુણસ્તવ ।
પશ્ય તં કુટિલાપાઙ્ગિ મનોભવસમં નૃપમ્ ॥ ૫૧॥

કથિતા ત્વં મયા પૂર્વં તસ્યાગ્રે જાહ્નવીતટે ।
પૂર્ણાનુરાગઃ સઞ્જાતસ્તેનાસૌ વિરહાતુરઃ ॥ ૫૨॥

વાઞ્છતિ ત્વાં ચારુરૂપાં દ્રષ્ટું નૃપતિનન્દનઃ ।
સા તસ્યા વચનં શ્રુત્વા ગમનાય મનો દધે ॥ ૫૩॥

લજ્જમાના ભૃશં ભીત્યા કૌમારં પ્રાપ્તયા તયા ।
કથં તસ્ય મુખં દ્રક્ષ્યે કુમારી હ્યવશા ભૃશમ્ ॥ ૫૪॥

સ માં ગૃહ્ણાતિ કામાર્ત ઇતિ ચિન્તાકુલા સતી ।
યશોવત્યા યુતા તત્ર નરયાનસ્થિતા યયૌ ॥ ૫૫॥

સ્કન્ધાવારેઽતિમલિના મલિનામ્બરધારિણી ।
તામાગતાં વિશાલાક્ષીં દૃષ્ટ્વા રાજસુતોઽબ્રવીત્ ॥ ૫૬॥

દર્શનં દેહિ તન્વઙ્ગિ તૃષિતે નયને મમ ।
કામાતુરં ચ તં વીક્ષ્ય તાં ચ લજ્જાભરાવૃતામ્ ॥ ૫૭॥

નીતિજ્ઞા શિષ્ટમાર્ગજ્ઞા તમુવાચ યશોવતી ।
રાજપુત્ર પિતાપ્યસ્યાસ્ત્વામેનાં દાતુમિચ્છતિ ॥ ૫૮॥

એષાપિ ત્વદ્વશા નૂનં ભવિતા સઙ્ગમસ્તવ ।
કાલં પ્રતીક્ષ્ય રાજેન્દ્ર નયૈનાં પિતુરન્તિકમ્ ॥ ૫૯॥

સ વિવાહવિધિં કૃત્વા દાસ્યતીતિ વિનિશ્ચયઃ ।
સ તસ્યા વચનં તથ્યં મત્વા સૈન્યસમન્વિતઃ ॥ ૬૦॥

સમેતઃ કામિનીભ્યાં તુ યયૌ તત્પિતુરાશ્રમમ્ ।
રાજપુત્રીં તથાયાતાં શ્રુત્વા પ્રેમસમન્વિતઃ ॥ ૬૧॥

પ્રયયૌ સમ્મુખસ્તૂર્ણં સચિવૈઃ પરિવેષ્ટિતઃ ।
બહુભિર્દિવસૈર્દૃષ્ટા પુત્રી સા મલિનામ્બરા ॥ ૬૨॥

યશોવત્યા તુ વૃત્તાન્તઃ કથિતો વિસ્તરાત્પુનઃ ।
એકવીરં મિલિત્વાસૌ ગૃહમાનીય ચાદરાત્ ॥ ૬૩॥

પુણ્યેઽહ્નિ કારયામાસ વિવાહં વિધિપૂર્વકમ્ ।
પારિબર્હં તતો દત્ત્વા સમ્પૂજ્ય વિધિવત્તદા ॥ ૬૪॥

પુત્રીં વિસર્જયામાસ યશોવત્યા સમન્વિતામ્ ।
એવં વિવાહે સંવૃત્તે રમાપુત્રો મુદાન્વિતઃ ॥ ૬૫॥

ગૃહં પ્રાપ્ય બહૂન્ભોગામ્બુભુજે પ્રિયયા સમમ્ ।
બભૂવ તસ્યાં પુત્રસ્તુ કૃતવીર્યાભિધઃ કિલ ।
તત્સુતઃ કાર્તવીર્યસ્તુ વંશોઽયં કથિતો મયા ॥ ૬૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે એકવીરૈકાવલ્યોર્વિવાહવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૬.૨૩॥

## ૬.૨૪ ચતુર્વિંશોઽધ્યાયઃ । અમ્બિકાયાઃ નિયોગાત્પુત્રોત્પાદનાય ગર્ભધારણવર્ણનમ્ ।

રાજોવાચ ।
ભગવંસ્ત્વન્મુખામ્ભોજાચ્ચ્યુતં દિવ્યકથારસમ્ ।
ન તૃપ્તિમધિગચ્છામિ પિબંસ્તુ સુધયા સમમ્ ॥ ૧॥

વિચિત્રમિદમાખ્યાનં કથિતં ભવતા મમ ।
હૈહયાનાં સમુત્પત્તિર્વિસ્તરાદ્વિસ્મયપ્રદા ॥ ૨॥

પરં કૌતૂહલં મેઽત્ર યદ્વિષ્ણુઃ કમલાપતિઃ ।
દેવદેવો જગન્નાથઃ સૃષ્ટિસ્થિત્યન્તકારકઃ ॥ ૩॥

સોઽપ્યશ્વભાવમાપન્નો ભગવાન્હરિરચ્યુતઃ ।
પરતન્ત્રઃ કથં જાતઃ સ્વતન્ત્રઃ પુરુષોત્તમઃ ॥ ૪॥

એતન્મે સંશયં બ્રહ્મઞ્છેત્તુમર્હસિ સામ્પ્રતમ્ ।

સર્વજ્ઞસ્ત્વં મુનિશ્રેષ્ઠ બ્રૂહિ વૃત્તાન્તમદ્ભુતમ્ ॥ ૫॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ સન્દેહસ્યાસ્ય નિર્ણયમ્ ।
યથા શ્રુતં મયા પૂર્વં નારદાન્મુનિસત્તમાત્ ॥ ૬॥

બ્રહ્મણો માનસઃ પુત્રો નારદો નામ તાપસઃ ।
સર્વજ્ઞઃ સર્વગઃ શાન્તઃ સર્વલોકપ્રિયઃ કવિઃ ॥ ૭॥

સ ચૈકદા મુનિશ્રેષ્ઠો વિચરન્પૃથિવીમિમામ્ ।
વાદયન્મહતીં વીણાં સ્વરતાનસમન્વિતામ્ ॥ ૮॥

બૃહદ્રથન્તરાદીનાં સામ્નાં ભેદાનનેકશઃ ।
ગાયન્ગાયત્રમમૃતં સમ્પ્રાપ્તોઽથ મમાશ્રમમ્ ॥ ૯॥

શમ્યાપ્રાસં મહાતીર્થં સરસ્વત્યાઃ સુપાવનમ્ ।
નિવાસં મુનિમુખ્યાનાં શર્મદં જ્ઞાનદં તથા ॥ ૧૦॥

તમાગતમહં પ્રેક્ષ્ય બ્રહ્મપુત્રં મહાદ્યુતિમ્ ।
અભ્યુત્થાનાદિકં સર્વં કૃતવાનર્ચનાદિકમ્ ॥ ૧૧॥

અર્ઘ્યપાદ્યવિધિં કૃત્વા તસ્યાસનસ્થિતસ્ય ચ ।
ઉપવિષ્ટઃ સમીપેઽહં મુનેરમિતતેજસઃ ॥ ૧૨॥

દૃષ્ટ્વા વિશ્રમિણં શાન્તં નારદં જ્ઞાનપારદમ્ ।
તમપૃચ્છમહં રાજન્ યત્પૃષ્ટોઽહં ત્વયાધુના ॥ ૧૩॥

અસારેઽસ્મિંસ્તુ સંસારે પ્રાણિનાં કિં સુખં મુને ।
ન પશ્યામિ વિનિશ્ચિત્ય કદાચિત્કુત્રચિત્ક્વચિત્ ॥ ૧૪॥

દ્વીપે જાતો જનન્યાહં સન્ત્યક્તસ્તત્ક્ષણાદપિ ।
અનાશ્રયો વને વૃદ્ધિં પ્રાપ્તઃ કર્માનુસારતઃ ॥ ૧૫॥

તપસ્તપ્તં મયા ચોગ્રં પર્વતે બહુવાર્ષિકમ્ ।
પુત્રકામેન દેવર્ષે શઙ્કરઃ સમુપાસિતઃ ॥ ૧૬॥

તતો મયા શુકઃ પ્રાપ્તઃ પુત્રો જ્ઞાનવતાં વરઃ ।
પાઠિતસ્તુ મયા સમ્યગ્વેદાનાં સાર આદિતઃ ॥ ૧૭॥

સ ત્યક્ત્વા માં ગતઃ ક્વાપિ રુદન્તં વિરહાતુરમ્ ।
લોકાલ્લોકાન્તરં સાધો વચનાત્તવ બોધિતઃ ॥ ૧૮॥

તતોઽહં પુત્રસન્તપ્તસ્ત્યક્ત્વા મેરું મહાગિરિમ્ ।
માતરં મનસા કૃત્વા સમ્પ્રાપ્તઃ કુરુજાઙ્ગલમ્ ॥ ૧૯॥

પુત્રસ્નેહાદતિતરાં કૃશાઙ્ગઃ શોકસંયુતઃ ।
જાનન્મિથ્યેતિ સંસારં માયાપાશનિયન્ત્રિતઃ ॥ ૨૦॥

તતો રાજ્ઞા વૃતાં જ્ઞાત્વા માતરં વાસવીં શુભામ્ ।
સ્થિતોઽત્રૈવાશ્રમં કૃત્વા સરસ્વત્યાસ્તટે શુભે ॥ ૨૧॥

શન્તનુઃ સ્વર્ગતિં પ્રાપ્તો વિધુરા જનની સ્થિતા ।
પુત્રદ્વયયુતા સાધ્વી ભીષ્મેણ પ્રતિપાલિતા ॥ ૨૨॥

ચિત્રાઙ્ગદઃ કૃતો રાજા ગઙ્ગાપુત્રેણ ધીમતા ।
કાલેન સોઽપિ મે ભ્રાતા મૃતઃ કામસમદ્યુતિઃ ॥ ૨૩॥

તતઃ સત્યવતી માતા નિમગ્ના શોકસાગરે ।
ચિત્રાઙ્ગદં મૃતં પુત્રં રુરોદ ભૃશમાતુરા ॥ ૨૪॥

સમ્પ્રાપ્તોઽહં મહાભાગ જ્ઞાત્વા તાં દુઃખિતાં સતીમ્ ।
આશ્વાસિતા મયાત્યર્થં ભીષ્મેણ ચ મહાત્મના ॥ ૨૫॥

વિચિત્રવીર્યસ્ત્વપરો વીર્યવાન્પૃથિવીપતિઃ ।
કૃતો ભીષ્મેણ ભ્રાતા વૈ સ્ત્રીરાજ્યવિમુખેન હ ॥ ૨૬॥

કાશિરાજસુતે રમ્યે વિજિત્ય પૃથિવીપતીન્ ।
ભીષ્મેણાનીય સ્વબલાત્કન્યકે દ્વે સમર્પિતે ॥ ૨૭॥

સત્યવત્યૈ શુભે કાલે વિવાહઃ પરિકલ્પિતઃ ।
ભ્રાતુર્વિચિત્રવીર્યસ્ય તદાહં સુખિતોઽભવમ્ ॥ ૨૮॥

પુનઃ સોઽપિ મૃતો ભ્રાતા યક્ષ્મણા પીડિતો ભૃશમ્ ।
અનપત્યો યુવા ધન્વી માતા મે દુઃખિતાભવત્ ॥ ૨૯॥

કાશિરાજસુતે દ્વે તુ મૃતં દૃષ્ટ્વા પતિં તદા ।
પતિવ્રતાધર્મપરે ભગિન્યૌ સમ્બભૂવતુઃ ॥ ૩૦॥

તે ઊચતુઃ સતીં શ્વશ્રૂં રુદતીં ભૃશદુઃખિતામ્ ।
પતિના સહગામિન્યૌ ભવિષ્યાવો હુતાશને ॥ ૩૧॥

પુત્રેણ સહ તે શ્વશ્રુ સ્વર્ગે ગત્વાથ નન્દને ।

સુખેન વિહરિષ્યાવઃ પતિના સહ સંયુતે ॥ ૩૨॥

નિવારિતે તદા માત્રા વધ્વૌ તસ્માન્મહોદ્યમાત્ ।
સ્નેહભાવં સમાશ્રિત્ય ભીષ્મસ્ય વચનાત્તદા ॥ ૩૩॥

ગાઙ્ગેયેન ચ માત્રા મે સમ્મન્ત્ર્ય ચ પરસ્પરમ્ ।
કૃત્વૌર્ધ્વદૈહિકં સર્વં સંસ્મૃતોઽહં ગજાહ્વયે ॥ ૩૪॥

સ્મૃતમાત્રસ્તુ માત્રા વૈ જ્ઞાત્વા ભાવં મનોગતમ્ ।
તરસૈવાગતશ્ચાહં નગરં નાગસાહ્વયમ્ ॥ ૩૫॥

પ્રણમ્ય માતરં મૂર્ધ્ના સંસ્થિતોઽથ કૃતાઞ્જલિઃ ।
તામબ્રવં સુતસ્માઙ્ગીં પુત્રશોકેન કર્શિતામ્ ॥ ૩૬॥

માતસ્ત્વયા કિમાહૂતો મનસાહં તપસ્વિનિ ।
આજ્ઞાપય મહત્કાર્યે દાસોઽસ્મિ કરવાણિ કિમ્ ॥ ૩૭॥

ત્વં મે તીર્થં પરં માતર્દૈવશ્ચ પ્રથિતઃ પરઃ ।
આગતશ્ચિન્તિતશ્ચાત્ર બ્રૂહિ કૃત્યં તવ પ્રિયમ્ ॥ ૩૮॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વાહં સ્થિતસ્તત્ર માતુરગ્રે યદા મુને ।
તદા સા મામુવાચેદં પશ્યન્તી ભીષ્મમન્તિકે ॥ ૩૯॥

પુત્ર તેઽદ્ય મૃતો ભ્રાતા પીડિતો રાજયક્ષ્મણા ।
તેનાહં દુઃખિતા જાતા વંશચ્છેદભયાદિહ ॥ ૪૦॥

તસ્માત્ત્વમદ્ય મેધાવિન્ મયાહૂતઃ સમાધિના ।
ગાઙ્ગેયસ્ય મતેનાત્ર પારાશર્યાર્થસિદ્ધયે ॥ ૪૧॥

કુલં સ્થાપય નષ્ટં ત્વં શન્તનોર્નામકારણાત્ ।
રક્ષ માં દુઃખતઃ કૃષ્ણ વંશચ્છેદોદ્ભવાદ્ધ્રુતમ્ ॥ ૪૨॥

કાશિરાજસુતે ભાર્યે ભ્રાતુસ્તવ યવીયસઃ ।
સાધોર્વિચિત્રવીર્યસ્ય રૂપયૌવનભૂષિતે ॥ ૪૩॥

તાભ્યાં સઙ્ગમ્ય મેધાવિન્ પુત્રોત્પાદનકં કુરુ ।
રક્ષસ્વ ભારતં વંશં નાત્ર દોષોઽસ્તિ કર્હિચિત્ ॥ ૪૪॥

વ્યાસ ઉવાચ ।
ઇતિ માતુર્વચઃ શ્રુત્વા જાતશ્ચિન્તાતુરો હ્યહમ્ ।

લજ્જયાऽऽકુલચિત્તસ્તામબ્રવં વિનયાનતઃ ॥ ૪૫॥

માતઃ પાપાધિકં કર્મ પરદારાભિમર્શનમ્ ।
જ્ઞાત્વા ધર્મપથં સમ્યક્કરોમિ કથમાદરાત્ ॥ ૪૬॥

તથા યવીયસો ભ્રાતુર્વધૂઃ કન્યા પ્રકીર્તિતા ।
વ્યભિચારં કથં કુર્યામધીત્ય નિગમાનહમ્ ॥ ૪૭॥

અન્યાયેન ન કર્તવ્યં સર્વથા કુલરક્ષણમ્ ।
ન તરન્તિ હિ સંસારાત્પિતરઃ પાપકારિણઃ ॥ ૪૮॥

લોકાનામુપદેષ્ટા યઃ પુરાણાનાં પ્રવર્તકઃ ।
સ કથં કુત્સિતં કર્મ જ્ઞાત્વા કુર્યાન્મહાદ્ભુતમ્ ॥ ૪૯॥

પુનરુક્તો હ્યહં માત્રા રુદત્યા ભૃશમન્તિકે ।
પુત્રશોકાતિતપ્તા યા વંશરક્ષણકામ્યયા ॥ ૫૦॥

પારાશર્ય ન તે દોષો વચનાન્મમ પુત્રક ।
ગુરૂણાં વચનં તથ્યં સદોષમપિ માનવૈઃ ॥ ૫૧॥

કર્તવ્યમવિચાર્યૈવ શિષ્ટાચારપ્રમાણતઃ ।
વચનં કુરુ મે પુત્ર ન તે દોષોऽસ્તિ માનદ ॥ ૫૨॥

પુત્રસ્ય જનનં કૃત્વા સુખિની કુરુ માતરમ્ ।
વિશેષેણ તુ સન્તપ્તાં મગ્નાં શોકાર્ણવે સુત ॥ ૫૩॥

ઇતિ તાં બ્રુવતીં શ્રુત્વા તદા સુરનદીસુતઃ ।
મામુવાચ વિશેષજ્ઞઃ સૂક્ષ્મધર્મસ્ય નિર્ણયે ॥ ૫૪॥

દ્વૈપાયન વિચારોऽત્ર ન કર્તવ્યસ્ત્વયાનઘ ।
માતુર્વચનમાદાય વિહરસ્વ યથાસુખમ્ ॥ ૫૫॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા માતુશ્ચ પ્રાર્થનં તથા ।
નિઃશઙ્કોऽહં તદા જાતઃ કાર્યે તસ્મિઞ્જુગુપ્સિતે ॥ ૫૬॥

અમ્બિકાયાં પ્રવૃત્તોऽહમૃતુમત્યાં મુદા નિશિ ।
મયિ વિમનસાયાં તુ તાપસે કુત્સિતે ભૃશમ્ ॥ ૫૭॥

શપ્તા મયા સા સુશ્રોણી પ્રસઙ્ગે પ્રથમે તદા ।
અન્ધસ્તે ભવિતા પુત્રો યતો નેત્રે નિમીલિતે ॥ ૫૮॥

દ્વિતીયેઽહ્નિ મુનિશ્રેષ્ઠ પૃષ્ટો માત્રા રહઃ પુનઃ ।
ભવિષ્યતિ સુતઃ પુત્ર કાશિરાજસુતોદરે ॥ ૫૯॥

મયોક્તા જનની તત્ર વ્રીડાનમ્રમુખેન હ ।
વિનેત્રો ભવિતા પુત્રો માતઃ શાપાન્મમૈવ હિ ॥ ૬૦॥

તયા નિર્ભર્ત્સિતસ્તત્ર કઠોરવચસા મુને ।
કથં પુત્ર ત્વયા શપ્તા પુત્રસ્તેઽન્ધો ભવિષ્યતિ ॥ ૬૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
અમ્બિકાયાં નિયોગાત્પુત્રોત્પાદનાય ગર્ભધારણવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૬.૨૪॥

## ૬.૨૫ પઞ્ચવિંશોઽધ્યાયઃ । વ્યાસસ્વકીયમોહવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
વાસવી ચકિતા જાતા શ્રુત્વા મે વાક્યમીદૃશમ્ ।
દાશેયી મામુવાચેદં પુત્રાર્થે ભૃશમાતુરા ॥ ૧॥

અમ્બાલિકા વધૂર્ધન્યા કાશિરાજસુતા સુત ।
ભાર્યા વિચિત્રવીર્યસ્ય વિધવા શોકસંયુતા ॥ ૨॥

સર્વલક્ષણસમ્પન્ના રૂપયૌવનશાલિની ।
તસ્યાં જનય સઙ્ગં ત્વં કૃત્વા પુત્રં સુસમ્મતમ્ ॥ ૩॥

નાન્ધો રાજાધિકારી સ્યાત્તસ્માત્પુત્ર મનોહરમ્ ।
ઉત્પાદય રાજપુત્ર્યાં વચનાન્મમ માનદ ॥ ૪॥

ઇત્યુક્તોઽહં તદા માત્રા સ્થિતસ્તત્ર ગજાહ્વયે ।
યાવદૃતુમતી જાતા કાશિરાજસુતા મુને ॥ ૫॥

એકાન્તે શયનાગારે પ્રાપ્તા સા મમ સન્નિધૌ ।
લજ્જમાના સુકેશાન્તા સ્વશ્વશ્રૂવચનાત્તદા ॥ ૬॥

દૃષ્ટ્વા માં જટિલં દાન્તં તાપસં રસવર્જિતમ્ ।
સા સ્વેદવદના જાતા પાણ્ડુરા વિમના ભૃશમ્ ॥ ૭॥

કુપિતોઽહં તદા દૃષ્ટ્વા કામિનીં નિશિ સઙ્ગતામ્ ।
વેપમાનાં સ્થિતાં પાર્શ્વે હ્યબ્રવં તામહં રુષા ॥ ૮॥

દૃષ્ટ્વા માં યદિ ગર્વેણ પાણ્ડુવર્ણા સમાવૃતા ।
અતસ્તે તનયઃ પાણ્ડુર્ભવિષ્યતિ સુમધ્યમે ॥ ૯॥

ઇત્યુક્ત્વા નિશિ તત્રૈવ સ્થિતોઽમ્બાલિકયા યુતઃ ।
ભુક્ત્વા તાં નિશિ નિર્યાતઃ સ્થાનમાપૃચ્છ્ય માતરમ્ ॥ ૧૦॥

તતસ્તાભ્યાં સુતૌ કાલે પ્રસૂતાવન્ધપાણ્ડુરૌ ।
ધૃતરાષ્ટ્રશ્ચ પાણ્ડુશ્ચ પ્રથિતૌ સમ્બભૂવતુઃ ॥ ૧૧॥

માતા મે વિમના જાતા તાદૃશૌ વીક્ષ્ય તૌ સુતૌ ।
તતઃ સંવત્સરસ્યાન્તે મામાહૂય તદાબ્રવીત્ ॥ ૧૨॥

દ્વૈપાયન સુતૌ જાતૌ રાજ્યયોગ્યૌ ન તાદૃશૌ ।
અન્યં મનોહરં પુત્રં સમુત્પાદય મે પ્રિયમ્ ॥ ૧૩॥

તથેતિ સા મયા પ્રોક્તા મુદિતા જનની તદા ।
અમ્બિકાં પ્રાર્થયામાસ સુતાર્થે કાલ આગતે ॥ ૧૪॥

પુત્રિ વ્યાસં સમાલિઙ્ગ્ય પુત્રમુત્પાદયાદ્ભુતમ્ ।
કુરુવંશસ્ય કર્તારં રાજ્યયોગ્યં વરાનને ॥ ૧૫॥

વધૂર્લજ્જાન્વિતા કિઞ્ચિન્નોવાચ વચનં તદા ।
ગતોઽહં શયનાગારે માતુસ્તદ્વચનાન્નિશિ ॥ ૧૬॥

દાસી વિચિત્રવીર્યસ્ય રૂપયૌવનસંયુતા ।
પ્રેષિતામ્બિકયા ત્વત્ર વિચિત્રાભરણામ્બરા ॥ ૧૭॥

ચન્દનારક્તદેહા સા પુષ્પમાલાવિભૂષિતા ।
આયાતા હાવસંયુક્તા સુકેશી હંસગામિની ॥ ૧૮॥

પર્યઙ્કે માં સમાવેશ્ય સંસ્થિતા પ્રેમસંયુતા ।
પ્રસન્નોઽહં તદા તસ્યા વિલાસેનાભવં મુને ॥ ૧૯॥

રાત્રૌ સઙ્ક્રીડિતં પ્રેમ્ણા તયા સહ મયા ભૃશમ્ ।
વરો દત્તઃ પુનસ્તસ્યૈ પ્રસન્નેન તુ નારદ ॥ ૨૦॥

સુભગે ભવિતા પુત્રઃ સર્વલક્ષણસંયુતઃ ।
સુરૂપઃ સર્વધર્મજ્ઞઃ સત્યવાદી શમે રતઃ ॥ ૨૧॥

સ તદા વિદુરો જાતસ્ત્રયઃ પુત્રા મયાભવન્ ।
માયા વૃદ્ધિં ગતા સાધો પરક્ષેત્રોદ્ભવે મમ ॥ ૨૨॥

વિસ્મૃતઃ શુકસમ્બન્ધી વિરહઃ શોકકારણમ્ ।
દૃષ્ટ્વા ત્રીન્સ્વસુતાન્કામં બલિનો વીર્યસમ્મતાન્ ॥ ૨૩॥

માયા બલવતી બ્રહ્મન્ દુસ્ત્યજા હ્યકૃતાત્મભિઃ ।
અરૂપા ચ નિરાલમ્બા જ્ઞાનિનામપિ મોહિની ॥ ૨૪॥

માતરિ સ્નેહસમ્બદ્ધં તથા પુત્રેષુ સંવૃતમ્ ।
ન મે ચિત્તં વને શાન્તિમગાન્મુનિવરોત્તમ ॥ ૨૫॥

દોલારૂઢં મનો જાતં કદાચિદ્ધસ્તિનાપુરે ।
પુનઃ સરસ્વતીતીરે ન ચૈકત્ર વ્યવસ્થિતિઃ ॥ ૨૬॥

કદાચિચ્ચિન્તયન્ જ્ઞાનં માનસે પ્રતિભાતિ વૈ ।
કેઽમી પુત્રાઃ ક્વ મોહોઽયં ન શ્રાદ્ધાર્હા મૃતસ્ય મે ॥ ૨૭॥

વ્યભિચારોદ્ભવાઃ કિં મે સુખદાઃ સ્યુઃ સુતાઃ કિલ ।
માયા બલવતી મોહં વિતનોતિ હિ માનસે ॥ ૨૮॥

જાનન્મોહાન્ધકૂપેઽસ્મિન્પતિતોઽહં મૃષા મુને ।
ઇત્યકુર્વં રહસ્તાપં કદાચિત્સ્સુસમાહિતઃ ॥ ૨૯॥

રાજ્યં પ્રાપ તતઃ પાણ્ડુર્બલવાન્ભીષ્મસમ્મતઃ ।
તદા મમ મનો જાતં પ્રસન્નં સુતકારણાત્ ॥ ૩૦॥

કુન્તી માદ્રી સુરૂપે દ્વે ભાર્યે તસ્ય બભૂવતુઃ ।
શૂરસેનસુતા કુન્તી મદ્રરાજસુતાપરા ॥ ૩૧॥

સ શાપં દ્વિજતઃ પ્રાપ્ય કામિનીદ્વયસંયુતઃ ।
પાણ્ડુર્નિર્વેદમાપન્નસ્ત્યક્ત્વા રાજ્યં વનં ગતઃ ॥ ૩૨॥

તદા મામાવિશચ્છોકઃ શ્રુત્વા પુત્રં વને સ્થિતમ્ ।
ગતોઽહં તત્ર યત્રાસૌ ભાર્યાભ્યાં સહ સંસ્થિતઃ ॥ ૩૩॥

તમાશ્વાસ્ય વને પાણ્ડું પુનઃ પ્રાપ્તો ગજાહ્વયે ।
ધૃતરાષ્ટ્રં સમાભાષ્ય હ્યગમં બ્રહ્મજાતટે ॥ ૩૪॥

ક્ષેત્રજાન્પઞ્ચપુત્રાન્સ સમુત્પાદ્ય વનાશ્રમે ।
ધર્મતો વાયુતઃ શક્રાદશ્વિભ્યાં પઞ્ચ પાણ્ડવાન્ ॥ ૩૫॥

યુધિષ્ઠિરો ભીમસેનસ્તથૈવાર્જુન ઇત્યપિ ।

કુન્તીપુત્રાઃ સમાખ્યાતા ધર્માનિલસુરેશજાઃ ॥ ૩૬॥

નકુલઃ સહદેવશ્ચ મદ્રરાજસુતાસુતૌ ।
કદાચિત્તુ રહો માદ્રીં સમાલિઙ્ગ્ય મહીપતિઃ ॥ ૩૭॥

મૃતઃ શાપાત્તુ મુનિભિઃ સંસ્કૃતો હુતભુઙ્મુખે ।
માદ્રી તત્ર સતી ભૂત્વા પ્રવિષ્ટા પતિના સહ ॥ ૩૮॥

સ્થિતા પુત્રયુતા કુન્તી જ્વલિતે જાતવેદસિ ।
મુનયઃ સુતસંયુક્તાં શૂરસેનસુતાં તદા ॥ ૩૯॥

દુઃખિતાં પતિહીનાં તામાનિન્યુર્ગજસાહ્વયે ।
સમર્પિતાથ ભીષ્માય વિદુરાય મહાત્મને ॥ ૪૦॥

શ્રુત્વાહં સુખદુઃખાભ્યાં પીડિતસ્તુ પરાત્મભિઃ ।
ભીષ્મેણ પાલિતાઃ પુત્રાઃ પાણ્ડોરિતિ વિચિન્ત્ય તે ॥ ૪૧॥

વિદુરેણ તથા પ્રીત્યા ધૃતરાષ્ટ્રેણ ધીમતા ।
દુર્યોધનાદયસ્તસ્ય પુત્રા યે ક્રૂરમાનસાઃ ॥ ૪૨॥

એકત્ર સ્થિતિમાપન્ના વિરોધં ચક્રુરદ્ભુતમ્ ।
દ્રોણાચાર્યસ્તુ સમ્પ્રાપ્તસ્તત્ર ભીષ્મેણ માનિતઃ ॥ ૪૩॥

અધ્યાપનાય પુત્રાણાં પુરે તસ્મિન્નિવાસિતઃ ।
કર્ણઃ કુન્ત્યા પરિત્યક્તો જાતમાત્રઃ શિશુર્યદા ॥ ૪૪॥

સૂતેન પાલિતો નદ્યાં પ્રાન્તશ્ચાધિરથેન હ ।
દુર્યોધનપ્રિયશ્ચાભૂત્કર્ણઃ શૂરતમસ્તથા ॥ ૪૫॥

પરસ્પરં વિરોધોઽભૂદ્ભીમદુર્યોધનાદિષુ ।
ધૃતરાષ્ટ્રસ્તુ સઞ્ચિન્ત્ય ક્લેશં પુત્રેષુ તેષુ ચ ॥ ૪૬॥

નિવાસં કલ્પયામાસ પાણ્ડવાનાં મહાત્મનામ્ ।
વિરોધશમનાયૈવ નગરે વારણાવતે ॥ ૪૭॥

દુર્યોધનેન તત્રૈવ દ્રોહાજ્જતુગૃહાણિ વૈ ।
કારિતાનિ ચ દિવ્યાનિ પ્રેષ્ય મિત્રં પુરોચનમ્ ॥ ૪૮॥

શ્રુત્વા જતુગૃહે દગ્ધાન્પાણ્ડવાન્પૃથયા યુતાન્ ।
પૌત્રભાવાન્મુનિશ્રેષ્ઠ મગ્નોઽહં વ્યસનાર્ણવે ॥ ૪૯॥

શોકાતુરો ભૃશં શૂન્યે વને પશ્યન્નહર્નિશમ્ ।
દૃષ્ટા મયૈકચક્રાયાં પાણ્ડવા દુઃખકર્શિતાઃ ॥ ૫૦॥

તતસ્તુષ્ટમનાશ્ચાહં જાતઃ પાર્થાન્વિલોક્ય ચ ।
પ્રેરિતાસ્તે મયા તૂર્ણં દ્રુપદસ્ય પુરં પ્રતિ ॥ ૫૧॥

તે ગતાસ્તત્ર દુઃખાર્તા વિપ્રવેષધરાઃ કૃશાઃ ।
મૃગચર્મપરીધાનાઃ સભાયાં સંસ્થિતાસ્તદા ॥ ૫૨॥

કૃત્વા પરાક્રમં જિષ્ણુઃ સ જિત્વા દ્રુપદાત્મજામ્ ।
ચક્રુર્વિવાહં માનિન્યા પઞ્ચૈવ માતૃવાક્યતઃ ॥ ૫૩॥

દૃષ્ટ્વા વિવાહં તેષાં તુ મુદિતોઽહં ભૃશં તદા ।
તતો નાગાહ્વયે પ્રાપ્તાઃ પાઞ્ચાલીસહિતા મુને ॥ ૫૪॥

નિવાસં ખાણ્ડવપ્રસ્થં ધૃતરાષ્ટ્રેણ કલ્પિતમ્ ।
પાણ્ડવાનાં દ્વિજશ્રેષ્ઠ વસુદેવસુતેન વૈ ॥ ૫૫॥

તર્પિતઃ પાવકસ્તત્ર વિષ્ણુના સહ જિષ્ણુના ।
રાજસૂયઃ કૃતો યજ્ઞસ્તદાહં મુદિતોઽભવમ્ ॥ ૫૬॥

દૃષ્ટ્વાથ વિભવં તેષાં તથા મયકૃતાં સભામ્ ।
દુર્યોધનોઽતિસન્તપ્તો દુરોદરમથાકરોત્ ॥ ૫૭॥

દુર્દ્યૂતવેદી શકુનિરનક્ષજ્ઞશ્ચ ધર્મજઃ ।
હૃતં રાજ્યં ધનં સર્વં યાજ્ઞસેની ચ ક્લેશિતા ॥ ૫૮॥

વને દ્વાદશ વર્ષાણિ પાણ્ડવાસ્તે વિવાસિતાઃ ।
પાઞ્ચાલીસહિતાસ્તેન દુઃખં મે જનિતં ભૃશમ્ ॥ ૫૯॥

એવં નારદ સંસારે સુખદુઃખાત્મકે ભૃશમ્ ।
નિમગ્નોઽહં ભ્રમેણૈવ જાનન્ ધર્મં સનાતનમ્ ॥ ૬૦॥

કોઽહં કસ્ય સુતાસ્તેઽમી કા માતા કિં સુખં પુનઃ ।
યેન મે હૃદયં મોહાદ્ભ્રમતીતિ દિવાનિશમ્ ॥ ૬૧॥

કિં કરોમિ ક્વ ગચ્છામિ સન્તોષો નાધિગચ્છતિ ।
દોલારૂઢં મનો મેઽત્ર ચઞ્ચલં ન સ્થિરં ભવેત્ ॥ ૬૨॥

સર્વજ્ઞોઽસિ મુનિશ્રેષ્ઠ સન્દેહં મે નિવર્તય ।
તથા કુરુ યથાહં સ્યાં સુખિતો વિગતજ્વરઃ ॥ ૬૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે વ્યાસસ્વકીયમોહવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૬.૨૫॥

## ૬.૨૬ ષડ્વિંશોઽધ્યાયઃ । દમયન્તીવિવાહપ્રસ્તાવવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇતિ મે વચનં શ્રુત્વા નારદઃ પરમાર્થવિત્ ।
મામાહ ચ સ્મિતં કૃત્વા પૃચ્છન્તં મોહકારણમ્ ॥ ૧॥

નારદ ઉવાચ ।
પારાશર્ય પુરાણજ્ઞ કિં પૃચ્છસિ સુનિશ્ચયમ્ ।
સંસારેઽસ્મિન્વિના મોહં કોઽપિ નાસ્તિ શરીરવાન્ ॥ ૨॥

બ્રહ્માવિષ્ણુસ્તથા રુદ્રઃ સનકઃ કપિલસ્તથા ।
માયયા વેષ્ટિતાઃ સર્વે ભ્રમન્તિ ભવવર્ત્મનિ ॥ ૩॥

જ્ઞાનિનં માં જનો વેત્તિ ભ્રાન્તોઽહં સર્વલોકવત્ ।
શૃ‍ણુ મે પૂર્વવૃત્તાન્તં પ્રબ્રવીમિ સુનિશ્ચિતમ્ ॥ ૪॥

દુઃખં મયા યથા પૂર્વમનુભૂતં મહત્તરમ્ ।
સ્વકૃતેન ચ મોહેન ભાર્યાર્થે વાસવીસુત ॥ ૫॥

એકદા પર્વતશ્ચાહં દેવલોકાન્મહીતલમ્ ।
પ્રાપ્તો વિલોકનાર્થાય ભારતં ખણ્ડમુત્તમમ્ ॥ ૬॥

ભ્રમન્તૌ સહિતાવુર્વ્યાં પશ્યન્તૌ તીર્થમણ્ડલમ્ ।
પાવનાનિ ચ સ્થાનાનિ મુનીનામાશ્રમાઞ્છુભાન્ ॥ ૭॥

શપથં દેવલોકાત્તુ કૃત્વા પૂર્વં પરસ્પરમ્ ।
ચલિતૌ સમયં ચેમં સમ્મન્ત્ર્ય નિશ્ચયેન વૈ ॥ ૮॥

ચિત્તવૃત્તિસ્તુ વક્તવ્યા યાદૃશી યસ્ય જાયતે ।
શુભા વાપ્યશુભા વાપિ ન ગોપ્તવ્યા કદાચન ॥ ૯॥

ભોજનેચ્છા ધનેચ્છાપિ રતીચ્છા વા ભવેદપિ ।
યાદૃશી યસ્ય ચિત્તે તુ કથનીયા પરસ્પરમ્ ॥ ૧૦॥

ઇત્યાવાં સમયં કૃત્વા સ્વર્ગાદ્ભૂલોકમાગતૌ ।

એકચિત્તૌ મુનીભૂતૌ વિચરન્તૌ યથેચ્છયા ॥ ૧૧॥

એવં ભ્રમન્તૌ લોકેઽસ્મિન્ગ્રીષ્માન્તે સમુપાગતે ।
સઞ્જયસ્ય પુરં રમ્યં સમ્પ્રાપ્તૌ નૃપતે પુનઃ ॥ ૧૨॥

તેન સમ્પૂજિતૌ ભક્ત્યા રાજ્ઞા સમ્માનિતૌ ભૃશમ્ ।
સ્થિતૌ તત્ર ગૃહે તસ્ય ચાતુર્માસ્યં મહાત્મનઃ ॥ ૧૩॥

વાર્ષિકાશ્ચતુરો માસા દુર્ગમાઃ પથિ સર્વદા ।
તસ્માદેકત્ર વિબુધૈઃ સ્થાતવ્યમિતિ નિશ્ચયઃ ॥ ૧૪॥

અષ્ટૌ માસાંસ્તુ પ્રવસેત્સદા કાર્યવશાદ્દ્વિજઃ ।
વર્ષાકાલે ન ગન્તવ્યં પ્રવાસે સુખમિચ્છતા ॥ ૧૫॥

ઇતિ સઞ્ચિન્ત્ય મનસા સઞ્જયસ્ય ગૃહે તદા ।
સંસ્થિતૌ માનિતૌ રાજ્ઞા કૃતાતિથ્યૌ મહાત્મના ॥ ૧૬॥

દમયન્તીતિ વિખ્યાતા તસ્ય પુત્રી મહીપતેઃ ।
આજ્ઞપ્તા પરિચર્યાર્થં સુદતી સુન્દરી ભૃશમ્ ॥ ૧૭॥

વિવેકજ્ઞા વિશાલાક્ષી રાજપુત્રી કૃતોદ્યમા ।
સેવનં સર્વકાલે ચ વ્યદધાદુભયોરપિ ॥ ૧૮॥

સ્નાનાર્થમુદકં કાલે ભોજનં મૃષ્ટમાયતમ્ ।
મુખવાસં તથા ચાન્યં યદિષ્ટં તદ્દદાતિ સા ॥ ૧૯॥

મનોઽભિલષિતાન્કામાનુભયોરપિ કન્યકા ।
વ્યજનાસનશય્યાદીન્વાઞ્છિતાનપ્યકલ્પયત્ ॥ ૨૦॥

એવં સંસેવ્યમાનૌ તુ સ્થિતૌ રાજ્ઞો ગૃહે કિલ ।
વેદાધ્યયનસંશીલાવાવાં વેદવ્રતે રતૌ ॥ ૨૧॥

અહં વીણાં કરે કૃત્વા સાધયિત્વા સ્વરોત્તમમ્ ।
ગાયત્રં સામ સુસ્વાદમગાં કર્ણરસાયનમ્ ॥ ૨૨॥

રાજપુત્રી તુ તચ્છ્રુત્વા સામગાનં મનોહરમ્ ।
બભૂવ મયિ રાગાઢ્યા પ્રીતિયુક્તા વિશારદા ॥ ૨૩॥

દિને દિનેઽનુરાગોઽસ્યા મયિ વૃદ્ધિં ગતઃ પરઃ ।
મમાપિ પ્રીતિયુક્તાયાં મનો જાતં સ્પૃહાપરમ્ ॥ ૨૪॥

મમ તસ્ય ચ સા કન્યા ભોજનાદિષુ કર્હિચિત્ ।
અકરોદન્તરં કિઞ્ચિત્સેવાભેદં રસાન્વિતા ॥ ૨૫॥

સ્નાનાયોષ્ણજલં મહ્યં પર્વતાય ચ શીતલમ્ ।
દધિ મહ્યં તથા તક્રં પર્વતાયાપ્યકલ્પયત્ ॥ ૨૬॥

શયનાસ્તરણં શુભ્રં મદર્થે પર્યકલ્પયત્ ।
પ્રીત્યા પરમયા યદ્વત્પર્વતાય ન તાદૃશમ્ ॥ ૨૭॥

વિલોકયતિ માં પ્રેમ્ણા સુન્દરી ન ચ પર્વતમ્ ।
તતોઽસ્યાસ્તાદૃશં દૃષ્ટ્વા પર્વતઃ પ્રેમકારણમ્ ॥ ૨૮॥

મનસા ચિન્તયામાસ કિમેતદિતિ વિસ્મિતઃ ।
પપ્રચ્છ માં રહઃ સમ્યગ્બ્રૂહિ નારદ સર્વથા ॥ ૨૯॥

રાજપુત્રી ત્વયિ પ્રેમ કરોતિ મુદિતા ભૃશમ્ ।
દદાતિ ભક્ષ્યભોજ્યાનિ સ્નેહયુક્તા સમન્તતઃ ॥ ૩૦॥

ન તથા મયિ ભેદોઽત્ર સન્દેહં જનયત્યસૌ ।
મન્યતે ત્વાં પતિં કર્તું સર્વથા સઞ્જયાત્મજા ॥ ૩૧॥

તવાપિ તાદૃશં ભાવં જાનામિ લક્ષણૈરહમ્ ।
નેત્રવક્ત્રવિકારૈશ્ચ જ્ઞાયતે પ્રીતિકારણમ્ ॥ ૩૨॥

સત્યં વદ ન તે મિથ્યા વક્તવ્યં વચનં મુને ।
સ્વર્ગતઃ સમયં કૃત્વા ચલિતૌ સંસ્મરાધુના ॥ ૩૩॥

નારદ ઉવાચ ।
પૃષ્ટોઽહં પર્વતેનેદં કારણં તુ હઠાદ્યદા ।
તદાહં હ્રીસમાક્રાન્તઃ સઞ્જાતશ્ચાબ્રુવં પુનઃ ॥ ૩૪॥

પર્વતૈષા વિશાલાક્ષી પતિં માં કર્તુમુદ્યતા ।
મમાપિ માનસો ભાવો વર્તતેઽસ્યાં વિશેષતઃ ॥ ૩૫॥

તચ્છ્રુત્વા વચનં સત્યં પર્વતઃ કોપસંયુતઃ ।
મામુવાચ મુનિર્વાક્યં ધિગ્ધિગિતિ પુનઃ પુનઃ ॥ ૩૬॥

પ્રથમં શપથાન્કૃત્વા વઞ્ચિતોઽહં ત્વયા યતઃ ।
ભવ વાનરવક્ત્રસ્ત્વં શાપાચ્ચ મમ મિત્રધુક્ ॥ ૩૭॥

ઇતિ શપ્તસ્તુ તેનાહં કુપિતેન મહાત્મના ।

સહસા હ્યભવં ક્રૂરઃ શાખામૃગમુખસ્તદા ॥ ૩૮॥

મયાપિ ન કૃતા તસ્મિન્ક્ષમા તુ ભગિનીસુતે ।
સોઽપિ શપ્તોઽતિકોપાદ્વૈ મા સ્વર્ગે તે ગતિઃ કિલ ॥ ૩૯॥

સ્વલ્પેઽપરાધે યસ્માન્માં શપ્તવાનસિ પર્વત ।
તસ્માત્તવાપિ મન્દાત્મન્ મૃત્યુલોકે સ્થિતિઃ કિલ ॥ ૪૦॥

પર્વતસ્તુ ગતસ્તસ્માન્નગરાદ્વિમના ભૃશમ્ ।
અહં વાનરવક્ત્રસ્તુ સઞ્જાતસ્તત્ક્ષણાદપિ ॥ ૪૧॥

દૃષ્ટ્વા માં વાનરં ક્રૂરં રાજપુત્રી વિલક્ષણા ।
વિમનાતીવ સઞ્જાતા વીણાશ્રવણલાલસા ॥ ૪૨॥

વ્યાસ ઉવાચ ।
તતઃ કિમભવદ્બ્રહ્મન્ કથં શાપાન્નિવર્તિતઃ ।
માનુષાસ્યઃ પુનર્જાતો ભવાન્બ્રૂહિ યથાવિધિ ॥ ૪૩॥

પર્વતઃ ક્વ ગતો ભૂયઃ સઙ્ગમો યુવયોરભૂત્ ।
કદા કુત્ર કથં સર્વં વિસ્તરેણ વદસ્વ હ ॥ ૪૪॥

નારદ ઉવાચ ।
કિં બ્રવીમિ મહાભાગ માયાયાશ્ચરિતં મહત્ ।
દુઃખિતોઽહં ભૃશં તત્ર પર્વતે રુષિતે ગતે ॥ ૪૫॥

પુનઃ સેવાપરાત્યર્થં રાજપુત્રી મમાભવત્ ।
ગતેઽથ પર્વતે કામં સ્થિતસ્તત્રૈવ સદ્મનિ ॥ ૪૬॥

અહં દુઃખાન્વિતો દીનસ્તથા વાનરવન્મુખઃ ।
વિશેષેણ તુ ચિન્તાર્તઃ કિં મે સ્યાદિતિ ચિન્તયન્ ॥ ૪૭॥

સઞ્જયોઽથ સુતાં દૃષ્ટ્વા કિઞ્ચિત્પ્રકટયૌવનામ્ ।
વિવાહાર્થે રાજસુતામપૃચ્છત્સચિવં તદા ॥ ૪૮॥

વિવાહકાલઃ સમ્પ્રાપ્તઃ સુતાયા મમ સામ્પ્રતમ્ ।
યોગ્યં વરં મમ બ્રૂહિ રાજપુત્રં સુસમ્મતમ્ ॥ ૪૯॥

રૂપૌદાર્યગુણૈર્યુક્તં શૂરં સુકુલસમ્ભવમ્ ।
વિવાહં વિધિવત્પુત્ર્યાઃ કરોમિ કિલ સામ્પ્રતમ્ ॥ ૫૦॥

પ્રધાનસ્ત્વબ્રવીદ્રાજન્ રાજપુત્રા હ્યનેકશઃ ।

વર્તન્તે ભુવિ પુત્રાસ્તે યોગ્યાઃ સર્વગુણાન્વિતાઃ ॥ ૫૧॥

યસ્મિન્ રુચિસ્તે રાજેન્દ્ર તમાહૂય નૃપાત્મજમ્ ।
દેહિ કન્યાં ધનં ભૂરિ હસ્ત્યશ્વરથસંયુતમ્ ॥ ૫૨॥

નારદ ઉવાચ ।
પિતુશ્ચિકીર્ષિતં જ્ઞાત્વા દમયન્તી તદા નૃપમ્ ।
ધાત્ર્યા મુખેન વાક્યજ્ઞા તમુવાચ રહઃ સ્થિતમ્ ॥ ૫૩॥

ધાત્ર્યુવાચ ।
દમયન્તી મહારાજ પુત્રી તે મામથાબ્રવીત્ ।
પિતરં બ્રૂહિ ધાત્રેયિ વચનાન્મે સુખાન્વિતમ્ ॥ ૫૪॥

મયા વૃતોઽથ મેધાવી નારદો મહતીયુતઃ ।
નાદમોહિતયા કામં નાન્યઃ કોઽપિ પ્રિયો મમ ॥ ૫૫॥

કુરુ મે વાઞ્છિતં તાત વિવાહં મુનિના સહ ।
નાન્યં વરિષ્યે ધર્મજ્ઞ નારદં તુ પતિં વિના ॥ ૫૬॥

મગ્નાહં નાદસિન્ધૌ વૈ નક્રહીને રસાત્મકે ।
અક્ષારે સુખસમ્પૂર્ણે તિમિઙ્ગિલવિવર્જિતે ॥ ૫૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે દમયન્તીવિવાહપ્રસ્તાવવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૬.૨૬॥

## ૬.૨૭ સપ્તવિંશોઽધ્યાયઃ । નારદસ્ય માયાદમયન્ત્યા સહ વિવાહવર્ણનમ્ ।

નારદ ઉવાચ ।
તત્પુત્ર્યા વચનં શ્રુત્વા રાજા ધાત્રીમુખાત્તતઃ ।
ભાર્યાં પ્રોવાચ કૈકેયીં સમીપસ્થાં સુલોચનામ્ ॥ ૧॥

રાજોવાચ ।
યદુક્તં વચનં કાન્તે ધાત્ર્યા તત્તુ ત્વયા શ્રુતમ્ ।
વૃતોઽયં નારદઃ કામં મુનિર્વાનરવક્ત્રભાક્ ॥ ૨॥

કિમિદં ચિન્તિતં પુત્ર્યા બુદ્ધિહીનં વિચેષ્ટિતમ્ ।
કથમસ્મૈ મયા દેયા કન્યા હરિમુખાય સા ॥ ૩॥

ક્વાસૌ ભિક્ષુઃ કુરૂપઃ ક્વ દમયન્તી મમાત્મજા ।

વિપરીતમિદં કાર્યં ન વિધેયં કદાચન ॥ ૪॥

તામેકાન્તે સુકેશાન્તે નિવારય હઠાત્સુતામ્ ।
યુક્ત્યા મુનિરતાં મુગ્ધાં શાસ્ત્રવૃદ્ધાનુસારયા ॥ ૫॥

ઇતિ ભર્તૃવચઃ શ્રુત્વા જનની તામથાબ્રવીત્ ।
ચ તે રૂપં મુનિઃ ક્વાસૌ વાનરાસ્યોઽધનઃ પુનઃ ॥ ૬॥

કથં મોહમવાપ્તાસિ ભિક્ષુકે ચતુરા પુનઃ ।
લતાકોમલદેહા ત્વં ભસ્મરૂક્ષતનુસ્ત્વયમ્ ॥ ૭॥

વાર્તા વાનરવક્ત્રેણ કથં યુક્તા તવાનઘે ।
કા પ્રીતિઃ કુત્સિતે પુંસિ ભવિષ્યતિ શુચિસ્મિતે ॥ ૮॥

વરસ્તે રાજપુત્રોઽસ્તુ મા કુરુ ત્વં વૃથા હઠમ્ ।
પિતા તે દુઃખમાપ્નોતિ શ્રુત્વા ધાત્રીમુખાદ્વચઃ ॥ ૯॥

લગ્નાં બુબૂલવૃક્ષેણ કોમલાં માલતીલતામ્ ।
દૃષ્ટ્વા કસ્ય મનઃ ખેદં ચતુરસ્ય ન ગચ્છતિ ॥ ૧૦॥

દાસેરકાય તામ્બૂલીદલાનિ કોમલાનિ કઃ ।
દદાતિ ભક્ષણાર્થાય મૂર્ખોઽપિ ધરણીતલે ॥ ૧૧॥

વીક્ષ્ય ત્વાં કરસંલગ્નાં નારદસ્ય સમીપતઃ ।
વિવાહે વર્તમાને તુ કસ્ય ચેતો ન દહ્યતિ ॥ ૧૨॥

કુમુખેન સમં વાર્તા ન રુચિં જનયત્યતઃ ।
આમૃતેસ્તુ કથં કાલઃ ક્ષપિતવ્યસ્ત્વયામુના ॥ ૧૩॥

નારદ ઉવાચ ।
ઇતિ માતુર્વચઃ શ્રુત્વા દમયન્તી ભૃશાતુરા ।
માતરં પ્રાહ તન્વઙ્ગી મયિ સા કૃતનિશ્ચયા ॥ ૧૪॥

કિં મુખેન ચ રૂપેણ મૂર્ખસ્ય ચ ધનેન કિમ્ ।
કિં રાજ્યેનાવિદગ્ધસ્ય રસમાર્ગાવિદોઽસ્ય ચ ॥ ૧૫॥

હરિણ્યોઽપિ વને ધન્યા યા નાદેન વિમોહિતાઃ ।
માતઃ પ્રાણાન્પ્રયચ્છન્તિ ધિઙ્મૂર્ખાન્માનુષાન્ભુવિ ॥ ૧૬॥

નારદો વેત્તિ યાં વિદ્યાં માતઃ સપ્તસ્વરાત્મિકામ્ ।
તૃતીયઃ કોઽપિ નો વેદ શિવાદન્યઃ પુમાન્કિલ ॥ ૧૭॥

મૂર્ખેણ સહ સંવાસો મરણં તત્ક્ષણે ક્ષણે ।
રૂપવાન્ધનવાંસ્ત્યાજ્યો ગુણહીનો નરઃ સદા ॥ ૧૮॥

ધિઙ્મૈત્રીં મૂર્ખભૂપાલે વૃથા ગર્વસમન્વિતે ।
ગુણજ્ઞે ભિક્ષુકે શ્રેષ્ઠા વચનાત્સુખદાયિની ॥ ૧૯॥

સ્વરજ્ઞો ગ્રામવિત્કામં મૂર્ચ્છનાજ્ઞાનભેદભાક્ ।
દુર્લભઃ પુરુષશ્ચાષ્ટરસજ્ઞો દુર્બલોઽપિ વૈ ॥ ૨૦॥

યથા નયતિ કૈલાસં ગઙ્ગા ચૈવ સરસ્વતી ।
તથા નયતિ કૈલાસં સ્વરજ્ઞાનવિશારદઃ । ૨૧॥

સ્વરમાનં તુ યો વેદ સ દેવો માનુષોઽપિ સન્ ।
સપ્તભેદં ન યો વેદ સ પશુઃ સુરરાડપિ ॥ ૨૨॥

મૂર્ચ્છનાતાનમાર્ગં તુ શ્રુત્વા મોદં ન યાતિ યઃ ।
સ પશુઃ સર્વથા જ્ઞેયો હરિણાઃ પશવો ન હિ ॥ ૨૩॥

વરં વિષધરઃ સર્પઃ શ્રુત્વા નાદં મનોહરમ્ ।
અશ્રોત્રોઽપિ મુદં યાતિ ધિક્સકર્ણાંશ્ચ માનવાન્ ॥ ૨૪॥

બાલોઽપિ સુસ્વરં ગેયં શ્રુત્વા મુદિતમાનસઃ ।
જાયતે કિન્તુ તે વૃદ્ધા ન જાનન્તિ ધિગસ્તુ તાન્ ॥ ૨૫॥

પિતા મે કિં ન જાનાતિ નારદસ્ય ગુણાન્ બત ।
દ્વિતીયઃ સામગો નાસ્તિ ત્રિષુ લોકેષુ તત્સમઃ ॥ ૨૬॥

તસ્માદસૌ મયા નૂનં વૃતઃ પૂર્વં સમાગમાત્ ।
પશ્ચાચ્છાપવશાજ્જાતો વાનરાસ્યો ગુણાકરઃ ॥ ૨૭॥

કિન્નરા ન પ્રિયાઃ કસ્ય ભવન્તિ તુરગાનનાઃ ।
ગાનવિદ્યાસમાયુક્તાઃ કિં મુખેન વરેણ હ ॥ ૨૮॥

પિતરં બ્રૂહિ મે માતર્વૃતોઽયં મુનિસત્તમઃ ।
તસ્માત્ત્વમાગ્રહં ત્યક્ત્વા દેહિ તસ્મૈ ચ માં મુદા ॥ ૨૯॥

નારદ ઉવાચ ।
ઇતિ પુત્ર્યા વચઃ શ્રુત્વા રાજ્ઞી રાજ્ઞે ન્યવેદયત્ ।
આગ્રહં સુન્દરી જ્ઞાત્વા સુતાયા નારદે મુનૌ ॥ ૩૦॥

વિવાહં કુરુ રાજેન્દ્ર દમયન્ત્યાઃ શુભે દિને ।
મુનિના સ ચ સર્વજ્ઞો વૃતોઽસૌ મનસાનયા ॥ ૩૧॥

નારદ ઉવાચ ।
ઇતિ સઞ્ચોદિતો રાજ્ઞ્યા સઞ્જયઃ પૃથિવીપતિઃ ।
ચકાર વિધિવત્સર્વં વિધિં વૈવાહિકં તતઃ ॥ ૩૨॥

એવં દારગ્રહં કૃત્વા વાનરાસ્યઃ પરન્તપ ।
સ્થિતસ્તત્રૈવ મનસા દહ્યમાનેન ચાન્વહમ્ ॥ ૩૩॥

યદાઽઽગચ્છદ્રાજસુતા સેવાર્થં મમ સન્નિધૌ ।
અભવં દુઃખસન્તપ્તસ્તદાહં વાનરાનનઃ ॥ ૩૪॥

દમયન્તી તુ માં વીક્ષ્ય પ્રફુલ્લવદનામ્બુજા ।
શોકં વાનરવક્ત્રત્વાન્ન ચકાર કદાચન ॥ ૩૫॥

એવં ગચ્છતિ કાલે તુ સહસા પર્વતો મુનિઃ ।
કુર્વંસ્તીર્થાન્યનેકાનિ દ્રષ્ટું માં સમુપાગતઃ ॥ ૩૬॥

મયાતિમાનિતઃ પ્રેમ્ણા પૂજિતશ્ચ યથાવિધિ ।
આસીન આસને દિવ્યે વીક્ષ્ય માં દુઃખિતો હ્યભૂત્ ॥ ૩૭॥

કૃતદારં વાનરાસ્યં દીનં ચિન્તાતુરં ભૃશમ્ ।
દયાવાન્મામુવાચેદં પર્વતો માતુલં કૃશમ્ ॥ ૩૮॥

મયા નારદ કોપાત્ત્વં શપ્તોઽસિ મુનિસત્તમ ।
નિષ્કૃતિં તસ્ય શાપસ્ય કરોમ્યદ્ય નિશામય ॥ ૩૯॥

ભવ ત્વં ચારુવદનો મમ પુણ્યેન નારદ ।
દૃષ્ટ્વા રાજસુતાં ચિત્તે કૃપા જાતા મમાધુના ॥ ૪૦॥

નારદ ઉવાચ ।
મયાપિ પ્રવણં ચિત્તં કૃત્વા શ્રુત્વાસ્ય ભાષિતમ્ ।
અનુગ્રહઃ કૃતઃ સદ્યસ્તસ્ય શાપસ્ય તત્ક્ષણાત્ ॥ ૪૧॥

ભાગિનેય તવાપ્યસ્તુ ગમનં સુરસદ્મનિ ।
શાપસ્યાનુગ્રહઃ કામં કૃતોઽયં પર્વતાધુના ॥ ૪૨॥

નારદ ઉવાચ ।
જાતોઽહં ચારુવદનો વચનાત્તસ્ય પશ્યતઃ ।

રાજપુત્રી તુ સન્તુષ્ટા માતરં પ્રાહ સત્વરમ્ ॥ ૪૩॥

માતસ્તે સુમુખો જાતો જામાતા ચ મહાદ્યુતિઃ ।
વચનાત્પર્વતસ્યાદ્ય મુક્તશાપો મુનેરભૂત્ ॥ ૪૪॥

તચ્છ્રુત્વા વચનં રાજ્ઞ્યા કથિતં તત્તુ રાજનિ ।
યયૌ દ્રષ્ટું મુનિં તત્ર સઞ્જયઃ પ્રીતિમાંસ્તદા ॥ ૪૫॥

ધનં સમર્પિતં રાજ્ઞા સન્તુષ્ટેન તદા મહત્ ।
મહ્યં ચ ભાગિનેયાય પારિબર્હં મહાત્મના ॥ ૪૬॥

એતત્તે સર્વમાખ્યાતં વર્તનં યત્પુરાતનમ્ ।
માયાયા બલમાહાત્મ્યં હ્યનુભૂતં યથા મયા ॥ ૪૭॥

સંસારેઽસ્મિન્મહાભાગ માયાગુણકૃતેઽનૃતે ।
તનુભૃત્તુ સુખી નાસ્તિ ન ભૂતો ન ભવિષ્યતિ ॥ ૪૮॥

કામક્રોધૌ તથા લોભો મત્સરો મમતા તથા ।
અહઙ્કારો મદઃ કેન જિતાઃ સર્વે મહાબલાઃ ॥ ૪૯॥

સત્ત્વં રજસ્તમશ્ચૈવ ગુણાસ્ત્રય ઇમે કિલ ।
કારણં પ્રાણિનાં દેહસમ્ભવે સર્વથા મુને ॥ ૫૦॥

કસ્મિંશ્ચિત્સમયે વ્યાસ વનેઽહં વિષ્ણુના સહ ।
ગચ્છન્હાસ્યવિનોદેન સ્ત્રીભાવં ગમિતઃ ક્ષણાત્ ॥ ૫૧॥

રાજપત્નીત્વમાપન્નો માયાબલવિમોહિતઃ ।
પુત્રાઃ પ્રસૂતા બહવો ગેહે તસ્ય નૃપસ્ય હ ॥ ૫૨॥

વ્યાસ ઉવાચ ।
સંશયોઽયં મહાન્સાધો શ્રુત્વા તે વચનં કિલ ।
કથં નારીત્વમાપન્નસ્ત્વં મુને જ્ઞાનવાન્ભૃશમ્ ॥ ૫૩॥

કથં ચ પુરુષો જાતો બ્રૂહિ સર્વમશેષતઃ ।
કથં પુત્રાસ્ત્વયા જાતાઃ કસ્ય રાજ્ઞો ગૃહેઽઞ્જસા ॥ ૫૪॥

એતદાખ્યાહિ ચરિતં માયાયા મહદદ્ભુતમ્ ।
મોહિતં ચ યયા સર્વમિદં સ્થાવરજઙ્ગમમ્ ॥ ૫૫॥

ન તૃપ્તિમધિગચ્છામિ શ ૃણ્વંસ્તવ કથામૃતમ્ ।
સર્વગ્રન્થાર્થતત્ત્વં ચ સર્વસંશયનાશનમ્ ॥ ૫૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
નારદસ્ય માયાદમયન્ત્યા સહ વિવાહવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૬.૨૭॥

## ૬.૨૮ અષ્ટાવિંશોઽધ્યાયઃ । નારદેન સ્વસ્ત્રીત્વપ્રાપ્તિવર્ણનમ્ ।

નારદ ઉવાચ ।
નિશામય મુનિશ્રેષ્ઠ ગદતો મમ સત્કથામ્ ।
માયાબલં સુદુર્જ્ઞેયં મુનિભિર્યોગવિત્તમૈઃ ॥ ૧॥

માયયા મોહિતં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ।
બ્રહ્માદિસ્તમ્બપર્યન્તમજયા દુર્વિભાવ્યયા ॥ ૨॥

કદાચિત્સત્યલોકાદ્વૈ શ્વેતદ્વીપે મનોહરે ।
ગતોઽહં દર્શનાકાઙ્ક્ષી હરેરદ્ભુતકર્મણઃ ॥ ૩॥

વાદયન્મહતીં વીણાં સ્વરતાનવિભૂષિતામ્ ।
ગાયત્રં ગાયમાનસ્તુ સામ સપ્તસ્વરાન્વિતમ્ ॥ ૪॥

દૃષ્ટો મયા દેવદેવશ્ચક્રપાણિર્ગદાધરઃ ।
કૌસ્તુભોદ્ભાસિતોરસ્કો મેઘશ્યામશ્ચતુર્ભુજઃ ॥ ૫॥

પીતામ્બરપરીધાનો મુકુટાઙ્ગદરાજિતઃ ।
લક્ષ્મ્યા સહ વિલાસિન્યા ક્રીડમાનો મુદા યુતઃ ॥ ૬॥

વીક્ષ્ય માં કમલા દેવી ગતાન્તર્ધાનમન્તિકાત્ ।
સર્વલક્ષણસમ્પન્ના સર્વભૂષણભૂષિતા ॥ ૭॥

નારીણાં પ્રવરા કાન્તા રૂપયૌવનગર્વિતા ।
સુપ્રિયા વાસુદેવસ્ય વરચામીકરપ્રભા ॥ ૮॥

અન્તર્ગૃહં ગતા દૃષ્ટ્વા સિન્ધુજાં વ્યઞ્જનાન્વિતામ્ ।
મયા પૃષ્ટો દેવદેવો વનમાલી જગત્પ્રભુઃ ॥ ૯॥

ભગવન્દેવદેવેશ પદ્મનાભ સુરારિહન્ ।
કથં ચ મા ગતા દૃષ્ટ્વા મામાગચ્છન્તમન્તિકાત્ ॥ ૧૦॥

નાહં વિટો ન વા ધૂર્તઃ તાપસોઽહં જગદ્ગુરો ।
જિતેન્દ્રિયો જિતક્રોધો જિતમાયો જનાર્દન ॥ ૧૧॥

નારદ ઉવાચ ।
નિશમ્ય વચનં કિઞ્ચિદ્ગર્વયુક્તં જનાર્દનઃ ।
ઉવાચ માં સ્મિતં કૃત્વા વીણાવન્મધુરાં ગિરમ્ ॥ ૧૨॥

વિષ્ણુરુવાચ ।
નારદૈવંવિધા નીતિર્ન સ્થાતવ્યં કદાચન ।
પતિં વિનાન્યસાનિધ્યે કસ્યચિદ્યોષયા ક્વચિત્ ॥ ૧૩॥

માયા સુદુર્જયા વિદ્વન્ યોગિભિર્જિતમારુતૈઃ ।
સાઙ્ખ્યવિદ્ભિર્નિરાહારૈસ્તાપસૈશ્ચ જિતેન્દ્રિયૈઃ ॥ ૧૪॥

દેવૈશ્ચ મુનિશાર્દૂલ યત્ત્વયોક્તં વચોઽધુના ।
જિતમાયોઽસ્મિ ગીતજ્ઞ નૈવં વાચ્યં કદાચન ॥ ૧૫॥

નાહં શિવો ન વા બ્રહ્મા જેતું તાં પ્રભવોઽપ્યજામ્ ।
મુનયઃ સનકાદ્યાશ્ચ કસ્ત્વં કેઽન્યે ક્ષમા જયે ॥ ૧૬॥

દેવદેહં નૃદેહં વા તિર્યગ્દેહમથાપિ વા ।
બિભૃયાદ્યઃ શરીરં ચ સ કથં તાં જયેદજામ્ ॥ ૧૭॥

ત્રિયુતસ્તાં કથં માયાં જેતું શક્તઃ પુમામ્ભવેત્ ।
વેદવિદ્યોગવિદ્વાપિ સર્વજ્ઞો વિજિતેન્દ્રિયઃ ॥ ૧૮॥

કાલોઽપિ તસ્યા રૂપં હિ રૂપહીનઃ સ્વરૂપકૃત્ ।
તદ્વશે વર્તતે દેહી વિદ્વાન્મૂર્ખોઽથ મધ્યમઃ ॥ ૧૯॥

કાલઃ કરોતિ ધર્મજ્ઞં કદાચિદ્વિકલં પુનઃ ।
સ્વભાવાત્કર્મતો વાપિ દુર્જ્ઞેયં તસ્ય ચેષ્ટિતમ્ ॥ ૨૦॥

નારદ ઉવાચ ।
ઇત્યુક્ત્વા વિરતો વિષ્ણુરહં વિસ્મયમાનસઃ ।
તમબ્રવં જગન્નાથં વાસુદેવં સનાતનમ્ ॥ ૨૧॥

રમાપતે કથંરૂપા માયા સા કીદૃશી પુનઃ ।
કિયદ્બલા ક્વ સંસ્થાના કસ્યાધારા વદસ્વ મે ॥ ૨૨॥

દ્રષ્ટુકામોઽસ્મિ તાં માયાં દર્શયાશુ મહીધર ।
જ્ઞાતુમિચ્છામિ તાં સમ્યક્પ્રસાદં કુરુ માપતે ॥ ૨૩॥

વિષ્ણુરુવાચ ।

ત્રિગુણા સાખિલાધારા સર્વજ્ઞા સર્વસમ્મતા ।
અજેયાનેકરૂપા ચ સર્વં વ્યાપ્ય સ્થિતા જગત્ ॥ ૨૪॥

દિદૃક્ષા યદિ તે ચિત્તે નારદારોહણં કુરુ ।
ગરુડે મત્સમેતોઽદ્ય ગચ્છાવોઽન્યત્ર સામ્પ્રતમ્ ॥ ૨૫॥

દર્શયિષ્યામિ તે માયાં દુર્જયામજિતાત્મભિઃ ।
દૃષ્ટ્વા તાં બ્રહ્મપુત્ર ત્વં વિષાદે મા મનઃ કૃથાઃ ॥ ૨૬॥

ઇત્યુક્ત્વા દેવદેવો માં સસ્માર વિનતાસુતમ્ ।
સ્મૃતમાત્રસ્તુ ગરુડસ્તદાગાદ્ધરિસન્નિધૌ ॥ ૨૭॥

આગતં ગરુડં વીક્ષ્ય આરુરોહ જનાર્દનઃ ।
સમારોપ્ય ચ માં પૃષ્ઠે ગમનાય કૃતાદરઃ ॥ ૨૮॥

ચલિતો વિનતાપુત્રો વૈકુણ્ઠાદ્વાયુવેગવાન્ ।
પ્રેરિતો યત્ર કૃષ્ણેન ગન્તુકામેન કાનનમ્ ॥ ૨૯॥

મહાવનાનિ દિવ્યાનિ સરાંસિ સરિતસ્તથા ।
પુરગ્રામાકરાદીંશ્ચ ખેટખર્વટગોવ્રજાન્ ॥ ૩૦॥

મુનીનામાશ્રમાન્ રમ્યાન્ વાપીશ્ચ સુમનોહરાઃ ।
પલ્વલાનિ વિશાલાનિ હ્રદાન્ પઙ્કજભૂષિતાન્ ॥ ૩૧॥

મૃગાણાં ચ વરાહાણાં વૃન્દાન્યપ્યવલોક્ય ચ ।
ગતાવાવાં કાન્યકુબ્જસમીપં ગરુડાસનૌ ॥ ૩૨॥

તત્ર રમ્યં સરો દિવ્યં દૃષ્ટં પઙ્કજમણ્ડિતમ્ ।
હંસકારણ્ડવાકીર્ણં ચક્રવાકોપશોભિતમ્ ॥ ૩૩॥

નાનાવર્ણૈઃ પ્રફુલ્લૈશ્ચ પઙ્કજૈરુપરઞ્જિતમ્ ।
શુચિ મિષ્ટજલં ભૃઙ્ગયૂથનાદવિરાજિતમ્ ॥ ૩૪॥

મામાહ ભગવાન્ વીક્ષ્ય તડાગં પરમાદ્ભુતમ્ ।
સ્પર્ધકં ચોદધેઃ ક્ષીરં મિષ્ટં વારિ વિશેષતઃ ॥ ૩૫॥

શ્રીભગવાનુવાચ ।
પશ્ય નારદ ગમ્ભીરં સરઃ સારસનાદિતમ્ ।
સર્વત્ર પઙ્કજૈશ્છન્નં સ્વચ્છનીરપ્રપૂરિતમ્ ॥ ૩૬॥

અત્ર સ્નાત્વા ગમિષ્યાવઃ કાન્યકુબ્જં પુરોત્તમમ્ ।

ઇત્યુક્ત્વા ગરુડાદાશુ મામુત્તાર્ય વ્યતારયત્ ॥ ૩૭॥

વિહસ્ય ભગવાંસ્તત્ર જગ્રાહ મમ તર્જનીમ્ ।
સ્તુવન્સરોવરં ભૂયસ્તીરે મામનયત્પ્રભુઃ ॥ ૩૮॥

વિશ્રમ્ય તટભાગે તુ સ્નિગ્ધચ્છાયે મનોહરે ।
મામુવાચ મુને સ્નાનં કુરુ ત્વં વિમલે જલે ॥ ૩૯॥

પશ્ચાદહં કરિષ્યામિ તડાગેઽસ્મિન્સુપાવને ।
સાધૂનામિવ ચેતાંસિ જલાનિ નિર્મલાનિ ચ ॥ ૪૦॥

સુરભીણિ પરાગૈસ્તુ પઙ્કજાનાં વિશેષતઃ ।
ઇત્યુક્તોઽહં ભગવતા મુક્ત્વા વીણાં મૃગાજિનમ્ ॥ ૪૧॥

સ્નાનાય કૃતધીસ્તીરે ગતઃ પ્રેમસમન્વિતઃ ।
પાદૌપ્રક્ષાલ્ય હસ્તૌચ શિખાં બદ્ધ્વા કુશગ્રહમ્ ॥ ૪૨॥

કૃત્વાઽઽચમ્ય શુચિસ્તોયે સ્નાતવાનસ્મિ તજ્જલે ।
યદા તસ્મિજ્જલે રમ્યે સ્નાતોઽહં પશ્યતો હરેઃ ॥ ૪૩॥

વિહાય પૌરુષં રૂપં પ્રાપ્તઃ સ્ત્રીત્વમનુત્તમમ્ ।
હરિર્ગૃહીત્વા વીણાં મે તથા કૃષ્ણાજિનં શુભમ્ ॥ ૪૪॥

આરુહ્ય ગરુડં તૂર્ણં જગામ સ્વગૃહં ક્ષણાત્ ।
તતોઽહં સ્ત્રીત્વમાપન્નશ્ચારુભૂષણભૂષિતઃ ॥ ૪૫॥

તત્ક્ષણાન્મનસો જાતા પૂર્વદેહસ્ય વિસ્મૃતિઃ ।
વિસ્મૃતોઽસૌ જગન્નાથો મહતી વિસ્મૃતા પુનઃ ॥ ૪૬॥

સમ્પ્રાપ્ય મોહિનીરૂપં તડાગાન્નિર્ગતો બહિઃ ।
અપશ્યં નલિનીજુષ્ટં સરસ્તદ્વિમલોદકમ્ ॥ ૪૭॥

કિમેતદિતિ મનસાકરવં વિસ્મયં મુહુઃ ।
એવં ચિન્તયમાનસ્ય નારીરૂપધરસ્ય મે ॥ ૪૮॥

સહસા દૃક્પથં પ્રાપ્તસ્તત્ર તાલધ્વજો નૃપઃ ।
ગજાશ્વરથવૃન્દૈશ્ચ સંવૃતો રથસંસ્થિતઃ ॥ ૪૯॥

યુવા ભૂષણસંવીતો દેહવાનિવ મન્મથઃ ।
વીક્ષ્ય માં ભૂપતિસ્તત્ર દિવ્યભૂષણભૂષિતામ્ ॥ ૫૦॥

રાકાચન્દ્રમુખીં યોષાં વિસ્મયં પરમં ગતઃ ।
પપ્રચ્છ કાસિ કલ્યાણિ કસ્ય પુત્રી સુરસ્ય વા ॥ ૫૧॥

માનુષસ્ય ચ વા કાન્તે ગન્ધર્વસ્યોરગસ્ય ચ ।
એકાકિની કથં બાલા રૂપયૌવનભૂષિતા ॥ ૫૨॥

વિવાહિતાથ કન્યા વા સત્યં વદ સુલોચને ।
કિં પશ્યસિ સુકેશાન્તે તડાગેઽસ્મિન્સુમધ્યમે ॥ ૫૩॥

ચિકીર્ષિતં પિકાલાપે બ્રૂહિ મન્મથમોહિનિ ।
ભુઙ્ક્ષ્વ ભોગાન્મરાલાક્ષિ મયા સહ કૃશોદરિ ।
વાઞ્છિતાન્મનસા નૂનં કૃત્વા માં પતિમુત્તમમ્ ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે નારદેન સ્વસ્ત્રીત્વપ્રાપ્તિવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૬.૨૮॥

## ૬.૨૯ એકોનત્રિંશોઽધ્યાયઃ । નારદસ્ય પુનઃ સ્વરૂપપ્રાપ્તિવર્ણનમ્ ।

નારદ ઉવાચ ।
ઇત્યુક્તોઽહં તદા તેન રાજ્ઞા તાલધ્વજેન ચ ।
વિમૃશ્ય મનસાત્યર્થં તમુવાચ વિશામ્પતે ॥ ૧॥

રાજન્નાહં વિજાનામિ પુત્રી કસ્યેતિ નિશ્ચયમ્ ।
પિતરૌ ક્વ ચ મે કેન સ્થાપિતા ચ સરોવરે ॥ ૨॥

કિં કરોમિ ક્વ ગચ્છામિ કથં મે સુકૃતં ભવેત્ ।
નિરાધારાસ્મિ રાજેન્દ્ર ચિન્તયામિ ચિકીર્ષિતમ્ ॥ ૩॥

દૈવમેવ પરં રાજન્નાસ્ત્યત્ર પૌરુષં મમ ।
ધર્મજ્ઞોઽસિ મહીપાલ યથેચ્છસિ તથા કુરુ ॥ ૪॥

તવાધીનાસ્મ્યહં ભૂપ ન મે કોઽપ્યસ્તિ પાલકઃ ।
ન પિતા ન ચ માતા ચ ન સ્થાનં ન ચ બાન્ધવાઃ ॥ ૫॥

ઇત્યુક્તોઽસૌ મયા રાજા બભૂવ મદનાતુરઃ ।
માં નિરીક્ષ્ય વિશાલાક્ષીં સેવકાનિત્યુવાચ હ ॥ ૬॥

નરયાનમાનયધ્વં ચતુર્વાહ્યં મનોહરમ્ ।
આરોહણાર્થમસ્યાસ્તુ કૌશેયામ્બરવેષ્ટિતમ્ ॥ ૭॥

મૃદ્વાસ્તરણસંયુક્તં મુક્તાજાલવિભૂષિતમ્ ।
ચતુરસ્રં વિશાલં ચ સુવર્ણરચિતં શુભમ્ ॥ ૮॥

તસ્ય તદ્વચનં શ્રુત્વા ભૃત્યાઃ સત્વરગામિનઃ ।
આનિન્યુઃ શિબિકાં દિવ્યાં મદર્થે વસ્ત્રવેષ્ટિતામ્ ॥ ૯॥

આરૂઢાઽહં તદા તસ્યાં તસ્ય પ્રિયચિકીર્ષયા ।
મુદિતોઽસૌ ગૃહે નીત્વા માં તદા પૃથિવીપતિઃ ॥ ૧૦॥

વિવાહવિધિના રાજા શુભે લગ્ને શુભે દિને ।
ઉપયેમે ચ માં તત્ર હુતભુક્સન્નિધૌ તતઃ ॥ ૧૧॥

તસ્યાહં વલ્લભા જાતા પ્રાણેભ્યોઽપિ ગરીયસી ।
સૌભાગ્યસુન્દરીત્યેવં નામ તત્ર કૃતં મમ ॥ ૧૨॥

રમમાણો મયા સાર્ધં સુખમાપ મહીપતિઃ ।
નાનાભોગવિલાસૈશ્ચ કામશાસ્ત્રોદિતૈસ્તથા ॥ ૧૩॥

રાજકાર્યાણિ સન્ત્યજ્ય ક્રીડાસક્તો દિવાનિશમ્ ।
નાસૌ વિવેદ ગચ્છન્તં કાલં કામકલારતઃ ॥ ૧૪॥

ઉદ્યાનેષુ ચ રમ્યેષુ વાપીષુ ચ ગૃહેષુ ચ ।
હર્મ્યેષુ વરશૈલેષુ દીર્ઘિકાસુ વરાસુ ચ ॥ ૧૫॥

વારુણીમદમત્તોઽસૌ વિહરન્કાનને શુભે ।
વિસૃજ્ય સર્વકાર્યાણિ મદધીનો બભૂવ હ ॥ ૧૬॥

વ્યાસાહં તેન સંસક્તા ક્રીડારસવશીકૃતા ।
સ્મૃતવાન્પૂર્વદેહં ન પુમ્ભાવં મુનિજન્મ ચ ॥ ૧૭॥

મમૈવાયં પતિર્યોષાહં પત્નીષુ પ્રિયા સતી ।
પટ્ટરાજ્ઞી વિલાસજ્ઞા સફલં જીવિતં મમ ॥ ૧૮॥

ઇતિ ચિન્તયતી તસ્મિન્પ્રેમબદ્ધા દિવાનિશમ્ ।
ક્રીડાસક્તા સુખે લુબ્ધા તં સ્થિતા વશવર્તિની ॥ ૧૯॥

વિસ્મૃતં બ્રહ્મવિજ્ઞાનં બ્રહ્મજ્ઞાનં ચ શાશ્વતમ્ ।
ધર્મશાસ્ત્રપરિજ્ઞાનં તદાસક્તમના સ્થિતા ॥ ૨૦॥

એવં વિહરતસ્તત્ર વર્ષાણિ દ્વાદશૈવ તુ ।
ગતાનિ ક્ષણવત્કામક્રીડાસક્તસ્ય મે મુને ॥ ૨૧॥

જાતા ગર્ભવતી ચાહં મુદં પ્રાપ નૃપસ્તદા ।
કારયામાસ વિધિવદ્ગર્ભસંસ્કારકર્મ ચ ॥ ૨૨॥

અપૃચ્છદ્દોહદં રાજા પ્રીણયન્માં પુનઃ પુનઃ ।
નાબ્રવં લજ્જમાનાહં નૃપં પ્રીતમના ભૃશમ્ ॥ ૨૩॥

સમ્પૂર્ણે દશમે માસિ પુત્રો જાતસ્તતો મમ ।
શુભેઽહ્નિ ગ્રહનક્ષત્રલગ્નતારાબલાન્વિતે ॥ ૨૪॥

બભૂવ નૃપતેર્ગેહે પુત્રજન્મમહોત્સવઃ ।
રાજા પરમસન્તુષ્ટો બભૂવ સુતજન્મતઃ ॥ ૨૫॥

સૂતકાન્તે સુતં વીક્ષ્ય રાજા મુદમવાપ હ ।
અહં ભૂમિપતેશ્ચાસં પ્રિયા ભાર્યા પરન્તપ ॥ ૨૬॥

તતો વર્ષદ્વયાન્તે વૈ પુનર્ગર્ભો મયા ધૃતઃ ।
દ્વિતીયસ્તુ સુતો જાતઃ સર્વલક્ષણસંયુતઃ ॥ ૨૭॥

સુધન્વેતિ સુતસ્યાથ નામ ચક્રે નૃપસ્તદા ।
વીરવર્મેતિ જ્યેષ્ઠસ્ય બ્રાહ્મણૈઃ પ્રેરિતસ્ત્વયમ્ ॥ ૨૮॥

એવં દ્વાદશ પુત્રાશ્ચ પ્રસૂતા ભૂપસમ્મતાઃ ।
મોહિતોઽહં તદા તેષાં પ્રીત્યા પાલનલાલને ॥ ૨૯॥

પુનરષ્ટ સુતાઃ કાલે કાલે જાતાઃ સ્વરૂપિણઃ ।
ગાર્હસ્થ્યં મે તતઃ પૂર્ણં સમ્પન્નં સુખસાધનમ્ ॥ ૩૦॥

તેષાં દારક્રિયાઃ કાલે કૃતા રાજ્ઞા યથોચિતાઃ ।
સ્નુષાભિશ્ચ તથા પુત્રૈઃ પરિવારો મહાનભૂત્ ॥ ૩૧॥

તતઃ પૌત્રાદિસમ્ભૂતાસ્તેઽપિ ક્રીડારસાન્વિતાઃ ।
આસન્નાનારસોપેતા મોહવૃદ્ધિકરા ભૃશમ્ ॥ ૩૨॥

કદાચિત્સુખમૈશ્વર્યં કદાચિદ્દુઃખમદ્ભુતમ્ ।
પુત્રેષુ રોગજનિતં દેહસન્તાપકારકમ્ ॥ ૩૩॥

પરસ્પરં કદાચિત્તુ વિરોધોઽભૂત્સુદારુણઃ ।
પુત્રાણાં વા વધૂનાં ચ તેન સન્તાપસમ્ભવઃ ॥ ૩૪॥

સુખદુઃખાત્મકે ઘોરે મિથ્યાચારકરે ભૃશમ્ ।

સઙ્કલ્પજનિતે ક્ષુદ્રે મગ્નોઽહં મુનિસત્તમ ॥ ૩૫॥

વિસ્મૃતં પૂર્વવિજ્ઞાનં શાસ્ત્રજ્ઞાનં તથા ગતમ્ ।
યોષાભાવે વિલીનોઽહં ગૃહકાર્યેષુ સર્વથા ॥ ૩૬॥

અહઙ્કારસ્તુ સઞ્જાતો ભૃશં મોહવિવર્ધકઃ ।
એતે મે બલિનઃ પુત્રાઃ સ્નુષાઃ સુકુલસમ્ભવાઃ ॥ ૩૭॥

એતે પુત્રાઃ સુસન્નદ્ધાઃ ક્રીડન્તિ મમ વેશ્મસુ ।
ધન્યાહં ખલુ નારીણાં સંસારેઽસ્મિન્નહો ભૃશમ્ ॥ ૩૮॥

નારદોઽહં ભગવતા વઞ્ચિતો માયયા કિલ ।
ન કદાચિન્મયાપ્યેવં ચિન્તિતં મનસા કિલ ॥ ૩૯॥

રાજપત્ની શુભાચારા બહુપુત્રા પતિવ્રતા ।
ધન્યાહં કિલ સંસારે કૃષ્ણૈવં મોહિતસ્ત્વહમ્ ॥ ૪૦॥

અથ કશ્ચિન્નૃપઃ કામં દૂરદેશાધિપો મહાન્ ।
અરાતિભાવમાપન્નઃ પતિના સહ માનદ ॥ ૪૧॥

કૃત્વા સૈન્યસમાયોગં રથૈશ્ચ વારણૈર્યુતમ્ ।
આજગામ કાન્યકુબ્જે પુરે યુદ્ધમચિન્તયત્ ॥ ૪૨॥

વેષ્ટિતં નગરં તેન રાજ્ઞા સૈન્યયુતેન ચ ।
મમ પુત્રાશ્ચ પૌત્રાશ્ચ નિર્ગતા નગરાત્તદા ॥ ૪૩॥

સઙ્ગ્રામસ્તુમુલસ્તત્ર કૃતસ્તૈસ્તેન પુત્રકૈઃ ।
હતા રણે સુતાઃ સર્વે વૈરિણા કાલયોગતઃ ॥ ૪૪॥

રાજા ભગ્નસ્તુ સઙ્ગ્રામાદાગતઃ સ્વગૃહં પુનઃ ।
શ્રુતં મયા મૃતાઃ પુત્રાઃ સઙ્ગ્રામે ભૃશદારુણે ॥ ૪૫॥

સ હત્વા મે સુતાન્પૌત્રાન્ગતો રાજા બલાન્વિતઃ ।
ક્રન્દમાના હ્યહં તત્ર ગતા સમરમણ્ડલે ॥ ૪૬॥

દૃષ્ટ્વા તાન્પતિતાન્પુત્રાન્પૌત્રાંશ્ચદુઃખપીડિતા ।
વિલલાપાહમાયુષ્મઞ્છોકસાગરસમ્પ્લવે ॥ ૪૭॥

હા પુત્રાઃ ક્વ ગતા મેઽદ્ય હા હતાસ્મિ દુરાત્મના ।
દૈવેનાતિબલિષ્ઠેન દુર્વારેણાતિપાપિના ॥ ૪૮॥

એતસ્મિન્નન્તરે તત્ર ભગવાન્મધુસૂદનઃ ।
કૃત્વા રૂપં દ્વિજસ્યાગાદ્વૃદ્ધઃ પરમશોભનઃ ॥ ૪૯॥

સુવાસા વેદવિત્કામં મત્સમીપં સમાગતઃ ।
મામુવાચાતિદીનાં સ ક્રન્દમાનાં રણાજિરે ॥ ૫૦॥

બ્રાહ્મણ ઉવાચ ।
કિં વિષીદસિ તન્વઙ્ગિ ભ્રમોઽયં પ્રકટીકૃતઃ ।
મોહેન કોકિલાલાપે પતિપુત્રગૃહાત્મકે ॥ ૫૧॥

કા ત્વં કસ્યાઃ સુતાઃ કેઽમી ચિન્તયાત્મગતિં પરામ્ ।
ઉત્તિષ્ઠ રોદનં ત્યક્ત્વા સ્વસ્થા ભવ સુલોચને ॥ ૫૨॥

સ્નાનં ચ તિલદાનં ચ પુત્રાણાં કુરુ કામિનિ ।
પરલોકગતાનાં ચ મર્યાદારક્ષણાય વૈ ॥ ૫૩॥

કર્તવ્યં સર્વથા તીર્થે સ્નાનં તુ ન ગૃહે ક્વચિત્ ।
મૃતાનાં કિલ બન્ધૂનાં ધર્મશાસ્ત્રવિનિર્ણયઃ ॥ ૫૪॥

નારદ ઉવાચ ।
ઇત્યુક્ત્વા તેન વિપ્રેણ વૃદ્ધેન પ્રતિબોધિતા ।
ઉત્થિતાહં નૃપેણાથ યુક્તા બન્ધુભિરાવૃતા ॥ ૫૫॥

અગ્રતો દ્વિજરૂપેણ ભગવાન્ભૂતભાવનઃ ।
ચલિતાહં તતસ્તૂર્ણં તીર્થં પરમપાવનમ્ ॥ ૫૬॥

હરિર્માં કૃપયા તત્ર પુન્તીર્થે સરસિ પ્રભુઃ ।
નીત્વાહ ભગવાન્વિષ્ણુર્દ્વિજરૂપી જનાર્દનઃ ॥ ૫૭॥

સ્નાનં કુરુ તડાગેઽસ્મિન્પાવને ગજગામિનિ ।
ત્યજ શોકં ક્રિયાકાલઃ પુત્રાણાં ચ નિરર્થકમ્ ॥ ૫૮॥

કોટિશસ્તે મૃતાઃ પુત્રા જન્મજન્મસમુદ્ભવાઃ ।
પિતરઃ પતયશ્ચૈવ ભ્રાતરો જામયસ્તથા ॥ ૫૯॥

કેષાં દુઃખં ત્વયા કાર્યં ભ્રમેઽસ્મિન્માનસોદ્ભવે ।
વિતથે સ્વપ્નસદૃશે તાપદે દેહિનામિહ ॥ ૬૦॥

નારદ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા તીર્થે પુરુષસંજ્ઞકે ।

પ્રવિષ્ટા સ્નાતુકામાહં પ્રેરિતા તત્ર વિષ્ણુના ॥ ૬૧॥

મજ્જનાદેવ તીર્થેષુ પુમાઞ્જાતઃ ક્ષણાદપિ ।
હરિર્વીણાં કરે કૃત્વા સ્થિતસ્તીરે સ્વદેહવાન્ ॥ ૬૨॥

ઉન્મજ્જ્ય ચ મયા તીરે દૃષ્ટઃ કમલલોચનઃ ।
પ્રત્યભિજ્ઞા તદા જાતા મમ ચિત્તે દ્વિજોત્તમ ॥ ૬૩॥

સઞ્ચિન્તિતં મયા તત્ર નારદોઽહમિહાગતઃ ।
હરિણા સહ સ્ત્રીભાવં પ્રાપ્તો માયાવિમોહિતઃ ॥ ૬૪॥

ઇતિ ચિન્તાપરશ્ચાહં યદા જાતસ્તદા હરિઃ ।
મામાહ નારદાગચ્છ કિં કરોષિ જલે સ્થિતઃ ॥ ૬૫॥

વિસ્મિતોઽહં તદા સ્મૃત્વા સ્ત્રીભાવં દારુણં ભૃશમ્ ।
પુનઃ પુરુષભાવશ્ચ સમ્પન્નઃ કેન હેતુના ॥ ૬૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ષષ્ઠસ્કન્ધે
નારદસ્ય પુનઃ સ્વરૂપપ્રાપ્તિવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૬.૨૯॥

## ૬.૩૦ ત્રિંશોઽધ્યાયઃ । માયાપ્રાબલ્યવર્ણનમ્ ।

નારદ ઉવાચ ।
માં દૃષ્ટ્વા નારદં વિપ્રં વિસ્મિતોઽસૌ મહીપતિઃ ।
ક્વ ગતા મમ ભાર્યા સા કુતોઽયં મુનિસત્તમઃ ॥ ૧॥

વિલલાપ નૃપસ્તત્ર હા પ્રિયેતિ મુહુર્મુહુઃ ।
ક્વ ગતા માં પરિત્યજ્ય વિલપન્તં વિયોગિનમ્ ॥ ૨॥

વિના ત્વાં વિપુલશ્રોણિ વૃથા મે જીવિતં ગૃહમ્ ।
રાજ્યં કમલપત્રાક્ષિ કિં કરોમિ શુચિસ્મિતે ॥ ૩॥

ન પ્રાણા મે બહિર્યાન્તિ વિરહેણ તવાધુના ।
ગતો વૈ પ્રીતિધર્મસ્તુ ત્વામૃતે પ્રાણધારણાત્ ॥ ૪॥

વિલપામિ વિશાલાક્ષિ દેહિ પ્રત્યુત્તરં પ્રિયમ્ ।
ક્વ ગતા સા મયિ પ્રીતિર્યાભૂત્પ્રથમસઙ્ગમે ॥ ૫॥

નિમગ્ના કિં જલે સુભ્રૂર્ભક્ષિતા મત્સ્યકચ્છપૈઃ ।
ગૃહીતા વરુણેનાશુ મમ દૌર્ભાગ્યયોગતઃ ॥ ૬॥

ધન્યા સુચારુસર્વાઙ્ગિ યા ત્વં પુત્રૈઃ સમાગતા ।
અકૃત્રિમસ્તુ પુત્રેષુ સ્નેહસ્તેઽમૃતભાષિણિ ॥ ૭॥

ન યુક્તમધુના યન્માં વિહાય ત્રિદિવં ગતા ।
વિલપન્તં પતિં દીનં પુત્રસ્નેહેન યન્ત્રિતા ॥ ૮॥

ઉભયં મે ગતં કાન્તે પુત્રાસ્ત્વં પ્રાણવલ્લભા ।
તથાપિ મરણં નાસ્તિ દુઃખિતસ્ય ભૃશં પ્રિયે ॥ ૯॥

કિં કરોમિ ક્વ ગચ્છામિ રામો નાસ્તિ મહીતલે ।
રામાવિરહજં દુઃખં જાનાતિ રઘુનન્દનઃ ॥ ૧૦॥

વિધિના નિષ્ઠુરેણાત્ર વિપરીતં કૃતં ભુવિ ।
દમ્પત્યોર્મરણં ભિન્નં સર્વથા સમચિત્તયોઃ ॥ ૧૧॥

ઉપકારસ્તુ નારીણાં મુનિભિર્વિહિતઃ કિલ ।
યદુક્તં ધર્મશાસ્ત્રેષુ જ્વલનં પતિના સહ ॥ ૧૨॥

એવં વિલપમાનં તં રાજાનં ભગવાન્હરિઃ ।
નિવારયામાસ તદા વચનૈર્યુક્તિયોજિતૈઃ ॥ ૧૩॥

શ્રીભગવાનુવાચ ।
કિં વિષીદસિ રાજેન્દ્ર ક્વ ગતા તે પ્રિયાઙ્ગના ।
ન શ્રુતં કિં ત્વયા શાસ્ત્રં ન કૃતોઽસૌ બુધાશ્રયઃ ॥ ૧૪॥

કા સા કસ્ત્વં ક્વ સંયોગો વિયોગઃ કીદૃશસ્તવ ।
પ્રવાહરૂપે સંસારે નૃણાં નૌતરતામિવ ॥ ૧૫॥

ગૃહે ગચ્છ નૃપશ્રેષ્ઠ વૃથા તે રુદિતેન કિમ્ ।
સંયોગશ્ચ વિયોગશ્ચ દૈવાધીનઃ સદા નૃણામ્ ॥ ૧૬॥

અનયા સહ તે રાજન્ સંયોગસ્ત્વિહ સંવૃતઃ ।
ભુક્તા ત્વયા વિશાલાક્ષી સુન્દરી તનુમધ્યમા ॥ ૧૭॥

ન દૃષ્ટૌ પિતરાવસ્યાસ્ત્વયા પ્રાપ્તા સરોવરે ।
કાકતાલીપ્રસઙ્ગેન યદ્ભૂતં તત્તથા ગતમ્ ॥ ૧૮॥

મા શોકં કુરુ રાજેન્દ્ર કાલો હિ દુરતિક્રમઃ ।
કાલયોગં સમાસાદ્ય ભુઙ્ક્ષ્વ ભોગાન્ ગૃહે યથા ॥ ૧૯॥

યથાગતા ગતા સા તુ તથૈવ વરવર્ણિની ।
યથા પૂર્વં તથા તત્ર ગચ્છ કાર્યં કુરુ પ્રભો ॥ ૨૦॥

રુદિતેન તવાદ્યૈવ નાગમિષ્યતિ કામિની ।
વૃથા શોચસિ પૃથ્વીશ યોગયુક્તો ભવાધુના ॥ ૨૧॥

ભોગઃ કાલવશાદેતિ તથૈવ પ્રતિયાતિ ચ ।
નાત્ર શોકસ્તુ કર્તવ્યો નિષ્ફલે ભવવર્ત્મનિ ॥ ૨૨॥

નૈકત્ર સુખસંયોગો દુઃખયોગસ્તુ નૈકતઃ ।
ઘટિકાયન્ત્રવત્કામં ભ્રમણં સુખદુઃખયોઃ ॥ ૨૩॥

મનઃ કૃત્વા સ્થિરં ભૂપ કુરુ રાજ્યં યથાસુખમ્ ।
અથવા ન્યસ્ય દાયાદે વનં સેવય સામ્પ્રતમ્ ॥ ૨૪॥

દુર્લભો માનુષો દેહઃ પ્રાણિનાં ક્ષણભઙ્ગુરઃ ।
તસ્મિન્પ્રાપ્તે તુ કર્તવ્યં સર્વથૈવાત્મસાધનમ્ ॥ ૨૫॥

જિહ્વોપસ્થરસો રાજન્ પશુયોનિષુ વર્તતે ।
જ્ઞાનં માનુષદેહે વૈ નાન્યાસુ ચ કુયોનિષુ ॥ ૨૬॥

તસ્માદ્ગચ્છ ગૃહં ત્યક્ત્વા શોકં કાન્તાસમુદ્ભવમ્ ।
માયેયં ભગવત્યાસ્તુ યયા સમ્મોહિતં જગત્ ॥ ૨૭॥

નારદ ઉવાચ ।
ઇત્યુક્તો હરિણા રાજા પ્રણમ્ય કમલાપતિમ્ ।
કૃત્વા સ્નાનવિધિં સમ્યગ્જગામ નિજમન્દિરમ્ ॥ ૨૮॥

દત્ત્વા રાજ્યં સ્વપૌત્રાય પ્રાપ્ય નિર્વેદમદ્ભુતમ્ ।
વનં જગામ ભૂપાલસ્તત્ત્વજ્ઞાનમવાપ ચ ॥ ૨૯॥

ગતે રાજન્યહં વીક્ષ્ય ભગવન્તમધોક્ષજમ્ ।
તમબ્રવં જગન્નાથં હસન્તં માં પુનઃ પુનઃ ॥ ૩૦॥

વઞ્ચિતોઽહં ત્વયા દેવ જ્ઞાતં માયાબલં મહત્ ।
સ્મરામિ ચરિતં સર્વં સ્ત્રીદેહે યત્કૃતં મયા ॥ ૩૧॥

બ્રૂહિ મે દેવદેવેશ પ્રવિષ્ટોઽહં સરોવરે ।
વિગતં પૂર્વવિજ્ઞાનં સ્નાનાદેવ કથં હરે ॥ ૩૨॥

યોષિદ્દેહં સમાસાદ્ય મોહિતોઽહં જગદ્ગુરો ।

પતિં પ્રાપ્ય નૃપશ્રેષ્ઠં પુલોમી વાસવં યથા ॥ ૩૩॥

મનસ્તદેવ તચ્ચિત્તં દેહઃ સ ચ પુરાતનઃ ।
લિઙ્ગં તદેવ દેવેશ સ્મૃતેર્નાશઃ કથં હરે ॥ ૩૪॥

વિસ્મયોઽયં મહાન્મેઽત્ર જ્ઞાનનાશં પ્રતિ પ્રભો ।
કથયાદ્ય રમાકાન્ત કારણં પરમં ચ યત્ ॥ ૩૫॥

નારીદેહં મયા પ્રાપ્ય ભુક્તા ભોગા હ્યનેકશઃ ।
સુરાપાનં કૃતં નિત્યં વિધિહીનં ચ ભોજનમ્ ॥ ૩૬॥

મયા તદેવ ન જ્ઞાતં નારદોઽહમિતિ સ્ફુટમ્ ।
જાનામ્યદ્ય યથા સર્વં વિવિક્તં ન તથા તદા ॥ ૩૭॥

વિષ્ણુરુવાચ ।
પશ્ય નારદ માયાવી વિલાસોઽયં મહામતે ।
દેહેષુ સર્વજન્તૂનાં દશાભેદા હ્યનેકશઃ ॥ ૩૮॥

જાગ્રત્સ્વપ્નસુષુપ્તિશ્ચ તુરીયા દેહિનાં દશા ।
તથા દેહાન્તરે પ્રાપ્તે સન્દેહઃ કીદૃશઃ પુનઃ ॥ ૩૯॥

સુપ્તો નરો ન જાનાતિ ન શૃણોતિ વદત્યપિ ।
પુનઃ પ્રબુદ્ધો જાનાતિ સર્વં જ્ઞાતમશેષતઃ ॥ ૪૦॥

નિદ્રયા ચાલ્યતે ચિત્તં ભવન્તિ સ્વપ્નસમ્ભવાઃ ।
નાનાવિધા મનોભેદા મનોભાવા હ્યનેકશઃ ॥ ૪૧॥

ગજો માં હન્તુમાયાતિ ન શક્તોઽસ્મિ પલાયને ।
કિં કરોમિ ન મે સ્થાનં યત્ર ગચ્છામિ સત્વરઃ ॥ ૪૨॥

મૃતં પિતામહં સ્વપ્ને પશ્યતિ સ્વગૃહાગતમ્ ।
સંયોગસ્તેન વાર્તા ચ ભોજનં સહ મન્યતે ॥ ૪૩॥

પ્રબુદ્ધઃ ખલુ જાનાતિ સ્વપ્ને દૃષ્ટં સુખાસુખમ્ ।
સ્મૃત્વા સર્વં જનેભ્યસ્તુ વિસ્તરાત્પ્રવદત્યપિ ॥ ૪૪॥

સ્વપ્નેકોઽપિ ન જાનાતિ ભ્રમોઽયમિતિ નિશ્ચયઃ ।
તથા તથૈવ વિભવો માયાયા દુર્ગમઃ કિલ ॥ ૪૫॥

નાહં નારદ જાનામિ પારં પરમદુર્ઘટમ્ ।
ગુણાનાં કિલ માયાયા નૈવ શમ્ભુર્ન પદ્મજઃ ॥ ૪૬॥

કોઽન્યો જ્ઞાતું સમર્થોઽભૂન્માનતો મન્દધીઃ પુનઃ ।
માયાગુણપરિજ્ઞાનં ન કસ્યાપિ ભવેદિહ ॥ ૪૭॥

ગુણત્રયકૃતં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ।
વિના ગુણૈર્ન સંસારો વર્તતે કિઞ્ચિદપ્યદઃ ॥ ૪૮॥

અહં સત્ત્વપ્રધાનોઽસ્મિ રજસ્તમસમન્વિતઃ ।
ન કદાચિત્ત્રિભિર્હીનો ભવામિ ભુવનેશ્વરઃ ॥ ૪૯॥

તથા બ્રહ્મા પિતા તેઽત્ર રજોમુખ્યઃ પ્રકીર્તિતઃ ।
તમઃસત્ત્વસમાયુક્તો ન તાભ્યામુજ્ઝિતઃ કિલ ॥ ૫૦॥

શિવસ્તથા તમોમુખ્યો રજઃસત્ત્વસમાવૃતઃ ।
ગુણત્રયવિહીનસ્તુ નૈવ કોઽપિ મયા શ્રુતઃ ॥ ૫૧॥

તસ્માન્મોહો ન કર્તવ્યઃ સંસારેઽસ્મિન્મુનીશ્વર ।
માયાવિનિર્મિતેઽસારેઽપારે પરમદુર્ઘટે ॥ ૫૨॥

દૃષ્ટા માયા ત્વયાદ્યૈવ ભુક્તા ભોગા હ્યનેકશઃ ।
કિં પૃચ્છસિ મહાભાગ તસ્યાશ્ચરિતમદ્ભુતમ્ ॥ ૫૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે માયાપ્રાબલ્યવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૬.૩૦॥

## ૬.૩૧ એકત્રિંશોઽધ્યાયઃ । ભગવતીમાહાત્મ્યવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
નિશામય મહારાજ બ્રવીમિ વિશદાક્ષરમ્ ।
માહાત્મ્યં ખલુ માયાયા નારદાત્તુ મયા શ્રુતમ્ ॥ ૧॥

મયા પુનર્મુનિઃ પૃષ્ટો નારદઃ સર્વવિત્તમઃ ।
શ્રુત્વા કથાં મુનેસ્તસ્ય નારીદેહસમુદ્ભવામ્ ॥ ૨॥

બ્રૂહિ નારદ પશ્ચાત્કિં કથિતં હરિણા તદા ।
ક્વ ગતશ્ચ જગન્નાથો ભવતા સહ માધવઃ ॥ ૩॥

નારદ ઉવાચ ।
ઇત્યુક્ત્વા ભગવાંસ્તસ્મિંસ્તડાગેઽતિમનોહરે ।

આરુહ્ય ગરુડં ગન્તું વૈકુણ્ઠે ચ મનો દધે ॥ ૪॥

મામુવાચ રમાકાન્તો યથેષ્ટં ગચ્છ નારદ ।
એહિ વા મમ લોકં ત્વં યથારુચિ તથા કુરુ ॥ ૫॥

બ્રહ્મલોકં ગતશ્ચાહમાપૃચ્છ્ય મધુસૂદનમ્ ।
ભગવાનપિ દેવેશસ્તત્ક્ષણાદ્ગરુડાસનઃ ॥ ૬॥

વૈકુણ્ઠમગમત્તૂર્ણં મામાદિશ્ય યથાસુખમ્ ।
તતોઽહં પિતૃસદનં ગતો યાતે જનાર્દને ॥ ૭॥

ચિન્તયન્સકલં દુઃખં સુખં ચ પરમાદ્ભુતમ્ ।
ગત્વા પ્રણમ્ય પિતરં સ્થિતો યાવત્પુરઃ પિતુઃ ॥ ૮॥

તાવત્પૃષ્ટો મુને પિત્રા વીક્ષ્ય ચિન્તાતુરં તુ મામ્ ।
બ્રહ્યોવાચ ।
ક્વ ગતોઽસિ મહાભાગ કસ્માચ્ચિન્તાતુરઃ સુત ॥ ૯॥

સ્વસ્થં નૈવાદ્ય પશ્યામિ મનસ્તે મુનિસત્તમ ।
કેનાપિ વઞ્ચિતોઽસિ ત્વં દૃષ્ટં વા કિઞ્ચિદદ્ભુતમ્ ॥ ૧૦॥

વિષણ્ણં ગતવિજ્ઞાનં પશ્યામિ ત્વાં કથં સુત ।
નારદ ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા પિત્રા બૃસ્યાં સમુપવેશ્ય ચ ॥ ૧૧॥

તમબ્રવં સ્વવૃત્તાન્તં માયાબલસમુદ્ભવમ્ ।
વઞ્ચિતોઽહં પિતઃ કામં વિષ્ણુના પ્રભવિષ્ણુના ॥ ૧૨॥

સ્ત્રીભાવં ગમિતઃ કામં વર્ષાણિ સુબહૂન્યપિ ।
અનુભૂતં મહદ્દુઃખં પુત્રશોકસમુદ્ભવમ્ ॥ ૧૩॥

પ્રબોધિતોઽહં તેનૈવ મૃદુવાક્યામૃતેન ચ ।
પુનઃ સરોવરે સ્નાત્વા જાતોઽહં નારદઃ પુમાન્ ॥ ૧૪॥

કિમેતત્કારણં બ્રહ્મન્ યન્મોહમગમં તદા ।
વિસ્મૃતં પૂર્વવિજ્ઞાનં તન્મયસ્તરસા કૃતઃ ॥ ૧૫॥

એતન્માયાબલં બ્રહ્મન્ન જાનેઽહં દુરત્યયમ્ ।
જ્ઞાનહાનિકરં જાતં મૂલં મોહસ્ય વિસ્ફુટમ્ ॥ ૧૬॥

અનુભૂતં મયા સમ્યગ્જ્ઞાતં સર્વં શુભાશુભમ્ ।

કથં ત્વં જિતવાંસ્તાત તમુપાયં વદસ્વ મે ॥ ૧૭॥

નારદ ઉવાચ ।
વિજ્ઞપ્તોઽસૌ મયા ધાતા પ્રીતિપૂર્વમતઃ પરમ્ ।
મામુવાચ સ્મિતં કૃત્વા પિતા મે વાસવીસુત ॥ ૧૮॥

બ્રહ્મોવાચ ।
દુર્જયૈષા સુરૈઃ સર્વૈર્મુનિભિશ્ચ મહાત્મભિઃ ।
તાપસૈર્જ્ઞાનયુક્તૈશ્ચ યોગિભિઃ પવનાશનૈઃ ॥ ૧૯॥

નાહં તાં સર્વથા જ્ઞાતું શક્તો માયાં મહાબલામ્ ।
વિષ્ણુર્જ્ઞાતું ન શક્તશ્ચ તથા શમ્ભુરુમાપતિઃ ॥ ૨૦॥

દુર્જ્ઞેયા સા મહામાયા સૃષ્ટિસ્થિત્યન્તકારિણી ।
કાલકર્મસ્વભાવાદ્યૈર્નિમિત્તકારણૈર્વૃતા ॥ ૨૧॥

શોકં મા કુરુ મેધાવિંસ્તત્ર માયામહાબલે ।
ન ચૈવ વિસ્મયઃ કાર્યો વયં સર્વે વિમોહિતાઃ ॥ ૨૨॥

નારદ ઉવાચ ।
પિત્રેત્યુક્તસ્તદા વ્યાસ તમાપૃચ્છ્ય ગતસ્મયઃ ।
આગતોઽસ્મ્યત્ર પશ્યન્વૈ તીર્થાનિ ચ વરાણિ ચ ॥ ૨૩॥

તસ્માત્ત્વમપિ સન્ત્યજ્ય મોહં કૌરવનાશજમ્ ।
કાલક્ષયં સુખાસીનઃ સ્થાનેઽસ્મિન્ કુરુ સત્તમ ॥ ૨૪॥

અવશ્યમેવ ભોક્તવ્યં કૃતં કર્મ શુભાશુભમ્ ।
નિશ્ચયં હૃદયે કૃત્વા વિચરસ્વ યથાસુખમ્ ॥ ૨૫॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા નારદો રાજન્ ગતો માં પ્રતિબોધ્ય ચ ।
અહં તચ્ચિન્તયન્વાક્યં યદુક્તં મુનિના તદા ॥ ૨૬॥

સ્થિતઃ સરસ્વતીતીરે કલ્પે સારસ્વતે વરે ।
કાલાતિવાહનાયૈતત્કૃતં ભાગવતં મયા ॥ ૨૭॥

પુરાણમુત્તમં ભૂપ સર્વસંશયનાશનમ્ ।
નાનાખ્યાનસમાયુક્તં વેદપ્રામાણ્યસંશ્રિતમ્ ॥ ૨૮॥

સન્દેહોઽત્ર ન કર્તવ્યઃ સર્વથા નૃપસત્તમ ।

યથેન્દ્રજાલિકઃ કશ્ચિત્પાઞ્ચાલીં દારવીં કરે ॥ ૨૯॥

કૃત્વા નર્તયતે કામં સ્વેચ્છયા વશવર્તિનીમ્ ।
તથા નર્તયતે માયા જગત્સ્થાવરજઙ્ગમમ્ ॥ ૩૦॥

બ્રહ્માદિસ્તમ્બપર્યન્તં સદેવાસુરમાનુષમ્ ।
પઞ્ચેન્દ્રિયસમાયુક્તં મનશ્ચિત્તાનુવર્તનમ્ ॥ ૩૧॥

ગુણાસ્તુ કારણં રાજન્ સર્વેષાં સર્વથા ત્રયઃ ।
કાર્યં કારણસંયુક્તં ભવતીતિ વિનિશ્ચયઃ ॥ ૩૨॥

ભિન્નભિન્નસ્વભાવાસ્તે ગુણા માયાસમુદ્ભવાઃ ।
શાન્તો ઘોરસ્તથા મૂઢસ્ત્રયસ્તુ વિવિધા યતઃ ॥ ૩૩॥

તત્સમેતઃ પુમાન્નિત્યં તદ્વિહીનઃ કથં ભવેત્ ।
ન ભવત્યેવ સંસારે રહિતસ્તન્તુભિઃ પટઃ ॥ ૩૪॥

તથા ગુણૈસ્ત્રિભિર્હીનો ન દેહીતિ વિનિશ્ચયઃ ।
દેવદેહો મનુષ્યો વા તિરશ્ચો વા નરાધિપ ॥ ૩૫॥

ગુણૈર્વિરહિતો ન સ્યાન્મૃદ્વિહીનો ઘટો યથા ।
બ્રહ્મા વિષ્ણુસ્તથા રુદ્રસ્ત્રયશ્ચામી ગુણાશ્રયાઃ ॥ ૩૬॥

કદાચિત્પ્રીતિયુક્તાસ્તે તથાપ્રીતિયુતાઃ પુનઃ ।
તથા વિષાદયુક્તાસ્તે ભવન્તિ ગુણયોગતઃ ॥ ૩૭॥

બ્રહ્મા કદાચિત્સત્ત્વસ્થસ્તદા શાન્તઃ સમાધિમાન્ ।
પ્રીતિયુક્તો ભવેત્સર્વભૂતેષુ જ્ઞાનસંયુતઃ ॥ ૩૮॥

પુનઃ સત્ત્વવિહીનસ્તુ રજોગુણસમાવૃતઃ ।
તદા ભવેદ્ ઘોરરૂપઃ સર્વત્રાપ્રીતિસંયુતઃ ॥ ૩૯॥

યદા તમોગુણાવિષ્ટો બાહુલ્યેન ભવેદ્વિધિઃ ।
તદા વિષાદસમ્પન્નો મૂઢો ભવતિ નાન્યથા ॥ ૪૦॥

માધવોઽપિ સદા સત્ત્વસંશ્રિતઃ સર્વથા ભવેત્ ।
યદા શાન્તઃ પ્રીતિયુક્તો ભવેજ્જ્ઞાનસમન્વિતઃ ॥ ૪૧॥

સ એવ રજાધિક્યાદપ્રીતિસંયુતો ભવેત્ ।
ઘોરશ્ચ સર્વભૂતેષુ ગુણાધીનો રમાપતિઃ ॥ ૪૨॥

રુદ્રોઽપિ સત્ત્વસંયુક્તઃ પ્રીતિમાઞ્છાન્તિમાન્ભવેત્ ।
રજોનિમીલિતઃ સોઽપિ ઘોરઃ પ્રીતિવિવર્જિતઃ ॥ ૪૩॥

તમોગુણયુતઃ સોઽપિ મૂઢો વિષાદયુગ્ભવેત્ ।
એતે યદિ ગુણાધીના બ્રહ્મવિષ્ણુહરાદયઃ ॥ ૪૪॥

સૂર્યવંશોદ્ભવાસ્તદ્વત્સોમવંશભવા અપિ ।
મન્વાદયશ્ચ યે પ્રોક્તાશ્ચતુર્દશ યુગે યુગે ॥ ૪૫॥

અન્યેષાં ચૈવ કા વાર્તા સંસારેઽસ્મિન્નૃપોત્તમ ।
માયાધીનં જગત્સર્વં સદેવાસુરમાનુષમ્ ॥ ૪૬॥

તસ્માદ્રાજન્ન કર્તવ્યઃ સન્દેહોઽત્ર કદાચન ।
દેહી માયાપરાધીનશ્ચેષ્ટતે તદ્વશાનુગઃ ॥ ૪૭॥

સા ચ માયા પરે તત્ત્વે સંવિદ્રૂપેઽપિ સર્વદા ।
તદધીના પ્રેરિતા ચ તેન જીવેષુ સર્વદા ॥ ૪૮॥

તતો માયાવિશિષ્ટાં તાં સંવિદં પરમેશ્વરીમ્ ।
માયેશ્વરીં ભગવતીં સચ્ચિદાનન્દરૂપિણીમ્ ॥ ૪૯॥

ધ્યાયેત્તથારાધયેચ્ચ પ્રણમેચ્ચ જપેદપિ ।
તેન સા સદયા ભૂત્વા મોચયત્યેવ દેહિનમ્ ॥ ૫૦॥

સ્વમાયાં સંહરત્યેવ સ્વાનુભૂતિપ્રદાનતઃ ।
ભુવનં ખલુ માયા સ્યાદીશ્વરી તસ્ય નાયિકા ॥ ૫૧॥

ભુવનેશી તતઃ પ્રોક્તા દેવી ત્રૈલોક્યસુન્દરી ।
તદ્રૂપે યદિ સક્તં સ્યાચ્ચિત્તં ભૂમિપતે સદા ॥ ૫૨॥

માયયા કિં ભવેત્તત્ર સદસદ્ભૂતયા નૃપ ।
તસ્માન્માયાનિરાસાર્થં નાન્યદ્વૈ દેવતાન્તરમ્ ॥ ૫૩॥

સમર્થં તુ વિના દેવીં સચ્ચિદાનન્દરૂપિણીમ્ ।
તમોરાશિં નાશયિતું શક્તં નૈવ તમો ભવેત્ ॥ ૫૪॥

કિન્તુ ભાનુપ્રભાચન્દ્રવિદ્યુદ્વહ્નિપ્રભાદયઃ ।
તસ્માન્માયેશ્વરીમમ્બાં સ્વપ્રકાશાં તુ સંવિદમ્ ॥ ૫૫॥

આરાધયેદતિપ્રીત્યા માયાગુણનિવૃત્તયે ।
ઇતિ સમ્યઙ્મયાખ્યાતં વૃત્રાસુરવધાદિકમ્ ॥ ૫૬॥

યત્પૃષ્ટં રાજશાર્દૂલ કિમન્યચ્છ્રોતુમિચ્છસિ ।
પૂર્વાર્ધોઽયં પુરાણસ્ય કથિતસ્તવ સુવ્રત ॥ ૫૭॥

યત્ર દેવ્યાસ્તુ મહિમા વિસ્તરેણોપપાદિતઃ ।
એતદ્રહસ્યં શ્રીમાતુર્ન દેયં યસ્ય કસ્યચિત્ ॥ ૫૮॥

દેયં ભક્તાય શાન્તાય દેવીભક્તિરતાય ચ ।
શિષ્યાય જ્યેષ્ઠપુત્રાય ગુરુભક્તિયુતાય ચ ॥ ૫૯॥

ઇદમખિલકથાનાં સારભૂતં પુરાણં
નિખિલનિગમતુલ્યં સપ્રમાણાનુવિદ્ધમ્ ।
પઠતિ પરમભાવાદ્યઃ શ‍ૃણોતીહ ભક્ત્યા
સ ભવતિ ધનવાન્વૈ જ્ઞાનવાન્માનવોઽત્ર ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે ભગવતીમાહાત્મ્યવર્ણનં નામકત્રિંશોઽધ્યાયઃ ॥ ૬.૩૧॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે ષષ્ઠસ્કન્ધઃ સમાપ્તઃ ॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતમહાપુરાણે પૂર્વાર્ધઃ સમ્પૂર્ણઃ ॥

Encoded and proofread by Vishwas Bhide

---

*6 Shrimaddevibhagavatamahapurane Shashthah Skandhah*

pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*